न्यायसिद्धांत मुक्तावली टीका दिनकरी

मुक्तावली प्रकाशेन वा

१५२८

प्रज्ञावलिदीटीका प्रकाश
पत्रे १४८
श्लोक ५०००

भा॰टी॰ ॐ श्रीगणेशाय नमः ॐ लक्ष्मीपादयुगं प्रणम्य पितरं श्रीबालकृष्णाभिधं भारद्वाजकुलांबुधौ विधुमिव श्रीगो

१ रवाम्यांबुजातं ज्ञात्वाशेषमतं मितेन वचसा सिद्धान्तमुक्तावली गूढार्थांस्तनुते यथामति महादेवः यदेषां कृ

ते १ तत्र तावत्भाषापरिच्छेदव्याख्यानं चिकीर्षुः श्रीविश्वनाथपंचाननो निर्विघ्नपरिसमाप्तिसिद्धये कृ

तं सेश्वरनिर्देशरूपमंगलं स्वशिष्या ग्रंथेवं कुर्युरिति शिक्षयितायै निबंधं कुर्वन्नीश्वरं प्रार्थयते चूडाम

णीकृतेति लीलेति इदं च विशेषणं नातः समाप्तपुनरात्तदोषः वस्तुतस्तु विधोः किमिति चूडामणीकरणं

किमर्थं वा सर्पस्य वलयीकरणमित्याकांक्षाया प्रतिपत्तिर्न भवतीति लीलेत्यादिविशेषणानुक्तौ विवक्षिता

र्थबोधाभावान्नाप्यत्र दोषः उक्ताकांक्षया विशेषणानपेक्षत्वप्रसंगादिति लीलया ताण्डवं नृत्यं तत्र

पंडितोऽभिज्ञः इत्यर्थः अनेन च नृत्यविशिष्टतया स्मृतिविषयाः प्रार्थितार्था भवंत्येवेति सूचितं ननु भू

षणरहिते कथं नृत्यं तत्राह चूडामणीकृतेति अचूडामणिः चूडामणिः संपद्यते इति चूडामणीकृतो विधुर्येन

स तथेत्यर्थः वलयीकृतेति अवलयं वलयं संपद्यते इति वलयीकृतो वलयीकृतो वासुकिर्येन स तथेत्यर्थः

शिष्यावधानाय प्रतिजानीते निजनिर्मितेति निजेन स्वेन निर्मितां रचितां या कारिकावलीं तां अतिअल्पतः

संक्षेपः शब्दसंदोहो यासु ताः प्रतिसंहिताः ताः दृष्टप्रपंचाः चिरंतनानां कणादप्रभृतीनां उक्तयो वचांसि वचः

प्रतिपाद्या या युक्तयस्ताभिरहं विशदीकरवाणि प्रकटीकरोमीत्यर्थः ननु लीलावत्यादिग्रन्थाध्ययनेनैव कारिकावली
प्रतिपादितोऽर्थो बोद्धुं शक्य इति किमनेन भवत्कृतविशदनिबन्धेनेत्यत आह अतिसंक्षिप्तेति तथा च लीलावत्यादि
प्राचीननिबन्धेषु ग्रन्थबाहुल्येन बहुतरदुःखहेतुप्रतिपत्तिकतया नवबालानां न प्रवृत्तिरिति भावः सोऽप्येतावन्मूल
कत्वात् अप्रयुक्तानादरणीयतां निरसितुं चिरंतनेत्युक्तम् नानित्यवधारणेन तथा च कुतर्कादेवेत्यर्थः अनेन स्वस्य ग्रं
थकरणोत्के शाभावः सूचितः स्वस्य ग्रन्थकरणप्रवृत्तौ निमित्तमाह राजीवेति राजीवे याद याकृयानयावशं
वदः तदधीन इत्यर्थः ननु ग्रन्थादौ श्रोतृप्रवृत्तये प्रयोजनादि वक्तव्यं भवति तस्य चेहावक्तव्यात् उपेक्षणीयते
तस्य ग्रन्थस्य स्यात् इत्याशंक्य विषयप्रयोजनसंबंधाधिकारिणः सूचयन्नतिसंक्षिप्तवादेतस्य ग्रन्थस्य सकलप
दार्थप्रतिपादकतया कथं बालव्युत्पत्तिरित्याशंकां चैतद्ग्रन्थस्य सकलपदार्थप्रतिपादकत्वप्रदर्शनेन परिहरन्
करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणमिति भगवदुक्तेर्मुक्तावलीसमस्तकी
यं ग्रन्थं भगवति चार्पयन् स्वकीयमनुष्ठानये ग्रन्थस्य स्वस्य च नाम निबध्नाति सद्द्रव्येति द्रव्यैः सहिता युक्ता प्रतिपादकत
या गुणेन रचिता गुम्फितेत्युक्ता सतामनुष्यत्वादीनां चानोकमेण ज्ञापिका बोधका सजातिरूपसामान्यविशेषः
नित्यः समवायश्चैते मिलिता यत्र सेति सामान्यविशेषनित्यमिलिता नियमो विदामिलिते नित्यसंबंधः अभाव

प्रकर्षः आभावादिभेदेनवैलक्षण्यंतस्याउज्वलाप्रकाशिकेयामस्तुहिस्यासिद्धान्तमुक्तावली सिद्धान्तापवमुक्तामुक्ता
मावलिपंक्तिर्विशेषोनीयायणस्यवदनमिवतस्याःलीविन्यासाविशेषतोर्पिता सुकृतिनांपेटिकानांमनसः सदंसंतोसंवि
रंवहुकालंवितनुतां विस्तारयत्वित्यर्थः ननुमुक्तीनामसाहन्नाकथंविदेशामतोपमस्तऽआह सयुक्तीतिसत्याउक्तयो
यस्यांसातथामुक्तावलीसाहश्यंचग्रंथेद्रव्यादिपदार्थवत्वया यथाहि मुक्तावलीसद्रव्यासाध्यतयाद्रव्यवतीद्रव्य
साध्येतियावत् नानाविधद्रव्यचटितावागुणोनसूत्रेणगुंफितानिर्मिता सुकृतिनांपुण्यवतांयातिसंतिसमीची
नातिभगवद्भजनादिरूपाणिकर्माणितेषांवोधका सत्यामान्यंसमीचीनाजाति विशेषोमहत्वनिर्मलत्वादिना
भांनिस्यपतवरत्नेसवदा अभावेतेजोभावेभ्रंधकारेसतिप्रकर्षेणोज्ज्वलार्थप्रकाशिकेति द्रव्यादिसकलपदा
र्थवती तथायंग्रंथोपीति अत्रचमुक्तावलीतोल्लानिर्दोषत्वेसूचितं अत्रद्रव्यादिपदार्थप्रतिपादकत्वप्रदर्श
नेनद्रव्यादयोविषयाःउक्ताःपदार्थतत्वावधारणंचप्रयोजनंसूचितं संबंधस्तुप्रतिपाद्यप्रतिपादकभावःपदार्थतत्वाव
त्वावधारणकामोधिकारीतिग्रंथारंभसमयेकृतस्यमंगलस्यतन्निवंधनस्यचवैयर्थ्यमाशंक्यफलंदर्शयति विघ्न
विघातायेति प्रारिप्सितस्यग्रंथस्येतिशेषः यद्यप्यत्र तपदस्यात्यंतिमदभावपरतयाविघदमनर्थकमिति
प्रतिभातितथापिविशिष्टवाचकानांपदानांसतिपृथग्विशेषणवाचकपदसमवधानेविशेष्यमात्रपरतयाःस २

सं

कीचकेभ्यः कृतघर्षणेभ्य इत्यत्र कीचका वेणवस्तेषु घर्षे वह्नेस्तत्त्वमितिलोके प्रसिद्धमिति कोशात् तस्य संबंधस्तु विशिष्टवेणुबोधककी
चकपदे स्वरूपमात्र यातायदसमभावमात्रपरमेवस्पष्टं ननु निष्फलत्वात् मंगलाचरणमयुक्तं न च निष्फलत्वमेवासिद्धं
तस्य फलविशेषस्यानुपलब्धत्वे हेतुनासाधनादित्यभिप्रायेण शंकते ननु इति मंगलस्य कारणत्वाभावे व्यतिरेकव्यभिचा
रं स्वयं हेतुमाह विनापीति निर्विघ्नपरिसमाप्तीति विघ्नध्वंसपूर्वकसमाप्तीत्यर्थः न च तत्र जन्मान्तरीयमंगलकल्पना
न व्यभिचार इति वाच्यं भोगादिनापि नाशि कारणनिर्विघ्नता नाशसंभवे न जन्मान्तरीयमंगलं संदेहे न व्यभिचारसं संशय
भवात् अत्र काऽदंबर्यादिग्रन्थेषु मंगलसत्त्वेऽपि समाप्तेरदर्शनेनान्वयव्यभिचारोऽपि दोषो बोध्यः व्यभिचारसंदेहस्य
ना ग्राह्यसंशयत्वस्वयनयाकारणत्वग्रहेऽप्रतिबंधकत्वं न तु निश्चितत्वं तस्यानुकूलत्वादित्यभिप्रायवान् मंगलं स
माप्तिफलकं समाप्तस्यापि फलकत्वे सति सफलत्वात् इति परिशेषानुमानेन मंगलस्य समाप्तिफलकत्वं व्यवस्था
पयिष्यन् प्रथमतो विशेष्यासिद्धिं निराकरोति अवगीतेति विषयत्वं च ज्ञानविषयत्वमेवेति प्रसक्तं क्रमतश्चाचारे
ति आचारस्यात्रय परिकर्यैव तथापि विषयत्वस्य कृतेः कृतिरेव विवक्षिता न तु द्वेषविषयत्वं च विधेयत्वाबोध्यमतेन फ य
लेन व्यभिचारलक्षणाद्दूषणनयाकृतिविषयत्वात् विधेयतया कृतिविषयत्वं च चैत्यवंदनादावपीत्यत आह शिष्टेति
शिष्टेनेव फलसाधनतांशे भ्रान्तिरहितत्वं ननु वेदप्रामाण्याभ्युपगन्तृत्वं तेन बौद्धक्रमेणानेकदर्शादौ निष्फलेन
व्यभिचारः शिष्टाचारविषयत्वेनोपनयागादावव्याप्तेस्तेनाऽवगीतेति अवगीतत्वं च बलवदनिष्टाननुबंधित्वे

पक्ष... वत्तांसा

नश्येनादौ प्रवृत्त्युपयुक्तबलवदनिष्टाननुबंधीष्टसाधनत्वज्ञानस्य साध्याभावेपि न व्यभिचारः सिद्धेनुमितेन च मंगले फल
जिज्ञासायां विशेषतः फलजिज्ञासायां ननु कथं तर्हि गंगास्नानादीनामदृष्टार्थकत्वमित्यत आह संभवतीति तथा च
तत्र दृष्टासंभवे नादृष्टकल्पनेति भावः ननु तथापि विघ्नजिज्ञासायां स्वर्गएवादृष्टकल्पनामत आह उपस्थितत्वा
दिति आरब्धकर्मसु निर्विघ्नसमाप्त्यनामिति ग्रंथादौ प्रवृत्तपुरुषकामनाविषयत्वेन परिशेषानुमानेन च प्रवर्त
मानत्वेनोपस्थितत्वात् इत्यर्थः कल्पते अनुमीयते अनेन च मंगलस्य समाप्तिहेतुत्वेनानुमानमेव प्रमाणं न तु शिष्टा
चारानुमितश्रुतिरित्यानीमानुपूर्वीविशेषनिर्णयाभावेन तस्याबोधकत्वादिति सूचितं व्यापकत्वादि
त्वकारणताग्राहकप्रतिबंधकज्ञानविषयव्यतिरेकव्यभिचारमुद्धरति इत्थं चेति मंगलस्य समाप्तिफलकत्वे
चेत्यर्थः कारणताग्राहकसंदेहपर्यवसन्नस्य पूर्वोक्तव्यभिचारसंशयस्य कारणतानुमितावप्रतिबंधकत्वाद्व्य
भिचारनिर्णयस्य चाभावात् इति भावः नन्वेवमप्यन्वयव्यभिचारस्तावत्कारणताग्रहविरोधिभविष्यत्येवेत्या
शंक्यान्वयव्यभिचारं निरस्यति यत्र चेति तत्र कादंबर्यादौ बलवत्तरत्वेवेत्याह नन्वेवमपि कादंबर्यादौ कुतो
न विघ्नध्वंस इत्यत आह प्रचुरस्येति प्रचुरस्यैव मंगलस्य बलवत्तरविघ्ननिवारणे बलवत्तरत्वादिति विघ्न
निवारणे तेन प्रचुरस्यापि परिग्रहः ननु तथापि कादंबर्यादौ विघ्नध्वंसो माजायतां मंगलस्य हेतोः समाप्तिरित्या
शंक्याह विघ्नध्वंसस्यैवेति तथा च स्वजन्यविघ्नध्वंससंबंधेन मंगलाभावात् न समाप्तिरिति भावः आहुरित्यस्वर २

तत्रापि नाप्तिका
दिग्रंथेपि हेतत्र
मंगलं कल्प्य
ते अनुमीयते
कार्यरूपसमा
प्त्यतिरोधः=६

तथा च मङ्गलस्य विघ्नसमसंख्याकमङ्गलत्वेन नाशकतया न तत्र विघ्ननाश इति भावः अत्र च विघ्नसमसंख्या
कमङ्गलत्वेन हेतुत्वेऽधिकमङ्गलानां न संख्याक विघ्ननाशो न स्यादतः प्राचुर्यं वेत्यत्र वाकारोऽनास्था
यां बोध्यः=२

समाप्तिं प्रति स्वजन्यविघ्नध्वंसावच्छेदकत्व आश्रयतासंबंधेन =३

समाप्तिं प्रति

सोऽङ्गावनेन हीजं तु विघ्नध्वंसद्वारा मंगलस्य हेतुत्वं न संभवति नास्तिकग्रंथसमाप्तौ व्यभिचारात् न च स्वजन्यविघ्नध्वं
न्य सात्मकच्छेदकतासंबंधेन समाप्तिं प्रति स्वजन्यविघ्नध्वंसावच्छेदकतासंबंधेन मंगलस्यैव हेतुत्वात् स्वप्रतियोगिचर
मवर्णानुकूलकृतिमत्त्वसंबंधेन मंगलस्य हेतुत्वात् वा जन्मांतरीयमंगलकल्पनया न व्यभिचार इति वाच्यं त
थासति जन्मांतरीयसमाप्तिमुद्दिश्य जन्मांतरे मंगलकरणाय यत्नेरत्नः स्वप्रतियोगिचरमवर्णावच्छेदकतासंबं
धेन समाप्तिं प्रति स्वात्वावच्छेदकजातीयतासंबंधेन मंगलहेतुत्वस्य वाच्यतया नास्तिकशरीरे व्यभिचारस्य
दुर्वारत्वात् न च पुत्रकामाधिकरणविरोधः सहकार्यंतरसमवधाने न रोहि कपुत्राभावे यागस्याधिकपुत्ररूप
फलस्य तत्र सिद्धेरंतितत्त्वादिति वाच्यम् तत्र पुत्रमात्रकामनाश्रवणादिह तु विशिष्टशिष्टाचारानुमितश्रु
फल त्यारोहितकसमाप्तेरेव मंगलत्वात् न च स्वा(त्वा)वच्छेदकावच्छिन्नप्रतियोगिकत्व ह्याव्यवहितोत्तरत्वोत्पत्तिक
त्वोभयसंबंधेन मंगलजन्यविघ्नध्वंसविशिष्टसमाप्तित्वस्य मंगलकार्यतावच्छेदकत्वान्न व्यभिचार इति वा
च्यं कारणस्य कार्यतावच्छेदकत्वानुपगमात् अत एव काशीमरणान्मुक्तिरिति श्रुत्यंतर्गतपंचम्याः प्रयो
जकत्वपरत्वोपवर्णनं ग्रंथकृतां संगच्छते अन्यथा तत्रापि काशीमरणविशिष्टमुक्तिं प्रति काशीमरणहे
तुत्वस्य निर्दिष्टतया तत्पोपवर्णनमसंगतमेव स्यात् अथ तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽय

न

न्या·टी·
४

नायेति श्रुत्या तत्त्वज्ञानस्य मुक्तिसामान्यं प्रतिहेतुत्वं प्रतिपादितं तच्च काशीमरणस्य मुक्तिहेतुत्वेन संभवति
काशीमरणजन्यमुक्तौ तत्त्वज्ञानस्य व्यभिचारादतः काशीमरणस्य मुक्तिजनकत्वमपि तत्त्वज्ञान
द्वारा मुक्तिप्रयोजकत्वमेवेति निर्ग्रंथकृतां तत्रत्यपंचम्याः प्रयोजकत्वपरत्वोपवर्णनं ननु कारणस्याका
र्यतावच्छेदकत्वानतोपवर्णनमिति चेदस्तु कारणस्य कार्यतावच्छेदकत्वमस्तु च पूर्वरीत्या मंगलत्वस्य
विघ्नध्वंसविशिष्टसमाप्तित्वस्य कार्यतावच्छेदकत्वेन नास्तिकशरीरे व्यभिचारावारणम् एवमपि भोगादि
नाश्यविघ्नध्वंसपूर्वकसमाप्तौ क्लृप्तनियतपूर्ववर्तिताकेन ध्वंसेनैव मंगलस्थलीयसमाप्त्युपपत्तेर्मंगल
स्यान्यथासिद्धत्वं दुर्वारमेव नच व्यापारेणान्यथासिद्धिरिति वाच्यं यत्र व्यापारिणः प्रमाणबोधि
तकारणतानिर्वाहाय व्यापारस्य कारणत्वं कल्प्यते यथा यागस्य स्वर्गहेतुतानिर्वाहार्थमपूर्वं तत्रैव व्यापा
रेण व्यापारिणो नान्यथासिद्धिरतः काशीमरणस्य तत्त्वज्ञानेन मुक्तावन्यथासिद्धत्वात् प्रयोजकतापरतया
श्रुतिसमर्थनं संगच्छते च प्रतिबंधकाभावस्य कार्यमात्रे हेतुतया मंगलकारणतां विनापि क्लृप्ततया मं
गलस्यान्यथासिद्धत्वं दुष्परिहरमेवेति विघ्नध्वंसस्य द्वारत्वमिच्छतां प्राचां मतेपि विघ्नध्वंसस्य कार्यता
वच्छेदकतया विघ्नानिवर्तनामिति कामनया मंगलाचरणेन च विघ्नध्वंस एव फलमिति वदतां चिंतामणि ४

ग्राव्यापारि

प्रकृते

कृतांतमतमाह न व्याप्तिरिति विघ्नध्वंस एवेत्येवकारेण समाप्तिव्यवच्छेदः फलेप्रवृत्त्युद्देश्यं ननुसमाप्तिर्ह्यलौक
ह्मिकीस्यादित्यत आह समाप्तिरिति बुद्धिर्ज्ञानं प्रतिभानं हि शेषः स्फुरण्याख्यः प्रतिभादीनामादिना विघ्नसंसर्गाभावपरि
ग्रहः अनयैवरीत्या कारीरीस्थलेप्यवग्रहनिवृत्तिरेवफलम् वृष्टिस्तु सुकारणादेवेतिबोध्यं एवं मंगलस्य विघ्नध्वं
संप्रतिजनकत्वे सतः सिद्ध विघ्नविरहवत्वेति विघ्नात्यंताभाववता ननुनिष्फलेप्रवृत्तिरेव कथमत आह विघ्नशं
कयेति संशयनिश्चयसाधारणविघ्नज्ञानमेवतावर्जकमितिभावः तदाचरणात् मंगलाचरणात् ननुविघ्न-
संशये मंगलाचरणमेवासिद्धमित्यत आह तथैवेति शिष्टाचारादिति विषयतासंबंधेन मंगल इति शेषः ननुनि
विघ्नप्रचुरस्यानुष्ठितमंगलस्यापि नयव्यभिचारेण विघ्नध्वंसं प्रति मंगलस्य कारणतावाधिता तथाचवाधितार्थ
बोधकत्वादेतस्या प्राामाण्यमिति मीमांसकाः तेः कारणतावोधकत्वमे
नीकर्तुमाशंकां निरस्यति नचेति तस्यापि
प्रचुरस्यानुष्ठितमंगलस्यत
बोधके ॥

विनायकस्तवस्य मङ्गलत्वेपि तदनुक्तं लक्षणाभिधानरूपस्य
तत्पाठस्य मंगलत्वाभावात् नैव पाठकत्वसंबंधेन

तिमंगलविघ्नध्वंसयोः कार्यकारणभावबोधकेत्यर्थः सतिविघ्नइति तथाचोपदर्शितस्थलेप्रतियोगित्वप्रकारणभावेनविघ्न
ध्वंसत्वयकार्यानुदयोपपत्तौकारणतायाअवाधितत्वेननकारणताबोधकवेदाप्रामाण्यमितिभावः अतएवनाशंप्रतिप्रतियो
गिनःकारणत्वादेव तद्बोधकवेदाप्रामाण्यमितिप्रायश्चित्तस्यपापनाशकत्वबोधकवेदाप्रामाण्यमित्यर्थः ननुमंगलेन
विघ्नध्वंसेकारणेविनायकस्तवपाठादिजन्यविघ्नध्वंसेव्यभिचारात् विनायकस्तवविघ्ननाशकःसमंगलमेवेतिनव्य
भिचारइतिवाच्यं सर्वेषुविघ्नाःशमंयांतिगणेशस्तवपाठतइत्यादिनातत्पाठस्यापिविघ्ननाशकत्वबोधनात्प्रायश्चित्तजन्य
विघ्नध्वंसेव्यभिचारस्त्वेत्यतआह मंगलेचेति स्तवपाठादित्यादिनाप्रायश्चित्तादिसंग्रहः तथाचमंगलस्याव्यवहितोत्त
रक्षणोत्पत्तिकत्वसंबंधेनमंगलविशिष्टविघ्नध्वंसत्वेविजातीयविघ्नध्वंसत्वेवाकार्यतावच्छेदकं एवंविनायकस्तवपाठा
देरुपदर्शितसंबंधेनविनायकस्तवपाठादिविशिष्टविघ्नध्वंसत्वेविजातीयविघ्नध्वंसत्वेवाकार्यतावच्छेदकमितिनव्यभि
चारइतिभावः ननुविघ्नध्वंसएवयदिमंगलस्यफलंतदासमाप्तिकामस्यमंगलेप्रवृत्तिर्नस्यात् ततःसमाप्तिसाधनविघ्नध्वं
ससाधनत्वान्मंगलेप्रवृत्तिर्वाच्यानत्वनसंभवतिस्वतः सिद्धविघ्नविरहस्थलेव्यभिचारेणविघ्नध्वंसस्यसमाप्तिसाधन
ताभावादित्याशंकांनिरस्यति क्वचिदिति प्रतिबंधकेतिसंसर्गाभावस्यसंसर्गाभावत्वेनसंसर्गाभावस्यतथाचविघ्नसं
सर्गाभावत्वेनहेतुत्वान्नपूर्वोक्तव्यभिचारइतिभावः अत्रचनतुतद्विघ्नाभावत्वेनहेतुतानतुविघ्नाभावत्वेनहेतुतानतु ५

कूट

विघ्नाभावकूटत्वेन विघ्नप्रागभावादीनामेकत्रासंभवेन समाप्तिर्न स्यादिति विरोधः यत्र च मंगलं विनापि समाप्तिस्तत्र वि-
घ्नध्वंसाभाववति समाप्तेर्दर्शनाद्व्यतिरेकव्यभिचारमाशंक्य निषेधयति इत्थं चेति दुरितध्वंसकल्पने तत्स्नानकीर्त्तन
मंगलकल्पने गौरवादाह स्वतःसिद्धेति यत्र च मंगले सत्यपि न समाप्तिस्तत्र मंगलाद्विघ्नध्वंसो भवत्येव समाप्त्यभाव
स्तु विघ्नभूयस्त्वान्मंगलानां न्यूनत्वाद्विघ्नाद्वेत्यवधेयं अथ समाप्तिविघ्नध्वंसयोराकाशात्मनिष्ठयोः कथं का
र्यकारणभाव इति चेदुच्यते स्वप्रतियोगिप्रयोजकत्वसंबंधेन चरमवर्णध्वंसः समाप्तिं प्रति विशिष्य कारणतासंबंधेन
विघ्नसंसर्गाभावत्वेन हेतुतामिति वस्तुतस्तु प्राक्तुविन्यस्तेन सूचितामन्यथासिद्धिं प्रकटयति क्वचिच्चेति विघ्नात्यन्ता
भावस्यैवेत्येव कारणेन विघ्नध्वंसस्य तद्द्वारं मंगलस्य च व्यवच्छेदः समाप्तिसाधने समाप्त्यव्यवहितत्वेन सर्ववर्त्तितया निश्चितः
तथा चैतेनैव मंगलस्थलीयसमाप्तिनिर्वाहे मंगलस्य तज्जन्यविघ्नध्वंसस्य चान्यथासिद्धिः ध्वंसप्रागभावयोरत्यन्ताभावे
नैवावरोधमानाभावात् ध्वंसस्यात्यन्ताभावस्य नास्तीति भावः ननु न्योन्याभावभिन्नाभावत्वेनैव लाघवाद्धेतुतास्त्वत आह प्र
तिबंधकसंसर्गेति प्रतिबंधकत्वेपि संबंधान्तरावच्छिन्नाभावस्य सत्वात्कार्योत्पत्तिवारणाय तत्तत्संसर्गावच्छिन्नप्रति
योगिताकाभावत्वेनैव हेतुत्वस्य वाच्यत्वेन न ध्वंसस्य हेतुता तत्संसर्गावच्छिन्नत्वे मानाभावादिति भावः दुरितध्वंसः
दुरितध्वंससामग्रीप्रयुक्तः स्वतःसिद्धो दुरितकारणाभावप्रयुक्तः एतेन विघ्नध्वंसस्य तदत्यन्ताभावस्य वा समाप्तिहेतुता

सह्य

अतीतानागत

मु॰ टी॰ ६

6

विचारस्यं प्रकृतत्वेनानवस्थापनेप्रकृतानुपयोगः एवंप्रतिबंधकभावकूटस्यहेतुत्वेप्रागभावध्वंसयोर्युगपदवस्थानासं
भवेनैकदाकूटद्वयप्रसिद्धिः सर्वान्तरीयत्वावच्छिन्नप्रतियोगिताकत्वस्यप्रतिबंधकाभावविशेषणत्वेनध्वंसप्राग
भावयोरसंग्रहः स्वोत्पादिरूपेणनिनिवश्यमानास्वाधिकरणीयाप्रतिबंधकाभावविशेषणत्वेनध्वंसप्रागभावयोरसंग्रहश्च
त्पादिरूपेणनिनिरस्यमानाधिकरणीयाप्रतिबंधकात्यन्ताभावस्यैवकार्यमात्रेहेतुत्वादिति इतिमंगलवादः नूतनेति नूत
नःस्वात्मीयोजलधरोमेघस्तस्यरुचिरिव रुचिर्दीप्तिर्यस्यतस्मै एतेनयथानूतनजलधरः अभिलषितंफलंददात्येवमी
श्वरोपि नमस्कार्यस्यभगवतःसंस्तुत्यतोपचयितुमाह गोपवधूटीति गोपानांवधूट्योगोप्यस्तासांदुकूलंवस्त्रंतस्य
चौरायतस्मैइतिनत्कृष्टः सामान्यतःसकलजनप्रसिद्धत्वसूचनायश्रीकृष्णायेत्यनभिधानेनभगवतोनमस्कारप्रकारीभूः
तायकर्षावधित्वमुक्तं तेनभगवतिमानाभावान्नसंभवतीत्याशंकाविनेयायिकाभिमतेश्वरसाधकानुमानसूचनायत
द्वेवसंसारमहीरुहस्यबीजायेत्युक्तं संसारेति तत्रसंसारस्यमहीरुह इतिषष्ठीतत्पुरुषभ्रमंव्यावर्तयितुंकर्मधारयमा
ह मुक्तावल्यां संसारएवेति बीजत्वंसमवायिकारणत्वेनतत्वेश्वरेबाधितमतमाह निमित्तेति ननीश्वरनमस्कारस्य
मंगलाचरणमयुक्तं ईश्वरेमानाभावात् तथाहि नहितत्रप्रत्यक्षंप्रमाणमरूपित्वाद्द्रव्यत्वेनबाह्यप्रत्यक्षाविषय
त्वात् नापिमानसंपरात्मनः परेणमनसाप्रत्यक्षत्ववारणायस्वात्मव्याहृतविजातीयमनःसंयोगत्वेनहेतुत्वस्यावश्य ६

परा

दीप्तिः प्रकाश
थायमपि (?)

वाच्यतयाईश्वरेतस्याभावात् न च याग्यगमीजनयत्वित्यादिश्रुतिरेवप्रमाणं श्रुतीनामीश्वरोचरितत्वेनैवप्रमाण्यादी
श्वरसिद्धेःश्रुतिप्रामाण्यस्यापिसिद्धेरित्यन्यो[illegible]दतआह घटेनेति प्रमाणान्तरमनुमानरूपंप्रमाणं तथाहिक्ष्यंकुरादिकमपी
ति ननु च किंपक्षतावच्छेदकं न तावत् क्षितित्वं अंकुरादेरपिक्षितित्वेन पृथक्कृतस्योपादानेवैयर्थ्यात् किंचक्षितित्वसामा
नाधिकरण्येनसाध्यासिद्धेःदृष्टान्तेचं घटादावंशतः सिद्धसाधनंनच्छेदेनतथात्वेप्रमाणाबाधः जन्यक्षि
स्य तित्वंपक्षतावच्छेदकं तेपरमाणुजन्यपदव्यावर्त्याप्रसिद्धिः स्यान्मतेःजन्यक्षितेरभावंतज्जन्यत्वस्यैवतथात्वेसंभवेनपक्ष
तावच्छेदककोटौक्षितित्वस्यव्यर्थत्वात्नचैवंदरिसंभवतिपक्षतावच्छेदकहेतोर्वैयर्थ्यंगादितिचेन्नस्वरूपसंबं
पक्षतावच्छेदकत्वात् धविशेषरूपकार्यत्वस्यैवहेतुत्वेन तयोरैक्याभावात्साध्ये च न स्वोपादानगोचरज्ञानचिकीर्षाकृतिजन्यत्वेकार्यमा परोक्ष
प्रागभावप्रतियोगित्वरूप त्रेप्रतिकृतेरेवान्वयव्यतिरेकाभ्यांहेतुत्वेन तज्जनकज्ञानचिकीर्षयोस्तुज्ञान्यथासिद्धत्वेनतद्भिन्नयज्जन्यत्वरूप
कार्यत्वस्यैव ६ साध्यस्यतत्रबाधात्दृष्टान्तपक्षसाधारण्यस्यतत्स्याभावेनतत्रतदुपादानगोचरेत्यादिसाध्यस्यसंभवात्
कृतित्वापेक्षयोपादानगोचरकृतित्वस्यगौरवेणकार्यजनकतावच्छेदकत्वात् किंतुविशेष्यतासंबंधावच्छिन्न
कृतित्वावच्छिन्नकारणतानिरूपित समवायसंबंधावच्छिन्नकार्यत्वेनेनादृष्टद्वारासमवायिकृतिजन्यत्वस्य
ज्ञेयत्वेऽपिनसिद्धसाधनंयदिचकार्यमात्रेकृतित्वेनैवान्वयव्यतिरेकाभ्यांज्ञानत्वेनेच्छात्वेनचहेतुत्वंस्वीक्रियतेतदा

रूपावच्छेदका

स॰
टी॰

तादृशयत्नानजन्यत्वंसिद्ध्याजन्यत्वंकृतिजन्यत्वेवासाध्यमस्तु यत्तु कार्यजन्यत्वमेवसाध्यमितितन्न कार्यमात्रेकर्तृत्वेनजनकत्वे
मानाभावाद्धाच्चवाकृतित्वेनैवतत्रहेतुत्वात् ननु कार्य्यविशेषतासंबंधावच्छिन्नकृतिनिष्ठजनकतानिरूपितसमवाय
संबंधावच्छिन्नजन्यताशालिप्रागभावप्रतियोगित्वादित्यनुमानेफलितेतत्रच ध्वंसेपक्षतावच्छेदकजन्यत्वाक्रांते
विशेष्यतासंबंधावच्छिन्नकृतिनिष्ठजनकतानिरूपितसमवायसंबंधावच्छिन्नजन्यत्वरूपसाध्यस्याभावाद्बाध इति
त्व चेन्न सत्वविशिष्टजन्यस्यैवध्वंसव्यावृत्तस्यपक्षतावच्छेदकत्वोपगमात् नचहेत्वधिकरणेध्वंसेऽत्र साध्याभावेन
व्यभिचारइतिवाच्यं सत्ववैशिष्ट्यस्यहेतौविशेषणात् तथैवंरीत्याव्यभिचारवारणेपि प्रध्वंसस्यकृतिजन्यत्वेनका मानाभावेष्ट
र्य्यमात्रस्यकृतिजन्यत्वप्रवादोव्याहन्येतेतिचेन्न तादृशप्रवादस्यनिर्युक्तिकत्वेनाश्रद्धेयत्वात् यद्वाजन्यत्वमात्रंध्वं
ससाधारणमेवपक्षतावच्छेदकंकृतिजन्यत्वमात्रंसाध्यंएवंचहेतावपिसत्ववैशिष्ट्यंनोपदेयंप्रयोजनाभावात् एवं
र्य ध्वंसेपीश्वरीयकृतिजन्यत्वस्यानिराबाधतयाकार्य्यमात्रेकृतिजन्यत्वप्रवादोप्युपपद्यतइति नचकृतिजन्यत्वमात्र
स्यसाध्यत्वेदृष्टद्वाराद्विगाहिगोचरास्मदीयकृतिजन्यत्वमादायसिद्धसाधनमितिवाच्यं अदृष्टाद्वारकत्वेनकृतिजन्य
तायाविशेषणीयत्वादितिदिक् यत्तादृशानुमितौलाघवज्ञानसहकारेण ज्ञानेच्छाकृतिषुनित्यत्वमेकत्वंचभासते
इतिनित्यैकत्वसिद्धिः अथेश्वरज्ञानादौकीदृशमेकत्वमनुमित्याविषयीक्रियतेननावत्संख्यारूपगुणोगुणानंगीका

भानामंर

दात् न च नित्यज्ञानवत्त्विरूपमेदप्रतियोगितानवच्छेदकत्वद्वयमेकत्वेन तद्विषय इति वाच्यं ईदृशैकत्वस्य नित्यज्ञानानुमितेः प्रा
ग गनुपस्थितत्वेन तादृशानुमितौ भानादिति चेदत्र केचित् समानाधिकरण्यसंबंधेन ज्ञानादावाश्रयगतमेकत्वमनुमि
तौ भासते यद्वा द्वित्वसमानाधिकरणत्वद्वयमेकत्वेन तद्विषयः न च जीवेश्वरगतद्वित्वसमानाधिकरण्यस्येश्वरज्ञाने
सत्त्वाद्बाध इति वाच्यं दुःखवदवृत्तित्वेन द्वित्वस्य विशेषणीयत्वात् न चैवमपि चैत्रेश्वरगतद्वित्वसमानाधिकरण्यस्यापि त्र
सत्त्वाद्बाध इति वाच्यं आत्मानात्मवृत्तिभिन्नत्वेनापि द्वित्वस्य विशेषणीयत्वादित्याहुः तन्न ईश्वरेतरज्ञानद्वयांशीकारेऽप्येता
दृशैकत्वभानानिर्वाहेणोद्देश्यासिद्धेः वस्तुतस्तु स्वाधिकरणवृत्तिस्वभिन्नज्ञानकत्वमेवैकत्वं एवमीश्वरेच्छाकृत्यो
रपि द्रष्टव्यं एवं च तादृशज्ञानादिसिद्धौ तत्र गुणत्वेन हेतुना द्रव्याश्रितत्वे साधनीये द्रव्यांतरस्य बाधादीश्वरसिद्धि
रिति द्रष्टव्यं अप्रयोजकत्वादिति अनुकूलतर्काभावादिति भावः इदमुपलक्षणं शरीराजन्यत्वहेतौ शरीरस्य वि
शेषणस्यासिद्धिवारकस्यापि व्यभिचारावारकत्वेन व्यर्थतया तद्विशेषणावच्छेदेन व्याप्तिग्रहासंभवेन व्याप्यत्वासि
द्धिरप्यपि द्रष्टव्यं न च व्यर्थविशेषणत्वस्याधिकोन्नानिग्रहस्थानत्वेपि तज्ज्ञास्य व्याप्तिज्ञानप्रतिबंधकत्वे मानाभा न
व इति वाच्यं तथापि गुरुधर्मस्यानवच्छेदकतया साध्यसंबंधितावच्छेदकतया साध्यसंबंधितावच्छेदकरूपव्याप्यत्वा
ग्राभात् व्याप्यत्वासिद्धेर्दुर्वारत्वादिति तदुक्तमाचार्यैः एकामसिद्धिं परिहरतो द्वितीयापततीति कर्तृत्वेन कार्यत्वेन का
वे तो

मु॰ टी॰ ८

ला

र्यकारणभावेति नचान्वयव्यतिरेकाभ्यां घटत्वावच्छिन्नं प्रति कुलालादिकृतित्वादिनैव हेतुत्वादेतादृशकार्यकारणभावे

मानाभाव इति वाच्यं घटत्वपटत्वादिभेदेनानन्तकार्यकारणभावकल्पनापेक्षया कार्यत्वावच्छिन्नं प्रति कृतित्वेन

हेतुत्वकल्पने लाघवौचित्यात् यद्विशेषयोरिति न्यायेन कृतित्वाभ्यां सामान्यकार्यकारणभावस्यावश्यकत्वात् कार्यत्वाव

नच तादृशन्यायो निष्प्रामाणिक इति वाच्यं कार्यत्वावच्छिन्नावाचित्वेन तत्कृत्यभावकूटस्य प्रयोजकत्वकल्पने गौर मा

वात् कृतित्वावच्छिन्नाभावस्य प्रयोजकत्वकल्पने लाघवादिति केचित् तन्मात्रस्तु कार्यत्वं कृतेः कार्यतावच्छेदकं तथा

पि घटत्वावच्छिन्नं प्रति कृतेः कारणतया सर्गाद्यकालीनघटादिकं पक्षीकृत्य घटत्वादिहेतुना सकर्तृकत्व

साधने जीवानां बाधादीश्वरसिद्धिरित्याहुः दीधितिकृतस्तु कार्यत्वावच्छिन्नं प्रति कृतेर्हेतुत्वावे घटत्वावच्छिन्नं प्र भा

तिकृतेर्हेतुतया खण्डघटोत्पत्तेः पूर्वं कृतेरावश्यकतया तदाश्रयत्वेनेश्वरसिद्धिमाहुः नन्वेवं वीणाघटादिकुला

लादिचेष्टयोरन्वयव्यतिरेकाभ्यां कार्यत्वावच्छिन्नं प्रति चेष्टादित्वाहेतुत्वादङ्कुराद्युत्पत्तेः पूर्वं चेष्टानुरोधे त्वा

नेश्वरस्यानित्यशरीरमपि सिध्येदिति चेन्न तादृशान्वयव्यतिरेकाभ्यां कार्यत्वावच्छिन्नं प्रति क्रियात्वेनैव हेतुतानत्र

चेष्टात्वेन हेतुत्वे मानाभावात् आचार्यमतानुयायिनस्तु अस्तु चेष्टा[illegible]त्वेन तत्र हेतुत्वे अस्तु च तदनुरोधेन

श्वरस्य नित्यशरीरं तथापि नेश्वरस्यानित्यशरीरसिद्धिः परमाणूनामेव कूशरीरत्वोपगमात् एवं चेश्वरकृतिजन्यचे ८

त्ते त

वृद्धिः परमाणुरूपशरीरैरेव तत्तत्कार्याणामुत्पत्तिः परमाणुक्रियायां चेष्टात्वरूपवैजात्यांगीकारात् शरीरलक्षणेना
वयविनस्थानिवेशाच्च न परमाणूनां शरीरत्वानुपपत्तिः न च नानापरमाणूनां शरीरत्वकल्पने गौरवाल्लघुत्वाद
स्यानित्वेन शरीरसिद्धिरिति वाच्यं तच्छरीरस्य महत्त्वे अभग्नस्य तस्य पाषाणादौ प्रवेशासंभवेन तथा पाषाणान्तर्वर्तिभेक
शरीरोत्पादकत्वानुपपत्तेः अणुत्वे च ह्रस्वस्य कार्योत्पादकत्वानुपपत्तेरित्यलं पल्लवेनेति यत्तु सर्वज्ञस्थापनानुमाने
शरीरजन्यत्वमुपाधिस्तस्य च घटादौ साध्यव्यापकत्वादंकुरादौ साधनाव्यापकत्वाच्च न चांकुरादौ सकर्तृकत्वरूप
साध्यसंदेहेनोपाधेः साध्यव्यापकत्वस्य निश्चयान्नोपाधित्वनिश्चय इति वाच्यं तथापि संदिग्धोपाधित्वस्य दुर्वार
त्वात् न चैतादृशोपाधिसंदेहाद्धेतौ व्यभिचारसंदेहः पक्षीयव्यभिचारसंदेह एव स च न प्रतिबंधक इति वाच्यं य
त्तत्त्वमयोर्व्यभिचारसंशयस्यापि प्रतिबंधकत्वात् अत एवानुकूलतर्कविरहदशायां पक्षेतरत्वे संदिग्धोपाधि
ते त्वाभिधानं ग्रंथकृतां संगच्छते इति तत्र कार्यत्वेन कृतिमत्त्वेन कार्यकारणभावरूपस्यानुकूलतर्कस्य सत्त्वेन कार्य
त्वरूपहेतोः साध्यव्याप्यत्वनिश्चयेन साध्यव्यापकत्वेनोपाधेरिति एवं चोक्तानुमानेनेश्वरसिद्धौ तद्वचनत्वे साध्याव्यापक
न वेदस्य प्रामाण्यनिश्चयाद्वेदोऽपीश्वरे प्रमाणमित्याह द्यावाभूमी इति इत्यादय इत्यर्थः आदिपदेनेश्वरमुपासीत यः त्वे निश्चया
सर्वज्ञः स सर्वविद्यस्य ज्ञानमयं तपः सोऽकामयत इत्यादीनां परिग्रहः कार्यपक्षकानुमानं चोपलक्षणं स्वर्गायकाली

पद्धिपतनाभाववान्

मु. सि. ९ ८ वा

न द्व्यणुकप्रयोजकं कर्म प्रयत्नजन्यं कर्मत्वात् गुरुत्ववतां पतनाभावः पतनप्रतिबन्धकप्रयत्नप्रयुक्तः धृतित्वात् ब्रह्माण्ड
नाशः प्रयत्नजन्यः नाशत्वात् पटादिवत् व्यवहाराः स्वतन्त्रपुरुषप्रयोज्याः व्यवहारत्वात् आधुनिककल्पितलिप्यादिव्यव
हारवत् वेदजन्यप्रमा वक्तृयथार्थवाक्यार्थज्ञानजन्या शाब्दप्रमात्वात् वेदोसंसारिपुरुषप्रणीतो वेदत्वादिदं पौ
रुषेयो वाक्यत्वात् द्व्यणुकपरिमाणजनिका संख्या संख्यात्वादित्यनुमानान्तराण्यपि सामान्यपरतया ईश्वरसाधकानि
बोध्यानीति तदुक्तं कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्य
य इति आयोजनं कर्म यद्यते गम्यते तेनेति यद्व्यवहार इति संक्षेपः मूले शिष्यावधानाय प्रतिजानीते द्रव्यं
गुणा इति निरूप्यन्त इति शेषः संयोगापेक्षया कर्मणोतिरिक्तत्वं नास्तीति भूषणमतं निराकर्त्तुं तथेत्युक्तं
यथा गुणः पृथक्पदार्थस्तथा कर्मापीत्यर्थः अभावोधिकरणात्मक एवेति प्राभाकरमतं दूषयितुं पुनस्त
थेत्युक्तं युक्तिश्चाग्रे वक्ष्यते यद्यपि विभागवाक्यस्य न्यूनाधिकसंख्याव्यवच्छेदकत्वेव समस्तसंख्या लब्धा तथा
पि समग्रग्रहणं स्पष्टार्थं ननु अन्ये पदार्थाः कुतो नोक्ता इत्यत आह कीर्तिता इति तथा चैतेभ्योन्ये पदार्था न सन्त्ये
व कणादप्रभृतिभिरनुक्तत्वादिति भावः ननु तर्हि षड्ग्रन्थे षट्पदार्था निरूपिताः सप्तमस्तु भाव इति नि
रूपितं तत्कथं वा ज्ञापितं तेन निरूपितमित्याशंक्याह मुक्तालपा(?) सप्तमस्येति अत्र समवाये कार्यसमवायांस्य(?)

अपेक्षाबुद्धिजन्यास्त्वा[illegible]
त्वान्यसंख्या

मीपार ९

त्वे स
तत्संबंधेन सत्तावत्वे भाववत्वे न द्रव्यो भावो भावत्वे इति प्रार्थे अर्थान्ग्रामं तेन ग्रामत्वेन रूपगुणवत्वाम् इति भाववत्वेनोपन्यासः इत्यर्थः नो
ग्रामिति शेषः ननु न्येपि पदार्थाः कथं न संति न्यायग्रंथेषु षोडशपदार्थनिरूपणादित्याशंक्य नैयायिकानामपि मते सप्तपद
र्था इत्यविरुद्धं षोडशपदार्थानां सप्तपदार्थेष्वेवांतर्भूतत्वादित्याह एते चेति उक्तेऽर्थे भाष्यसंमतिमाह प्रतिपादितं चेति एव
मेवेति द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तैव पदार्थाः षोडशानामत्रैवांतर्भावादिति प्रतिपादितमित्य
र्थः कथमेतदंतर्भाव इति चेदित्थं प्रमाणस्येंद्रियस्य द्रव्ये व्याप्तिज्ञानादेर्गुणे प्रमेयस्यात्मशरीरेंद्रियस्वरूपस्य द्रव्ये अर्थ
स्य गंधरसरूपस्पर्शशब्दस्वरूपस्य गुणे बुद्धेर्गुणे मनसो द्रव्ये प्रवृत्तेर्गुणे दोषाणामिच्छाद्वेषमिथ्याज्ञानस्वरूपाणां
रागद्वेषमोहपदप्रतिपाद्यानां गुणे प्रेत्य मृत्वा भावो जननमिति व्युत्पत्त्या मरणोत्तरजन्मत्वं प्रेत्यभावपदप्रवृत्तिनिमि
त्तं चरमप्राणशरीरसंयोगध्वंसो मरणं आद्यः शरीरप्राणसंयोगो जन्म तथा च मरणोत्तरताद्दृशसंयोगरूपस्य त
स्य गुणे सुखदुःखसंवेदनरूपस्य मुख्यफलस्य गुणे सुखदुःखसंवेदनरूपस्य मुख्यफलस्य गुणे गौणमुख्यसाधारण
ज स्य मात्रस्वरूपफलस्यापि द्रव्यादिषु पीडालक्षणस्य दुःखस्य गुणेंऽतर्भावः अपवर्गस्तु आत्यंतिकी दुःखनिवृत्तिः दुः
खानि च शरीरं षडिंद्रियाणि षड्विषयाः सुखं दुःखं चेत्येकविंशतिः तत्र दुःखत्वजातिमत्त्वे शरीरादौ दुःखसंबंधितया
गौणं दुःखत्वं स्वर्गादिसुखस्यापि नश्वरत्वज्ञाने दुःखसंबंधित्वमव्याहतमेव नचैकविंशतिदुःखान्तर्गतयोर्मनःश्रव

षड्द्रव्य २

म॰ टी॰ १॰

णयोर्निमित्ताकथं तज्ज्ञानाशः इति वाच्यं यद्रूपविशिष्टस्य श्रवणस्य ज्ञानद्वारा दुःखहेतुता या दुःखत्वेन तद्रूपस्य कर्णशष्कुल्याना
शेन विशिष्टश्रवणेंद्रियत्वरूपदुःखनाशात् एवमात्ममनःसंयोगत्वरूपव्यापारविशिष्टस्यैव मनसो ज्ञानद्वारा दुःखत्वरूपतया
व्यापारनाशेन न हि विशिष्टमनोरूपदुःखनाशो भवदिति दुःखनिवृत्ता वा स्यादिति किंच स्वसमानाधिकरणदुःखासमान
कालीनत्वं न चैतद्दुःखध्वंसस्य मुक्तित्वे कथं तत्त्वज्ञानसाध्यत्वं तत्त्वस्येति चेदित्थं तत्त्वज्ञानेन मिथ्याज्ञानजन्यवासनाना
शः वासनानाशेन दोषस्य वासनाविशिष्टरागादेरभावः विशेषणाभावे विशिष्टाभावात् तादृशरागत्वरूपहेत्वभावेन
प्रवृत्तेर्धर्माधर्मरूपाया अभावोऽनुत्पत्तिः तदनुत्पादे प्रारब्धकर्माधीनात्सदेहस्यैव धरूपजन्माभावः भोगेन तत्त्वज्ञानाभ्यां
प्रारब्धनाशेन सञ्चितकर्मणो निवृत्तिरिति जन्माभावे दुःखानुत्पादः तथा च समानाधिकरणदुःखासमानकालीनत्वरूपवि
शेषणांशे तत्त्वज्ञानस्य प्रयोजकत्वात् मुक्तेस्तत्त्वज्ञानसाध्यत्वं तथा च सूत्रे दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरो
त्तरापाये तदनन्तराभावादपवर्ग इति अस्यार्थः पठितेषु जन्मादिषु मध्ये उत्तरोत्तराणामपाये तदनन्तराभावात् तस्याव
हितपूर्वाभावात् तथा च तत्त्वज्ञानेन मिथ्याज्ञानस्य नाशस्तेन दोषाणां नाशस्तेन प्रवृत्तेरनुत्पादस्तेन जन्मानुत्पाद
स्तेन दुःखानुत्पाद इति पूर्वोक्तरूपवाक्यार्थः पर्यवसितः एकविंशतिदुःखनाशस्तु स्वकारणसाध्यो न तु तत्त्वज्ञानस्य प्रयो
जकत्वमिति वदन्ति नव्यास्तु योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरवृत्तिगुणानां कारणत्वात्स्वोत्तरोत्पन्नगुणेनैव दुःख १०

ध्वंसरूपमुक्तिं प्रमेयं वेत्ति तत्तत्त्वज्ञानापेक्षेति दुःखपदेन दुःखसाधनत्वविवक्षयाऽपत्याख्योपपंडरितस्य च योगरूपगुणत्वभावान्न
हेत्वन्तरविनिर्गमणानापद्यतेति तन्नाशरूपमुक्तेस्तत्त्वज्ञानसाध्यत्वमेवेत्याहुः तथा चैतादृशापवर्गस्याभावे संशयस्य गुणे
साधनतयेच्छाविषयत्वरूपप्रयोजनस्य यथायथं द्रव्यादिषु साध्यसाधनेऽभवतानि स्वविषयत्वरूपस्य दृष्टान्तस्य यथायथं
द्रव्यादिषु तत्तच्छास्त्रसिद्धार्थरूपस्य सिद्धान्तस्य द्रव्यादिषु शब्दस्वरूपप्रतिज्ञाद्युक्तमनुमानामवयवानां गुणे व्या
पारोपेणाव्यापकारोपस्य तर्कस्य गुणे निर्णयस्य गुणे तत्त्वबुभुत्सोः कथारूपवितण्डाया गुणे विजिगीषुकथारूपस्य
जल्पस्य गुणे स्वपक्षस्थापनाहीनकथारूपवितण्डाया गुणे अनुमितिनिमित्तकारणज्ञानान्यतरप्रतिबन्धकज्ञानविषय
पश्चं रूपाणां हेत्वाभासानां यथायथं द्रव्यादिषु अभिप्रायान्तरेण प्रयुक्तस्य शब्दस्यार्थान्तरं परिकल्प्य दूषणाभिधानरूपस्य
छलस्य गुणे असदुत्तररूपतेर्जातेर्गुणे पराजयहेतुत्वरूपनिग्रहस्थानानां यथायथं द्रव्यादिष्वन्तर्भावः निग्रहस्थानानि
प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकम
प्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमविज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्या
नुयोगोऽपसिद्धान्तो हेत्वाभासाश्च अत्र चकारेणानुक्तसमुच्चयार्थेन दृष्टान्ते साधनवैकल्यादीनां परिग्रहः तत्र वि
शिष्यप्रतिज्ञातस्यापत्तादेः परित्यागरूपस्य प्रतिज्ञान्तरस्य गुणे सोऽयं साध्यादिविरुद्धहेत्वादिकथनरूपप्रतिज्ञाविरो

प्रतिज्ञाहानेरभावे परोक्तदोषोद्धारे धियासर्वान्तर्विशेषेण निर्दिष्टतया प्रतिज्ञातार्थकथनरूपप्रतिज्ञान्तरस्य गुणे

स॰ टी॰
२१

धस्य गुणो हेत्वाक्षसाध्यादेः परेण दूषणोक्ते तत्साध्याय त्यागरूपप्रतिज्ञासंन्यासस्याभावे परोक्तदूषणोद्दिधीर्षया पूर्वोक्त
हेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्टकथनरूपहेत्वन्तरस्य गुणो प्रकृतानानाकांक्षितानाभिधानरूपा
र्थान्तरस्य गुणो अवाचकपदप्रयोगरूपनिरर्थकस्य गुणो परिषत्प्रतिवादिबोधानुकूलायाः शक्तेर्जनकवाचक
वाक्यप्रयोगरूपाविज्ञातार्थस्य गुणो अभिमतकार्यबोधानुकूलाकांक्षाभावपदरूपस्यापार्थकस्य गुणो सम
यनिबन्धविषयीभूतकथाक्रमविपरीतक्रमेणाभिधानरूपस्याप्राप्तकालस्य गुणो यत्किंचिदवयवशून्यावयवा
भिधानरूपस्य न्यूनस्य गुणो अधिकहेत्वाद्यभिधानरूपस्याधिकस्य गुणो पुनरभिधानरूपस्य पुनरुक्तस्य गुणो प्रति
षदा त्रिरभिहितस्याप्रत्युच्चारणरूपस्याननुभाषणस्याभावे परिषदा विज्ञातार्थस्य वा त्रिभिरहितस्याप्यविज्ञा
नरूपस्याभावे उत्तरार्हं परोक्तं बुद्ध्वापि उत्तरस्याप्रतिपत्तिरूपाया अप्रतिभाया अभावे अहं भवत्कालान्तरककार्यव्या
संगमुद्भाव्य कथाविच्छेदरूपस्य विक्षेपस्याभावे स्वपक्षे दोषमनुद्धृत्य परपक्षे दोषाभिधानरूपमतानुज्ञायाः गुणो नि
ग्रहस्थाने प्राप्तवतो निग्रहस्थानाननुद्भावनरूपस्य पर्यनुयोज्योपेक्षणस्याभावे निग्रहस्थानानवसरे तन्निग्रहस्था
नाभिधानरूपस्य निरनुयोज्यानुयोगस्य गुणो कथायां स्वीकृतसिद्धान्तप्रच्यावनरूपस्यापसिद्धान्तस्याभावे हेत्वाभा
सानां पूर्वोक्तलक्षणानां दुष्टत्वादिष्वन्तर्भाव इति इत्यन्तर्भावः पदार्थेषु भाष्यस्यार्थस्व माशंक्य मणिकृतां सम्मतिमा २१

ह एतच्चेति मण्यादिसमवधाने सति वह्निनाशाद्दाहोत्पत्तिवारणाय मण्यादेः कारणविघटकत्वरूपा प्रतिबंधकता वाच्या सा
च वह्निनिष्ठदाहानुकूलशक्तिरूपकारणविघटकतयैव निर्वहतीति मण्यादिप्रतिबंधकतान्यथानुपपत्त्या सिद्धायाः शक्तेः
घटभावेष्वनेनतर्भूतत्वादतिरिक्तपदार्थत्वमिति पदार्थाः सप्तकीर्तिताइतिमूलमयुक्तमित्यभिप्रायेण प्रभाकरः शंकते
नन्विति अतिरिक्तेति क्लृप्तपदार्थातिरिक्तेत्यर्थः अतिरिक्तपदार्थतामेव व्यवस्थापयति तथाहीत्यादिना मण्यादीना
दिनामंत्रौषधादिपरिग्रहः समवहितेन समीपवर्तिना ननुवह्निरूपकारणाभावादेव न दाह इति न मण्यादेः प्रति
बंधकत्वमतः समवहितेन वह्निनेति दाहोत्पत्त्यंतरोत्पत्तिः एवं स्वरूपपराहतिर्वो मण्याद्यतिरिक्तं प्रतिबंधकत्वं खंडयति २५
तच्छून्येनेति मणिसमवधानशून्येनेत्यर्थः ननु वह्नौ यदि दाहानुकूला शक्तिस्तदा मण्यादिसत्त्वे कुतो न दाह इत्यत्रा
ह तत्रेति सर्वोक्तिशक्त्याशक्तिसिद्धावित्यर्थः दाहानुकूलेति अत्र चानुकूलत्वं कारणतावच्छेदकसाधारणेन
न शक्तेः कारणतावच्छेदकत्वेपि न क्षतिः नाप्यनतङ्गत्वस्य इति कल्पनत इत्यन्येनान्वयः तथा च वह्निनिष्ठशक्तित्वाव
च्छिन्नं प्रतिमणित्वेन नाशकत्वस्वीकारेण मण्यादिसत्त्वदशायां शक्तेरभावादेव न दाह इति भावः ननु मण्यादेर्य
दि शक्तिनाशकत्वं तदा सत्युत्तेजकविशिष्टे मण्यादावपसारिते वा दाहानापत्तिरित्यत आह उत्तेजकेनेति मण्या
द्यपसारणेन चेत्यत्र चकारो वाकारार्थे न च दाहं प्रति मण्यभावत्वेन हेतुत्वकल्पनान्माणिसमवधानकाले दाहा

नापतिरिति वाच्यं मण्यभावत्वेन त्वयैवाङ्गीकृतत्वे हेतुताकल्पने गौरवात् विलक्षणशक्तिमत्त्वेन वह्नेः कारणत्वकल्पनस्य
वोचितत्वादित्यभिमानात् न त्वेवं शक्तिसिद्धावपि तस्याः अतिरिक्तत्वासिद्धिरिति चेन्न उक्तपदार्थेष्वनन्तर्भूतत्वात् त
थाहि न तावद्द्रव्यात्मिका शक्तिः गुणादिवृत्तित्वात् अत एव न गुणात्मिका कर्मात्मिका कर्मात्मिका वा न च सामान्या
द्यन्यतमत्वपाऽस्यतिमत्त्वे सति विनाशित्वादिति इति शक्तिपक्षः एवमतिरिक्तां प्रसाध्य सादृश्यस्याप्यतिरिक्तप
दार्थत्वं व्यवस्थापयति एवमित्यादिना अतिरिक्त इति लक्षणसमपदार्थेभ्यो व्यतिरिक्तत्वं षड्भावानन्तर्भूतत्वे सत्यभावा
नन्तर्भूतत्वादिति हेतुः प्रयोगः तत्र सत्त्वेनासिद्धिं निरस्यति नहीति तस्मात् सादृश्यं हि हेतौ सामान्येतरवृत्तित्वे सति सा
मान्येन व्यभिचारः व्यतिरेकित्वे सतीति विशेषणात्स्वप्रमेयत्वादौ व्यभिचारः भावत्वे च द्रव्यादिषट्कान्यतमत्व
व्याप्ते हेतुमति साध्यस्य सत्त्वान्न व्यभिचार इति यथेति यदि सादृश्यं द्रव्यादावन्तर्भूतं न तदा द्रव्यादेः सामान्यावृत्तित्वेन
यथा गोत्वे नित्ये तथा भूतमित्यबाधितप्रतीतिर्न स्यादित्यर्थः अभावे तर्भावमाशङ्क्य निराचष्टे नापीति यद्य
प्यतिरिक्ताभावमनङ्गीकुर्वतः प्राभाकरस्य मते भावे तर्भावे चिन्तानवसरे भवति तथापि परमतमभ्युपेत्येदं निराकृ
तमिति भावः सत्त्वेन भावत्वेन प्रतीयमानत्वात् प्रमीयमानत्वात् मणिसमवधानकालीनवह्निना दाहस्याकारणाय प्राभा
करेण साधितो शक्तिं दूषयति मण्याद्यभावेति अतिरिक्तशक्तिकल्पनापेक्षया नाशकाभावकल्पना वा १२

येत्पलाघवाद्दाहत्वावच्छिन्नं प्रति मण्यभावविशिष्टवह्नित्वादिनैव हेतुताकल्पनमुचितमिति भावः दाहादिकमित्यादि
पदेन वह्निसंग्रहः मणिसत्वे वह्नेरनुत्पत्तेः तथा च मणित्वस्य प्रतिवंधकसत्वानुदाह इति भावः ननु यदा कदाचिन्म वह्नी
मण्यभावविशिष्टत्वेन मण्यभाववह्नेर्दाहापत्तिः कारणतावच्छेदकावलीढकारणसत्वस्यैव कार्योत्पत्तिनियामक
मण्यभावत्वं त्वात् मण्यभावविशिष्टवह्नित्वं वह्निविशिष्टं वा कारणतावच्छेदकं इत्यत्र विशेषणविशेष्यभावविनिगमना
विरहेण गुरुभूतकार्यकारणभावद्वयापत्तिश्चेत्यत आह मण्यभावादेरिति तथा च प्रतिवंधकत्वं न कार्या
नुकूलधर्मविघटकत्वं बाधज्ञानस्यानुमितिप्रतिवंधकत्वाभावापत्तेः किंतु कारणीभूताभावप्रतियोगित्वं तच्च मण्य
त्वे भावस्य हेतुत्वे एवोपपद्यते न त्वतिरिक्तशक्तिसत्वे इति भावः ननु प्रतिवंधकत्वस्य दृश्यत्वे कारणीभूतवह्नित्वयाभावप्र
तियोगित्वस्याभावेऽतिव्याप्तिः स्वप्रागभावप्रतियोगिनि चन्दनादौ चेति चेन्न तादात्म्यातिरिक्तसंवंधावच्छिन्नाया
कारणतातदाश्रयीभूतो योऽभावभिन्नोऽत्यंताभावस्तत्प्रतियोगित्वस्य विवक्षितत्वात् कारणताविशेषोपादाना
च्चघटात्यंताभावप्रत्यक्षे त्वस्य प्रतिवंधकत्वापत्तिः यत्तु विषयस्य तादात्म्यसंवंधेनैव प्रत्यक्षहेतुत्वात् ननु ता
वह्निमण्यभावयोर्हेतुत्वापेक्षयातिरिक्तशक्तेरेकस्या एव हेतुता युक्ता लाघवादित्यत आह अनेनैवेति
दाहादिकं प्रति मण्यभावादेर्हेतुत्वकल्पनेनैवेत्यर्थः सामंजस्ये मणिसमवधानदशायां दाहवारणे प्रागभा

मु॰ दी॰ का
१३
13

वैमानाभावाद्दाहध्वंसेति इदमुपलक्षणं प्रतियोगिध्वंसयोः शक्तिनाशमणेः शक्तिमणेश्चासारणयोश्च कार्यकारण
भावकल्पनापि स्यादित्यपि बोध्यं उत्तेजकाभावेति तथा च केवलं मणिर्न प्रतिबन्धकः किन्तूत्तेजकाभावविशिष्ट
स्तदभावश्चोत्तेजकसमवधानकालेऽपि निष्टमिति न व्यभिचार इति भावः अथ मण्यादिस्थलीयदाहं प्रत्युत्ते
जकस्यैव हेतुतास्त्विति चेन्न तस्याननुगतत्वात् तदभावकूटविशिष्टमण्यभावस्य चाननुगतत्वात् अत्रेदं बोध्यं घ्यं
अभावीयविशेषणतासंबंधेन दाहत्वावच्छिन्नं प्रति उद्देश्यतादैशिकविशेषणतान्यतरसंबंधावच्छिन्नप्रतियो
गिताकानां तदुत्तेजकाभावानां सामानाधिकरण्यरूपं यद्वैशिष्ट्यं तदवच्छिन्नस्य मण्यादेर्दैशिकविशेष
णतासंबंधेन हेतुत्वमिति एतेन संयोगसंबंधावच्छिन्नप्रतियोगिताकाभावस्याभावीयविशेषणतासंबंधेन हेतु मम एव
त्वमिति मण्यभावस्य तत्संयुक्तेऽपि सत्वाद्दाहापत्तिरिति परास्तं ननु अनुमानमशक्तौ प्रमाणं तथाहि वह्निर्दाहानु तत्संयुक्तेऽपि सत्वात्
कूला अतीन्द्रियधर्मसमवायी दाहजनकत्वात् अदृष्टयुक्तात्मवदिति वह्निद्व्यणुकैकत्वमादाय भग्नेन
कपालस्थवह्निनिष्ठानुद्भूतरूपमादाय सिद्धसाधनवारणाय साध्ये दाहानुकूलेति वह्निद्व्यणुकेंधनसं
योगमादायार्थान्तरवादात्मसंयोगमादायार्थान्तरवारणाद्द्विष्ठेति वह्निनिष्ठोष्णस्पर्शमादायार्थान्तरवारणायातीन्द्रि या
येति इति चेन्न विपक्षे बाधकतर्कविरहेणानुमानस्याप्रयोजकत्वात् केचित्तु वह्निप्रतितृणफूत्कारसंयोग १३

द्वैश्यतान्यतरसंबन्धाव
च्छिन्नप्रतियोगिताकाभावस्य
अभावीयविशेषणता ५५

नादित्रयेण कारणताया व्यभिचारेणासंभवादिति विभक्तिशक्तिसिद्धिः वचनं तृणफूत्कारयोररणिनिर्मथनयोर्मणि
किरणयोश्च संबंधजन्यतावच्छेदकं वह्निवृत्तिवैजात्यत्रयं कल्प्यमिति न व्यभिचार इति वाच्यं तज्जन्यतावच्छेदक
वैजात्यत्रयकल्पनामपेक्ष्य तत्संबंधानामेकशक्तिमत्वेन कारणत्वकल्पनाया एव लघुत्वेन न्याय्यत्वादित्याहुः तन्न
तत्तत्संबंधसाधारणैकजातेरेवाभ्युपगमात् न च योग्यवृत्तिजातेर्योग्यत्वापत्तिरिति वाच्यं दोषविशेषेण
शक्तेरिवायोग्यत्वकल्पनात् न च नोदनात्वादिना सांकर्यं तस्यादोषत्वात् अन्यतमत्वेन कारणताभावाच्च
न चान्यतमत्वघटकभेदानां मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण कारणतावच्छेदकभेदात्
कारणतावहुल्यमिति वाच्यं कारणतावच्छेदकानां समनियतानां भेदानामैक्येन कारणतावच्छेदकैक्य
संभवात् न च भेदानां स्वरूपतावच्छेदकत्वासंभवेन तृणफूत्कारसंयोगभेदविशिष्टारणिमथनसंबंधभेदविशिष्टमणि
तरणिकिरणसंबंधभेदवह्निप्रतियोगिताकभेदत्वादिनावच्छेदकत्वं वक्तव्यं तथा चावच्छेदकतावच्छेदकभेदाद
वच्छेदकताभेदस्तद्भेदे च कारणताभेद इति वाच्यं स्वरूपसंबंधरूपाया अतिरिक्ताया वा कारणताया अवच्छेदकताभे
देप्यभेदादिस्यस्तु विस्तरः परे तु तृणादिसंबंधकालीनवायुसंयोगादीनामेकशक्तिमत्वेन हेतुतामादाय विनिगमना
विरहान्न शक्तिसिद्धिरित्याहुः यदा शक्तिवत्सादृश्यमप्यतिरिक्तः पदार्थ इति मतमपि निराकरोति सादृश्यमपीति वह्नित

मु॰ टी॰ २४

तेसंतीति द्वंद्वं च सादृश्यनिरूपकेति व्याप्तिनिवारणाय अनुयोगितासंबंधविवक्षणेन नदेयमेव तद्वत्त्वं योधर्मवत्त्वमिति न
त्रासाधारण्येन विद्यमानायेभूयांसोधर्मास्तद्वत्त्वमित्यर्थः नन्विदं गगनं गगनाकारं सागरः सागरोपमः रामरावणयो
र्युद्धं रामरावणयोरिवेत्यादावव्याप्तमिति चेन्न नह्यनिधर्ममात्रस्यात्र विवक्षितत्वादयुगभेदविवक्षयाभेदस्तत्राह अत
एव युगभेदविवक्षयामिहोपमातं करोत्यथा तन्त्रयालंकारसुक्रमालंकारविवेकैः सादृश्यं च द्वैकधर्मसंबंधश्चिज्ञा
तिरूपो यथा चंद्रसदृशः पद्म इत्यादौ क्वचिदुपाधिरूपं यथा गोत्वनिरूपितथा गवत्वमयीत्यादौ यथा चेंद्रसदृशं मुखं
मित्यादावाह्लादकत्वादि प्रतितिरिक्तकल्पनेगौरवादिति नव्यास्तु सादृश्यमतिरिक्तमेव सप्तपदार्थविभागव्याघातानहत इति वाच्य नच
नस्य सादृश्यान्यंपरयावातत्वज्ञानात् प्रतियोगिपदार्थमात्रनिरूपणपरत्वात् एवमधिकरणत्वमपि तत्र संयोगादिस्वरू
पत्वे वदरकुंडसंयोगस्याविशिष्टत्वे न कुंडे बदरमिति वद्बदरे कुंडमित्यपि प्रयोगः स्यादेवं प्रतियोगित्वमपीत्याहुः सादृश्य
लक्षणं लक्ष्ये योजयति इति शब्दः श्लोकव्याख्यासमाप्तियोर्द्रव्याणि विभजते नाद्वियान्तानि इति सूत्रविहितक्तिप्रत्य नकः
यांतत्वादिति शब्दस्य स्तयवाचकत्वात् नतादिति पदस्य प्रकृतोपयोगिनमाह क्षितिः पृथिवीति अपशब्दस्याप्त्वं लचेत्या
दिपाणिनीयसूत्रे शब्दपरत्वादाह अपोजलानीति प्रतापस्यापितेजः शब्दवाच्यत्वात् प्रकृतेतेजः पदार्थं दर्शयति वह्नि
रिति ब्रह्मादिरित्यर्थः देवविशेषस्यापि महर्षिच्छितत्वात् प्रकृते तेजः पदार्थं दर्शयति छंदोवाच्यत्वात् प्रकृतोपयोगिनमर्थमाह २४

महदुद्धाप्युविति व्योमशद्दस्यैवे देवत्वमणिप्रयोगादाह व्योमाकाश इति देहविशिष्टार्थकादेहिशब्दे देहोवयवानामुपस्थि ते
तेराह देही आत्मेति अथैश्वरस्य देहिनां मध्ये न तदभावात्कथं द्रव्यत्वमिति चेन्न दृष्टान्तत्वेनान्यायेश्वरस्य शरीरमिष्टं
दृष्ट्य तिमे साध्ये दृष्टव शरीरमित्यत्र अतएव वाश्वरसादात्मेति दृष्टिव्य मेजो वा ह्यात्मान इति पंचैव द्रव्याणि व्योमादेरीश्वरा
त्मन्येवांतर्भावात्मनसंख्यासमवेतभूतेतंतर्भावादिति नवीनाः आहुस्तन्मते निराकर्तुं संख्याबोधकपदस्यैणेनार्थमा
ह एतानि नवेति व्योम्नस्तावत् शब्दाश्रयतया सिद्धिः न च भगवतएव शब्दाश्रयत्वमस्त्विति केजीवमादाय विनिगमना
विरहात् न च जीवनामाश्रयत्वे शब्दवानहमिति प्रत्यक्षापत्तिः अदृष्टवदयोग्यत्वस्यैव कल्पनात् कालदिशोस्तु एतस्मि
कालेऽत्रेदं इत्याद्यनुगताकारप्रत्ययात्मनसंख्यासमवेतभूतत्वेपार्थिवादिचतुष्टयेऽणूनादाय विनिगमनाविरहः इत्याश
द्रव्य यः अधिकमग्रेव्यक्तीभविष्यति मूले द्रव्याणीति यद्यद्रव्यत्वद्रव्यजातिविशिष्टार्थके न तु गुणाश्रयविशिष्टेगौरवात् पीतं
मानं मुक्तावल्यां किं प्रमाणमिति किं शब्दः प्रश्ने ननु इदं द्रव्यमित्यनुगतप्रतीतिरेव जातिसाधिकाभविष्यतीत्यत आह नै
हीति न च द्रव्यत्वजातौ च्छेतेति नथा च घटादि सुषमादस्यापि द्रव्यत्वज्ञानाभावेन सकलद्रव्यसाधारणत्वेन विशेष
णीयत्वात् अत्र च कार्यस्य समवायः सत्या सतिः कारणस्य तादात्म्यं च समवायेन कार्ये तु च तादात्म्येन द्रव्यमिति नियमात्
ननु जन्यसत्त्वरूपकार्यतावच्छिन्नप्रतिदान्येन द्रव्यत्वेनकारणत्वेमानाभावः न च नीलोत्पत्तिवारणाय तथा हे तत्वमा

ता नीले

मु॰ दी॰ २५ वश्यकमितिवाच्यं समवायेन नीलप्रतिसाश्रयसमवेतद्रव्यत्वसंबंधेन नीलहेतुत्वे तयैव तद्द्वारणाकार्यत्वस्य कार्यतावच्छेदक
त्वे गौरवात् कालिकसंबंधेन घटत्वादिकमादाय विनिगमनाविरहेत्यत आह संयोगस्येति अत्र च रूपादिगुणानां सक-
लद्रव्यसाधारण्याभावेन द्रव्यकार्यतया यापि विभागः सकलद्रव्यवृत्तिसंख्यादिकत्रयस्य च गगनादिवृत्तिसंख्यात्रयस्य चनि
त्यत्वात् न च संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन समवायकारणत्वे मानाभावः तत्तद्व्यक्तिसमवेतत्वान्यं प्रति तत्तद्व्यक्तित्वेन
समवायिकारणत्वस्यावश्यकतया गुणे द्रव्यतद्व्यादासम्भददिति वाच्यं कार्यमात्रवृत्तिजातेः कार्यतावच्छेदकत्वनियम
नतादृशं कारणत्वस्यावश्यकत्वात् नित्यसंयोगानङ्गीकर्तृमतेऽसाधारण्येनाह विभागस्येवेति द्रव्यत्वसिद्धेः क्वचित्तथैव
पाठः अत्र यद्यपि गुणत्वेनान्यथासिद्धिः संभवति तथापि सात्संबंधधर्मबाधेमत्येवचानुमितेः परंपरासंबंधविषय
त्वमितिभावः इदमुपलक्षणं द्रव्यवति द्रव्यान्तरानुत्पत्त्या समवायेन द्रव्यप्रतिबंधकत्वकल्पनीयमिति प्रतिबंधक
तावच्छेदकतया द्रव्यत्वसिद्धिः प्रतिबध्यतावच्छेदकं पृथिव्यादिचतुष्टयमात्रवृत्तिमूर्तत्वमेव नित्यव्यावर्तकत्वात्
मूर्तत्वस्य प्रतिबंधकतावच्छेदकत्वेन तु मूर्तत्वस्य तथात्वमादाय विगमनाविरहापत्तेः द्रव्यत्वस्य प्रतिबंधकतावच्छे
दकत्वे तु धर्मिग्राहकमानसिद्धं न च तस्य गगनादिवृत्तित्वे मानाभाव इति वाच्यं मूर्तत्वेन तुल्यव्यक्तिवृत्तिकत्वापत्त्या वि
निगमनाविरहेण गगनादिपंचवृत्तित्वाभ्युपगमात् न च मूर्तत्वेन तुल्यव्यक्तिवृत्तित्वापत्तिवारणाय मनोवृत्तित्वमेव २५

15

द्रव्यत्वे कल्पितांगगनादिवृत्तित्वकल्पने गौरवात् गगनादिवृत्तित्वकल्पनेपि मूर्त्तत्वेन सांकार्यवारणाय मनोवृत्तित्वाव
च्छेदकत्वादितिवाच्यं तथासतिमूर्त्तत्वजात्या द्रव्यत्वस्य तुल्यव्यक्तिवृत्तित्वापत्तिरिति ननु दशमं द्रव्यमस्तु तमसः सत्वान्नवद्र-
व्याणीत्ययुक्तमिति मीमांसकः शंकते नवेति ननु दशमं द्रव्यमस्तु तमसः सत्वान्नवद्रव्याणीत्ययुक्तमिति मीमांसकः शंक-
ते नवेति ननु तमसि मानाभावादेवनायुक्तमित्याशंक्य तमःसाधकं प्रत्यक्षं मानमाह तद्धीति तमोधीत्यर्थः प्रत्यक्षे-
ण चक्षुरिंद्रियेण ननु तमसः सिद्धावपि तस्य द्रव्यत्वे किं मानमित्याशंक्यानुमाने प्रमाणयति तस्येति तमस इत्य-
र्थः चकारो द्रव्यत्वमित्यनेनान्वेति तथा च तमो द्रव्यं रूपवत्वादित्यनुमानं तमसो द्रव्यत्वे प्रमाणं सूचितं इदमुपलक्षणं
परत्वापरत्वाश्रयत्वादित्यपि बोध्यं इदं तमः परमिदमपरमिति प्रतीतेः ननु तमसि रूपे मानाभावः न च नीलं तम इति
प्रतीत्या तत्सिद्धिरिति वाच्यं प्रतीतेर्भ्रांतित्वादतो हेत्वंतरमाह कर्मवत्वादिति कर्मवत्वे च समवायिसंबंधेन विवक्षिते त-
ज्जन्यमात्रस्य कालिकसंबंधेन कर्मवत्वेपि न व्यभिचारः न च तस्य रूपासिद्धिः चलति छायेति प्रतीत्या कर्मवत्वसिद्धेः त-
मसः लक्षणमद्रव्ये घटभावं निराकरोति तद्धीत्यादिना गंधेति गंधाभावस्य हेतोर्नो घटगंधप्रतियोगिकाभावमादाय च
टे व्यभिचारोतः स्वत्वमुक्तं हेतौ स्वप्रतियोगिव्यधिकरणः समवायसंबंधावच्छिन्नप्रतियोगिताको बोध्यः तेन नोत्प-
त्तिकालीने संयोगसंबंधावच्छिन्नगंधाभाववति वा घटे व्यभिचारः नीलरूपेति अनुमतेनैकेनैव नीलरूपेण हेतुर्न

मु॰
दी॰
१६

16

जलाद्यष्टकभेदसिद्धेः स्नेहाभावभास्वररूपाभावादीनामननुगतानां नहेतुतेयोपन्यासः जलादिकमित्यादिना तेजःप्रभृति
द्रव्यसंग्रहः तथाच नवस्वेव द्रव्येषु तमोभावासंभवे परिशेषेण तमसोधिकद्रव्यत्वसिद्धिरिति भावः तदुक्तं तमः खलु चल
नीलं परापरविभागवत् प्रसिद्धद्रव्यवैधर्म्यान्नवभेत्तुमर्हतीति ननु तमसो द्रव्यत्वे आलोकनिरपेक्षेण चक्षुरिन्द्रि
येण ग्रहो न स्यात् द्रव्यग्रहे आलोकसापेक्षत्वचक्षुरिन्द्रियस्य हेतुत्वादित्यत आह तत्प्रत्यक्षे चेति तमःप्रत्यक्षे चेत्यर्थः
तथाच तमोभिन्नद्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येव संयोगसंबंधेनालोकत्वेन कारणत्वावधारणादिति भावः आव
श्यकतेजोभावेनेति प्रकृष्टमहत्त्वोद्भूतानभिभूतरूपवत्तेजस्त्वावच्छिन्नाभावेनेत्यर्थः अंधकारभावपवतेजः कि
न स्यादिति नु न सम्यक् उल्लसद्भास्वररूपवद्बुधेरनुपपत्तेरिति सूचनाया आवश्यकपदं उपयतो तमोव्यवहारोपप
त्तौ ननु तमसस्तेजोभाववत्वे रूपवत्ताप्रतीतिः कथमभावे रूपाभावादित्यत आह रूपवत्तेति ननु रूपवत्त्वप्रतीतेर्भ्रान्त
त्वेपि चलतीति प्रत्ययसिद्धकर्मवत्त्वहेतुना तमसि तमसि द्रव्यत्वं सेत्स्यतीत्यत आह कर्मप्रतीतिरपीति नहि द्रव्ये
अन्यायाधिकी कर्मप्रतीतिभावः ननु प्रतीतेर्भ्रांतत्वं तत्रैव सा क्रियते यत्रोत्तरकाले बाधज्ञानं प्रकृते च तमो नवल
नीलमुत्तरकाले बाधज्ञानाभावात् कथं प्रतीतेर्भ्रांतत्वमित्यतो दूषणांतरमाह तमस इति आदिनोत्पत्तिध्वंसप्रति
ग्रहः यद्वारोपितं नीलरूपं तमस इति कंदलीकारमतेन तत्र इहांधकार इति प्रतीतेरपि भ्रमत्वापत्तेः तमो नीलं न तु नी १६

लिमेति प्रत्ययाच्च ननु नमसोन तिरिक्तत्वेपि सुवर्णस्यातिरिक्तस्य द्रव्यस्य द्रव्यस्य सत्वान्नवत्वव्याघातस्तद्दवस्यैवेत्यत
आह सुवर्णस्यातिवक्ष्यत इति तेजोनिरूपणावसर इतिशेषः केचनेति रूपरसगंधस्पर्शाः संख्यापरिमाणानि पृथक्त्व
संयोगविभागौ परत्वापरत्वबुद्धयः सुखदुःखेच्छाद्वेषप्रयत्नाश्च गुणा इति गुणविभागसूत्रे समुच्चयार्थकेनच
शब्देन सूत्रस्थचशब्देन गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः समसमुच्चितास्तेन सर्वैरेकत्र या चतुर्विंशतिर्गुणा इ
त्युच्यवहृताः ननु चतुर्विंशतौ किं नाम गुणत्वं न च जातिविशेषस्तत्र प्रमाणाभावादित्यत आह तत्वेति तेषु गुणे
ष्वित्यर्थः अग्रे गुणनिरूपणावसरे वक्ष्यते इति द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किंचिद्धर्मावच्छेद्या
कारणतात्वादित्यनुमानं गुणत्वजातौ प्रमाणमिति भावः एतत्तत्वं तत्रैव स्फुटीभविष्यति इतिनिप्रत्ययात्सिद्धेति
चलनाकारानुगतप्रत्ययवेद्येत्यर्थः अधिकृतयेति कर्मविभाजकोपाधिभिर्भ्रमणत्वादिभिः मूलेगमनादेवेति
अथैवमुत्क्षेपणादीनामपि गमनादेव लाभेऽत्क्षेपणादिभिरपि विभागोनुचितः नत्वुःत्क्षेपणादौ गमनेनानु
भाविकम् ऊर्ध्वं मूर्धस्थप्रदिप्तलोष्ठादाहृ ऊर्ध्वं गच्छत्यधो गच्छतीति प्रत्ययादिति चेन्न सत्ते तेहस्यमनेनेतियोगयविश्र
नुयोगाहन न हेत्वादिति तल्लक्षणं त्विति लक्षणप्रयोजनं त्वितरभेदस्य व्यवहारस्य वासिद्धिः सामान्यमितरेभ्यो द्रव्या
दिभ्यो भिद्यते सामान्यमिति व्यवहारस्य वासिद्धिः सामान्यमितरेभ्यो द्रव्यादिभ्यो भिद्यते विषयो वानित्यत्वे सत्यनेकस

मु॰ टी॰ १८

17

मेवेतत्वाद्यन्नैवं तन्नैवं यथाद्रव्यमिति एवं लक्षणं तदेवन्त्याहुः अनेकत्वमेकभिन्नत्वं जलपरमाणुरूपादावति व्याप्तिवारणायो
कोयोविशेषभागस्तद्द्रव्यैकसमवायफलमाह नित्यत्वे सत्यनेकवृत्तित्वमिति न चैवं नित्यसंयोगे निव्याप्तिरिति वाच्यं
तस्य निरस्तत्वात् कुतो निरास इति चेन्न द्रव्यानिरूपितसंयोगनिष्ठकार्यतावच्छेदककोटौ जन्यत्वानिवेशगौरवात्
नित्यसंयोगांगीकर्तुर्यपिसंयोगत्वस्यानित्यवृत्तित्वेन कार्यतानवच्छेदकत्वात्तुल्ययुक्त्या नित्यभागासिद्धापत्तेश्च नत्वा
काशत्वद्वयजातावव्याप्तिस्तस्या अनेकसमवेतत्वाभावादित्याशंक्य लक्ष्यत्वेनोत्तरमाह एकमात्रेति व्यक्त्यभेदस्तुल्य
बाधकसत्त्वादिति शेषः अनुगतधियो जातिबाधकत्वमेवास्तिद्वेति: सामान्यत्वे विशेषान्यत्वे च सति समवेतत्वस्य
चजातिलक्षणत्वादित्यतः संमतिमाह तथा चोक्तमिति द्रव्यकिरणावल्यामुदयनाचार्यैरिति शेषः वक्तृत्वैकमस्य
वसामान्यतयासर्वसिद्धत्वादेकव्यक्तौ जातिरनभ्युपेयेति भावः व्यक्तेरभेदः एकव्यक्तिकत्वमाकाशत्वादेर्जातित्वबाधकं
तुल्यत्वं तुल्यव्यक्तिवृत्तित्वं घटत्वकलशत्वादीनां जातीनां भेदेवस्तुतस्तु तुल्यव्यक्तिवृत्तित्वे सति भिन्नजातिसमनियतत्वमिति
यावत्तज्जातिबाधकमेवेति ध्येयं संकरस्त्वपरस्परात्यन्ताभावसामानाधिकरणयोः धर्मयोरेकसमावेशो भूतत्वादेर्जा
तिवे भूतत्वं विहाय मनसि मूर्तत्वं विहाय गगने वर्तमानस्य भूतत्वस्य च पृथिव्यादिचतुष्टये सत्त्वात् ननु सांकर्यस्य
जातिबाधकत्वे किं मानमिति चेत्समसमानाधिकरण्यप्रहाभावसामानाधिकरण्योभयसंबंधेन जातिविशिष्टजा १८

तित्वावच्छेदेन स्वसमानाधिकरणाभावप्रतियोगित्वाभावनियमस्य भंगप्रसंग एवेति तादृशनियमे मानाभावात् सांक
र्यं जातिर्यं जातिबाधकमितितु नव्याः अनवस्थात्तु जातेर्जातिमत्वे यद्यपि निखिलजातिष्वेकवैजात्याङ्गीकारेणैतद्वैजा
त्येनैव जात्यन्तरमेकव्यक्तित्वात् तथापि निखिलजातिष्वेकं वैजात्यं तदाश्रयजातिषु पुनर्वैजात्यमेवमग्रेपीत्यनव
स्थाबाधा रूपहानिः निःसामान्यगर्भलक्षणव्याघातरूपा विशेषस्य जातिमत्वे रूपस्य स्वतोव्यावर्तकत्वस्य हानिः
तत्र जातिस्वीकारेणैव व्यावर्तकत्वं वाच्यं सामान्याश्रयस्य सामान्यरूपेणैव भेदसाधकत्वनियमात् नच सामान्य
रूपेण विशेषस्य विशेषाणां भेदकत्वं संभवति व्यभिचारेण तादृशनियमानंगीकारे परमाणोगतैकत्वादीनां त
द्व्यक्तित्वेनैव परमाण्वन्तरभेदकसाधकत्वसंभवे न विशेषस्य वैयर्थ्यप्रसंगादितितु ज्ञायः असंबंधः प्रति
योगितानुयोगितान्यतरसंबंधेन समवायाभावः समवायाभावयोर्जातिमत्व इति जातिबाधकानि तद्येतया
चेति सत्तायेत्तया चेत्यर्थः सत्ताजातिश्च द्रव्यं सत् गुणः सन्नित्याद्यनुगतप्रतीत्यैव सिद्ध्यति अत्र नव्याः सन्निति
प्रतीतिविषयो भाववत्वमेव अतएव सामान्यादिष्वपि सदिति व्यवहारः नवतिरिक्ता द्रव्यादित्रिकवृत्तिः सत्ताख्या
जातिरितितेन परमपरं द्विविधं सामान्यं परं सत्तेति वैशेषिकविभागो निर्युक्तिकत्वादनुपादेय इत्याहुः तत्रस्व
ध्वंसकारणतावच्छेदकतया सकारणतावच्छेदकतया सत्ताजातिसिद्धिः यत्र प्रतियोगितासंबंधेन ध्वंसोत्प

मु॰
टी॰
१८
18

नित्सत्वतादात्म्यसंबंधेन सदिति सामानाधिकरण्यप्रत्या कार्यकारणाभावात् न च प्रागभावे व्यभिचारः प्रागभावे सत्ताविरहादिति
वाच्यं प्रागभावहृत्तिप्रतियोगिताभिन्नप्रतियोगितायाः कार्यतावच्छेदकसंबंधत्वादिति वस्तुतस्तु सत्तावच्छिन्नं प्रतितादा
त्म्येन द्रव्यत्वेन कारणता यो जन्यतावच्छेदकतया सत्ताजातिसिद्धिः तादृशकारणाभावे मानाभावे मानाभाव इति तन्न स्वाश्र
यसमवेतत्वसंबंधेन नीलादेर्नीलाद्यवयविसत्वात् नीलाद्युत्पत्तिवारणाय तादृशकार्यकारणभावस्यावश्यकत्वात् न च
स्वाश्रयसमवेतत्वविशिष्टद्रव्यत्वसंबंधेन नीलादेर्हेतुतयैव न तदापत्तिरिति वाच्यं तादृशसमवेतत्वद्रव्यत्वयोर्विशेष
णविशेष्यभावे विनिगमनाविरहेण कारणतावहुत्वापत्तेः कालिकसमवायोभयसंबंधस्य कार्यतावच्छेदकतावच्छे
दकत्वात्मतया नित्यसाधारण्येऽपि सत्तेति विरहादित्यन्यत्र विस्तरः स्वपदेति स्वतो व्यावृत्तत्वं च स्वभिन्नलिंगजन्यस्ववि
शेष्यकसजातीयभेदानुमित्यविषयत्वं साजात्यं च पदार्थविभाजकोपाधिना येन तेन च घटादेस्तादात्म्येन व्यावृत्तत्वेऽपि वि
शेषत्वस्य गुणादिष्वन्यत्वेनेतरभेदानुमितिविषयत्वेऽपि द्रव्यादेरपि प्रमेयत्वादिना विशेषसजातीयत्वेऽपि च न क्षतिः नि
त्यद्रव्यवृत्तिरिति विशेषाणां स्थानकथनं न तु लक्षणप्रविष्टं प्रयोजनाभावात् न च विशेषव्यावृत्तौ नन्वेतत्परमाणु
त्वादयो व्यावर्तका भविष्यन्ति किं विशेषेणेति चेन्न अव्यावृत्तधर्मस्य व्यावर्तकत्वाभावात् न च व्यावर्तकानवस्थायामन
वस्थानात् ननु विशेषेष्वेव प्रसंग इति चेन्न तस्य धर्मिग्राहकमानेन स्वतो व्यावृत्ततयैव सिद्धेः एवं च नित्यद्रव्येषु विशेषाः सि १८

व्यासलक्षणस्तु नविशेषवंतः आश्रयरूपेण विशेषैर्णेवतेषां व्यावृत्तत्वात् आश्रयस्य च विशेषवत्तया व्यावृत्तत्वेन विशेषव-
त्त्वसंभवादिति भावः ईश्वरकालाशयोर्नित्यज्ञानशब्दाभ्यां व्यावृत्तेः संभवान्न तत्र विशेष इत्यप्याहुः नवीनास्तु विशेषे नित्ये
मानाभावः यथैव विशेषाणां स्वतः व्यावृत्तत्वं धर्मं विना व्यावृत्तत्वं तथा नित्यद्रव्याणामपीत्याहुः इति शेषः नित्यरूपेणं च घटादी
नां कपालादौ द्रव्येषु गुणकर्मणोः तेषु जातेश्च संबंध इति मूले तत्र घटपदं कपालपदे अवयव्यवयवपरं इत्याह अवयवा
वयविनोरिति जातेश्चेति जातेश्चेति चकारेण नित्यद्रव्येषु विशेषसंबंधः समुच्चीयत इत्याह नित्यद्रव्यविशेषयोरिति
समवायस्य लक्षणमाह नित्यसंबंधत्वमिति संबंधश्चात्र संबंधिभिन्नो ग्राह्यस्तेन न नित्याभावादिस्वरूपसंबंधेनातिव्या
प्तिः ननु समवायस्य संबंधत्वे किं प्रमाणमित्याशंक्याह तत्प्रमाणं त्विति गुणक्रियादीत्यादिना जातिपरिग्रहः संयोगा
दीति द्रव्ययोरेव संयोग इति नियमादिति भावः अत्र समवायसंबंधेन पटत्वावच्छिन्नं प्रति तादात्म्यसंबंधेन तंतुत्वे-
न हेतुत्वात् कार्यतावच्छेदकसंबंधतया समवायसिद्धिः न च समवायस्थाने स्वरूपसंबंधं निवेश्य कार्यकारणभावः
कल्पनीय इति वाच्यं तथा सति यत्समवेतं कार्यमुत्पद्यते इत्यादिसमवायिकारणव्यवस्था न स्यात् न च यत्संबंधिका
र्यमुत्पद्यते तत्समवायिकारणमित्येवास्त्विति वाच्यं कपालसंबद्धघटध्वंसं प्रति कपालस्य समवायिकारणत्वप्रसंगा
दित्यपि द्रष्टव्यं सिद्धसाधनमिति अयुतसिद्धयोः स्वरूपसंबंध इति वदतः परस्येति शेषः अर्थांतरं वेति समवायसाधनेऽ

मु॰
टी॰
१९
17

नानात्वे नैयायिकानामिति शेषः ननु तथापि समवायस्यैकत्वे किं मानमत आह लाघवादिति तथा च यथा हि नित्यादिज्ञान
कत्वे गगनैकत्वे लाघवादेकत्वं सिध्यति तथा समवायो पीत्यर्थः रूपवत्ताबुद्धिनिरूपवत्ताबुद्धेः प्रमात्वप्रसंग इत्यर्थः स्पर्शसम
वायरूपसमवाययोरैक्यादिति भावः तत्र वायौ रूपाभाववदिति न च रूपसमवायसत्वे तेन संबंधेन तत्र कथं रूपाभावः सं
बंधस्य तेन संबंधेन संबंधिमत्वव्याप्यत्वादिति वाच्यं रूपनिरूपितत्वविशिष्टसमवायस्यैव रूपसंबंधत्वाद्वायौ तदभाव
त् न च विशिष्टस्यानतिरिक्तत्वात्समवायोपि वायावस्तीति वाच्यं रूपनिरूपितत्वविशिष्टसमवायनिरूपिताधिकरणता
या एव रूपसंबंधत्वात्तस्य वायावकाभावात् पृथिव्यां गंधस्य समवायो न जले इत्यादिप्रतीते समवायस्य नानात्वमिति
नुनत्वात्संबंधांतरस्यातिरिक्तपदार्थत्वापत्तेरिति शेषः सिद्धांते त्वस्य भूतलादावित्यादिः यदि वैशिष्ट्यमतिरिक्तं मंगीक्रियते तदा
तन्नित्यमनित्यं वेति विकल्पे दूषणमाह तस्येति ननु वैशिष्ट्यस्य तत्र सत्वेपि घटानयनदशायां तत्र घटाभावाभावा
देव न घटाभावबुद्धिरत आह घटाभावस्येति तत्र घटवति भूतलेपीति घटाभावस्येत्यर्थः अन्यथा घटाभावस्यानित्या
त्वे देशांतरेपीति घटशून्यदेशेपीत्यर्थः घटत्वावच्छिन्नाभावस्यैकत्वादिति भावः वैशिष्ट्यस्येति वैशिष्ट्यस्यानित्य
त्वाभ्युपगमपक्ष इत्यादि तत्र घटानयनेन घटवति न च घटवति घटाभावबुद्धिर्घटवत्ताज्ञानस्य प्रतिबंधकस्य
सत्वादिति वाच्यं घटवत्ताज्ञानविरहदशायां घटाभावबुद्धेर्जायमानायाः प्रमात्वप्रसंगादित्यत्र तात्पर्यात् ननु सिद्धां १९

तिनोपि तेपाकेन रक्ते घटे श्यामरूपसमवायस्य सत्त्वात् श्यामरूपवत्ताधीप्रसंग इत्यत आह समवेतेति द्वितीये दूषणमा
ह वैशिष्ट्यस्येति ननु वैशिष्ट्यानंगीकारे घटाभाववद्भूतलयोः कः संबंधः स्वरूपमिति चेत् तथा सति घटशून्यतादशा
यामपि भूतले घटाभावबुद्धिस्तवमतेपि स्यात् घटाभाववद्भूतलयोस्तत्स्वरूपसंबंधस्य सत्त्वादत आह एवं चेति
तत्तत्कालीनमिति घटाभाववद्भूतलमिति ज्ञानकालीनमित्यर्थः तत्तज्ज्ञानानामिति यस्य यस्याभावस्य बुद्धिस्तस्ये
त्यर्थः तथा च न स्वरूपमात्रं संबंधः किं त्वीदृशस्वरूपविशेष इति न दर्शितोक्तातिप्रसंग इति भावः नव्यास्तु वैशिष्ट्यं
पदार्थान्तरमेव भूतलघटाभाववदिति प्रत्ययात् स्वरूपसंबंधास्तु परमेवाभावाधिकरणं इत्यखंडभेदतावन्मात्र
विषयकज्ञानादिकमादाय विनिगमनाविरह इत्याहुः द्रव्यादिष्वद्रव्यान्योन्याभाव इति इह च द्रव्यत्वादिप्रतियोगिता
वच्छेदके अननुगमात् किं तु तत्तद्गुणत्वसंख्यावद्विप्रतियोगिकभेदस्याद्वितमिवेति ध्येयं वस्तुतोभावत्वेमवृत्तथावोध्य
अत्र केचित् भावभिन्नस्याभावत्वे भावत्वगर्भस्याग्रे वक्तव्यतयाभावस्यान्योन्याभावगर्भत्वेनान्योन्या
श्रयापत्तिः एवमभावस्य भावभिन्नत्वरूपत्वे भावो न भाव इति वाक्याज्जातबोधानुपपत्तिः स्वरूपतावच्छेदकविधे
ययोरैक्यादिति तस्मादखंडोपाधिरनुपयोगिताविशेषो भावत्वमिति वदंति तत्र नव्याः अभावत्वस्याखंडोपाधि
त्वे प्रमाणाभावः किं तु भावभिन्नत्वं समवायसामानाधिकरण्यान्यतरसंबंधावच्छिन्नप्रतियोगिताकसत्ताभावरूपं

मु॰ टी॰ २॰ 40

तत्त्वस्यानुपस्थितत्वमपिप्रकारः एवंचघटाभावपटाभावप्रतीतिनामभावांशेनगतत्वमप्युपपद्यते नचविषयतावस्याभता
त्वताभावव्यक्तेःस्वरूपतएवप्रकारत्वोपगमात् अतएवसत्ताद्वयप्रतियोगिज्ञानंविनापिघटोनास्तीतिबुद्धेरसप्रकारकमभा
वत्वप्रकारकप्रत्यक्षएवप्रतियोगिधियोहेतुत्वात् अन्यथाघटेदंतमइतिप्रतीत्यनापत्तेः नचसत्ताभावत्वरूपस्याभावत्वस्यानु
पस्थितस्यप्रकारत्वेविशेषणधियोहेतुत्वेव्यभिचारइतिवाच्यं विशेषणभेदेनहेतुतायाभिन्नत्वेनतत्रहेतुत्वानुपगमा
त् फलानुरोधित्वात्कल्पनायाइतिप्राहुः संसर्गोन्योन्याभावभेदतइतिमूलादेकःसंसर्गाख्यापरोन्योन्याभावाख्यइति
प्रतीयतेतत्त्वायुक्तंसंसर्गस्याभावत्वानंगीकारादित्यतआह संसर्गाभावेति तथाचद्वित्वादौश्रूयमाणस्याभावपदस्य
प्रत्येकमभिसंबंधात्संसर्गाभावोन्योन्याभावश्चेतिमूलार्थइतिभावः क्रमेणाद्वयोरभावयोर्लक्षणमाह संसर्गाभाव
मिति अन्योन्याभावेतिव्याप्तिवारणायान्योन्याभावभिन्नेतिघटादावतिव्याप्तिवारणायाभावपदंएवमग्रेपितादात्म्ये
तितादात्म्येनतादात्म्यावच्छिन्नत्वंप्रतियोगितायोविवक्षितंतेनसंयोगावच्छिन्नप्रतियोगिताकसंयोगात्यंताभावेना
तिव्याप्तिः प्रागभावस्यलक्षणमाह विनाश्यभावत्वमिति अत्रध्वंसेतिव्याप्तिवारणायविनाशीति ननुप्रागभावस
त्वेकिंमानमितिचेदद्योत्पन्नस्यपुनरुत्पादाभियानात्स्तिह्रितिप्राचः केचित्तुजातोघटइतिवदुत्पन्नोघटध्वंसइतिप्र
त्यक्षवलेननाशोत्तिविद्यते ननुप्रागभावः इहेदानींघटप्रागभावइतिलोकानांप्रत्ययाभावात् नचतत्रघटो २॰

पथायकतत्कपालतत्संयोगादीनां तन्तुघटोत्पत्तिकालेपि सत्त्वात्पुनरपि तन्तुघटोत्पत्त्यापत्तिः प्रागभावांगीकारे च तदभावादेव
न पुनस्तदुत्पत्तिरिति वाच्यं जन्यद्रव्यत्वावच्छिन्नं प्रति जनकतया क्लृप्तस्य समवायसंबंधावच्छिन्नप्रतियोगिताकद्रव्याभा
वस्य विरहेणैव तदापत्त्यसंभवात् न च जन्यद्रव्याभावस्य जन्यद्रव्योत्पत्तिकालीनोत्पत्तिकध्वंसाभावस्य वा हेतुत्वमित्यत्र
विनिगमनाविरहेण तादृशद्रव्याभावस्य तादृशध्वंसाभावानां च कारणतामपेक्ष्य लाघवादेकस्यैव प्रागभावस्य हेतुत्वं क
ल्प्यत इति वाच्यं प्रागभावकल्पनेपि तत्कालोत्पत्तिकानंतपदार्थप्रतियोगिकानामनंतानां प्रागभावानां विनिगमना
विरहेण हेतुतायाः दुर्वारत्वात्तथा च प्रागभावत्वरूपधर्मिकल्पनागौरवमेव परमतिरिच्यत इत्याहुः अत्र वदंति सामानाधिकर
ण्येन तंतुषु घटोत्पत्तिवारणाय सहस्रतंतुकपटस्थले वक्ष्यमाणतत्तत्संयोगानां च तत्तद्व्यक्तित्वेन हेतुत्वकल्प
नापेक्षयैकप्रागभावस्य हेतुतालाघवीयसी अथैवमपि द्वित्रिचतुष्टंतुषु सहस्रतंतुकपटोत्पत्तिः न च चरमसंयोगव्य
क्तेस्तद्व्यक्तित्वेन हेतुत्वान्नापत्तिरिति वाच्यं तथा सति सामानाधिकरण्येन तंतुष्वपि चरमसंयोगाभावादेव घटोत्पत्तिवार
णासंभवे प्रागभावकल्पनानौचित्यादिति चेन्न चरमसंयोगस्य समवायघटितसामानाधिकरण्यप्रत्यासत्त्या हेतुत्वे
तंतुतंतुष्वपि समवायेन घटोत्पत्तेस्तत्र समवायेन चरमसंयोगाभावेन व्यभिचारात्तथा कालिकसंबंधेन तत्पटत्वावच्छि
न्नं प्रति चरमोत्पन्नसंयोगव्यक्तेः कालिकसंबंधेन हेतुता वाच्या तथा च सामानाधिकरण्येन तंतुष्वपि कालिकतया चरमसं

सू॰
टी॰
२२
21

योगिकत्वात्घटोत्पत्तिवारणाय प्रागभावहेतुत्वस्यावश्यकत्वादिति एवमप्यनुकसूत्रनातिरिक्तपदार्थत्वस्थापितस्य प्रतियोगिकत्वे
प्रमाणाभाव इति तत्तद्ध्वंसस्य लक्षणमाह जन्याभावत्वमिति प्रागभावेतिव्याप्तिवारणाय जन्येति अत्यन्ताभावस्य लक्ष-
णमाह नित्येति ध्वंसादिवारणाय नित्यपदं ननु अत्यन्ताभावस्य नित्यत्वे च घटानयनानन्तरमपि भूतले घटो नास्तीति प्रतीत्य-
पत्तिरित्यत आह यत्रेति तथा च संबंधाभावे एव घटानयनानन्तरं घटात्यन्ताभावबुद्धिर्नेति भावः कालविशेषविशिष्ट-
स्वरूपस्य संसर्गतो यगमादेव घटवति घटो नास्तीति प्रतीत्यभावोपपत्तौ चतुर्थ संसर्गाभावे मानाभाव इत्यस्वरसः केचि-
दित्यनेन सूचितः ननु मास्तु घटकाले घटात्यन्ताभावबुद्धिः घटोत्पत्तेः प्राक्काले तु स्यादित्याशंक्याह अत्रेत्यादिना ननु ता-
र्हि रक्तरूपप्रागभावाधिकरणे श्यामघटे श्यामरूपध्वंसाधिकरणे च रक्तघटे कथं रक्तो नास्ति श्यामो नास्तीति प्रती-
तिः ध्वंसप्रागभावयोरधिकरणेऽत्यन्ताभावस्यासत्वादित्यत आह श्यामघट इति तत्रेति ध्वंसप्रागभावयोरित्यर्थः अ-
त्यन्ताभावेन सहेति शेषः तथा च नव्यमते सर्वं पत्तिकथितशंकायामिष्टापत्तिरेवेति भावः युक्तं चैतत् कथमन्यथा सर्व-
मग्रेपि रक्तेमध्ये श्यामे घटे रक्तरूपं नास्तीत्याकारकप्रत्ययः तस्य सामान्यावगाहित्वात् न चेदृशप्रत्ययो रक्तिमध्वंसाध्वं-
सप्रागभाववर्तिरक्तोपि नाह एताकारप्रत्ययप्रसंगादिति न च रक्तत्वावच्छिन्नप्रतियोगिताकध्वंसप्रागभावयोरव्याप्यवृ-
त्तित्वे नानन्तर श्यामे रक्तो नास्तीति प्रत्ययस्तदा ध्वंसप्रागभावयोः सामान्यावच्छिन्नप्रतियोगिताकत्वस्वीकारात् ननु श्या २२

परवान्निमध्वंसप्रागभावव्यतिरिक्तत्वं तत्तदात्तदनभ्युपगमादितिवाच्यं विनिगमनाविरहेणपदार्थान्तरध्वंसप्रागभावयो
रपितन्नीकारप्रसंगेनगौरवात् तदपेक्षयाभावस्यातिरिक्तत्वग्रहणमादौसेवधकल्पनेलाघवादित्यन्यत्र विस्तरः ननु भावस्तु
हिधेत्यादिविभागोनुपपन्नोभावएवमानाभावादित्यभिप्रायेणप्रभाकरःशंकते नन्विति अभावस्याधिकरणात्मक
त्वेगौरवंप्रदर्शयितुमनेतेत्युक्तं अतिरिक्तेति भावातिरिक्तेत्यर्थः अभावस्याधिकरणात्मकत्वेऽभेदेआधाराधेय
भावानुपपत्तिरूपोदोषःसोप्यस्मन्मतेनेत्याह एवंचेति एवंचाधिकरणापेक्षयातिरिक्तत्वेचेत्यर्थः नन्वभावा
धिकरणभावस्याधिकरणात्मकत्वेपयथाधाराधेयभावोपपत्तिस्तथासर्वेचाप्याश्रितत्वादूषणान्तरमाह एवंचेति
अन्यथाऽभावस्याधिकरणात्मकत्वे एतेनवस्तुमाणदूषणेनपरस्परधर्मतापन्नानां सप्तपदार्थानामपेयरस्पर
भेदकत्वंज्ञापयितुमाह इदानीमिति पदार्थनिरूपणान्तरमित्यर्थः तदनिरूपणेतत्तत्पदार्थं घटितस्यतत्तत्पदा
र्थस्यसाधर्म्यतयानिरूपणंसंभवदितिभावः समानोधर्मःसधर्मस्तस्यभावःसाधर्म्यएवमन्यत्रापीतिभ्रमवारणाय
बहुव्रीहिमाह समानोधर्मोयेषामिति केवलान्वयित्वादितिविषयभेदेनविषयेतयाः भेदेपिज्ञानविषयत्वेनके
वलान्वयित्वमस्त्येवेतिभावः एवमग्रेपिज्ञेयत्वादीन्यत्रादिपदार्थं दर्शयति एवमभिधेयत्वेपि अभिधेयत्वमभिधावि
षयत्वं अभिचसंकेतग्राह्योधिकःपदार्थइतिमीमांसकाःसंकेतभिन्नायामभिधायांमानाभावात्संकेतएवाभिधे

मु॰
टी॰
२२

तिनैयायिकाः प्रमेयत्वादिकमित्यादिनाखिलपरिग्रहः तच्चकालसंबंधित्वेद्रव्यादीनांषण्णांसाधर्म्यंभावत्वेप्यष्टमत
त्वाडुपेत्यद्रव्यादिपंचानांसाधर्म्यंमूलेप्रदर्शितं द्रव्यादयइत्यादिना अनेकत्वेसतिभावत्वमिति एवंचमूलेद्रव्याद
यः पंचेत्युद्देश्यपदंभावाअनेकेइतिविधेयपदमितिबोध्यं अतएवभाष्येपंचानामित्युक्तं ननुपंचानांभावाना
मिति अनेकभाववृत्तीत्यादि अत्रचानेकभाववृत्तित्वंस्वप्रतियोगिवृत्तित्वस्वसामानाधिकरण्योभयसंबंधेनभेद
विशिष्टत्वेसतिभाववृत्तित्वंतेनगुणादौसंख्यात्वपृथक्त्वासैकत्वस्याभावेपिनाव्याप्तिः भावत्वरूपतादृशधर्ममादा
यसमवायेतिव्याप्तिवारणायपदार्थविभाजकोपाधीति उपाधिमत्ताचसमवायस्वरूपसंबंधान्यतरसंबंधेनेते
नकालिकसंबंधेनध्वंसस्यतादृशोपाधिमत्वेपिनक्षतिः समवायेनोपाधिमत्वविवक्षणेनतुसामान्यादावव्या
प्तिःस्यादतस्तत्रोक्तं अन्यतरत्वघटकस्वरूपंतुकालिकसंबंधभिन्नंग्राह्यंतेनेनध्वंसेतिव्याप्तिः अत्रचसमवेतसमवेत
वृत्तिपदार्थविभाजकोपाधिमत्वंद्रव्यादिचतुर्णांसाधर्म्यंबोध्यं उद्देश्यवाचकपदस्यचरमस्यपादानमयुक्तम
नोयोजनन्तुयात्तदर्थंप्रदर्शयति द्रव्यगुणकर्मणामिति निर्गुणाक्रियइतिमूलेतदर्थंगुणक्रियायांभाववत्वेते
नगुणक्रियान्योन्याभावमादायद्रव्येनातिव्याप्तिः प्रत्ययपिगुणेनापि नचगुणागुणिनोर्वामहत्त्वि[illegible]विषाणवत्समा
नकालीनत्वात्कथंगुणाश्रयत्वमितिवाच्यं निर्गुणेगुणोत्पत्तिस्वीकारेणानवस्थाभावात् नचैवंघटादेराद्यक्षणावच्छि २२

त्वस्य चात्वघटितानत्स्यादितिवाच्यंमिथ्यापत्तेः तथापीति गुणवत्तासमवायेनतेनकालिकेनगुणवद्गुणादेतेगुणत्वादेर
संग्रहेपिनक्षतिः गुणवदित्यत्रचसमवायस्वरूपान्यतरसंबंधेनतेनसमवायेनगुणवदित्यभिधानेनादृशस्य
द्रव्यप्रकारकप्रमाविशेष्यत्वस्यद्रव्यत्वसमानादतिव्याप्तिरपास्तेनैवतद्वत्त्वंवाच्यंतदासामान्यादावव्याप्तिरितिपरास्तंपदार्थवि
भाजकधर्मस्यकृत्यमाह आकाशत्वादिकंतितिकर्मवदित्यत्राकाशत्वरूपायाधिमत्त्वाकाशेतिव्याप्तिवारणायतत्त्वद
मितिभावः जात्यादीनामप्येकार्थसमवायसंबंधेनसामान्यवत्त्वसामान्यपरिहीनाइतिमूलमयुक्तमतोव्याचष्टे सा
मान्याधिकरणत्वमिति तथाचसामान्यनिरूपिताधिकरणतानसामान्यादावेकार्थसमवायस्याधिकरणतान
सामान्यादावेकार्थसमवायस्याधिकरणतानियामकत्वाभावादिभावः अप्रसिद्धत्वात्पादिमांडल्यपदार्थे
निर्वक्तियारिमांडल्यमिति तद्भिन्नानांपारिमांडल्यभिन्नानां ननुद्व्यणुकपरिमाणस्यापिकारणत्वाभावान्नव्या
प्तिव्याप्तिरतःपारिमांडल्यपदंद्व्यणुकपरिमाणस्याप्युपलक्षणंतेनतस्यापिलक्ष्यत्वमित्यभिप्रेत्याह अणुपरि
माणेत्विति परमाणुद्व्यणुकसाधारणमणुपरिमाणंनित्यर्थः पारिमंडल्यस्यकारणत्वेबाधकमाह तद्धीति
अणुपरिमाणंहीत्यर्थः तत्त्वति चस्त्वर्थेतत्रहेतुमाह परिमाणस्येतिस्वसमानजातीयेतिसाजात्यमत्रपरिमाण
विभाजकरूपेणबोध्यं अणुजन्यस्येति उत्कृष्टंचाणोरणुतरमेवेतिभावः नवाणुजन्यस्याणुतरत्वमेवास्तु किंवा

मु॰टी॰
२३
23

धकमितिवाच्यो नयामतिनदेचात्त्वघत्वप्रसंगात् ननु तर्हि द्व्यणुकपरिमाणस्य किं जनकमिति चेत्तत्संख्यैवेत्यवेहि व्यक्तीभवि-
ष्यति चेदमुपरिष्टात् मूलस्यान्न तत्पोपरिहारः इति यद्यमेति वोध्याइत्यनेनान्वयः नकारणानीति वोध्याइत्यर्थः ऐन्द्रियकयो
र्महत्वसामान्ययोः स्वविषयकलौकिकप्रत्यक्षहेतुत्वान्यरमत्वानीन्द्रियत्वेइह विशेषणेन नु योगिप्रत्यक्षे पारिमाण्डल्यस्यापि-
विषयविधया कारणत्वात्पारिमाण्डल्यभिन्नानाइत्या यद्युक्तमत आह इदमपीति यथायोगजधर्मेणातीतविषयकं प्रत्यक्षं त-
थाविद्यमानविषयकप्रत्यक्षमपीतिभावः ननु ज्ञायमानसामान्यस्य प्रत्यासत्तित्वेन ज्ञायमानहेतोस्त्वानुमितिकारणत्वे
न पारिमाण्डल्यस्य सामान्यलक्षणजन्यज्ञानेनुमितौ च कारणत्वात्पारिमाण्डल्यभिन्नानामिति मूलमसंगतमत आह ज्ञा
यमानेति आत्ममानसेति विषयतया द्रव्यलौकिकप्रत्यक्षे समवायेन महत्वस्य हेतुत्वादिति भावः यद्यपि सप्रत्यक्षइत्येवव
क्तुमुचितं तथापि टीकाकृन्मते आत्मैकत्वमहत्वयोर्योग्यत्वात्प्रत्यक्षं न संभवतीत्यात्ममानसइत्युक्तं केचित्तु कारणत्वं चा
न्यत्र पारिमाण्डल्यादिभ्य इत्यं भाष्ये आदिग्रहणात्परममहत्वं गृह्यत इति वदतामाचार्याणामात्मपरिमाणमपि नक्कचित्का
रणमित्याशयो लभ्यते न च तत्र परममहत्पदमात्मपरिमाणातिरिक्तपरममहत्परमिति वाच्यं मानाभावादिति वदंतिन
न्मते हृषयितुमुपन्यस्यति तस्यापीति आत्ममहत्वस्यापीत्यर्थः ज्ञानातिरिक्तं प्रत्येवेति कारणत्वं च ज्ञात्वधर्मे तरभावका
र्यापेक्षया प्राचार्यग्रन्थः ज्ञात्वधर्मज्ञानादयः तदतिरिक्तभावकार्यं प्रति कारणत्वं पारिमाण्डल्यभिन्नानां साधर्म्यमिति तद २३

दर्थः एवं च यादृशमित्यादीनाञ्चापि यदेन पदं समस्तं गृह्यतां नामाचार्याणामाशयः यादृशोऽत्र पदस्य समाचार्यः यादृशमित्यादीना
दिपदार्थेषु सम्बन्धः स्वोद्देशजनितावच्छिन्नत्वादिरूपादेः यादृशं पदं परमाणुरूपादेश्चागमनात्तेषां लक्षणमनुमतेष्वेव चानेषु ज्ञा
नाद्यतिरिक्ताभावकार्यालोचनायाः कन्यरूपस्य व्याप्तिपरिचिन्तनस्य पञ्चात्मकोऽग्रे च कृते निर्णयं मूलेऽन्यथासिद्धीति दण्डादौ
नियतायाः पूर्ववृत्तितायाः सत्त्वादतिव्याप्तिरतः अनन्यथासिद्धत्वमुक्तमिति तदवच्छेदकतावच्छिन्नस्य च लक्षणनियतत्वात्यना
थासिद्धिमत्त्वपि घटत्वावच्छिन्ने अनन्यथासिद्धे तद्रासभेऽतिव्याप्तिवारणाय नियतेति नियतपूर्ववर्त्तिजातीयत्वमर्थः तेनारण्य
देशावावच्छिन्नस्य योग्यतासंपत्तिः तज्जातीयत्वं च नियतपूर्ववर्त्तितावच्छेदकदण्डत्वादिमत्त्वमेवेति यत्समवेतमिति यद
वच्छिन्नं सकारणतावच्छेदकं यद्धर्मावच्छिन्ने समवायसंबंधेनोत्पद्यते तद्धर्मावच्छिन्ने समवायसंबंधेनोत्पद्यते इति भवति
घटत्वाद्यवच्छिन्नं प्रतिकपालत्वाद्यवच्छिन्नं समवायिकारणं सकारणतावच्छेदकेऽतु ज्ञानाचन इच्छत्वादेर्घटादिसमवा
यिकारणतावच्छेदमिति तत्रासत्त्वमिति इदं च समवायकारणत्वादतिव्याप्तिवारणाय घटसमवायिकारणत्वेन समवा
दावतिव्याप्तिवारणाय जनकमिति तेन तत्त्वेचान्यथासिद्धिमत्वेनान्यथासिद्धमिति यत पूर्ववर्त्तितायाः अभावे न नातिव्याप्तिप्रसं
गः मुक्तावल्यामत्र यद्यपीति तुरीतंतुसंयोगस्य पटं प्रति कुत्रानामसमवायकारणत्वमिति तन्नाशकनीयेन तुरीयतंतुसंयो
गनाशे पटनाशा यतेरसमवायिकारणस्य द्रव्यनाशजनकत्वसंभावात् नचासमवायिकारणनाशस्य द्रव्यनाशकत्वम

मु॰ टी॰ २५

माणाभाव इतिवाच्यं द्व्यणुकनाशान्यथानुपपत्तेरेव प्रमाणत्वादिति नचतंतुष्वनष्टेषु विनैवसमवायिकारणनाशाद्द्रव्य
द्रव्यस्यास्थितिः स्यादितिवाच्यमिष्टापत्तेः कारणांतरकल्पनेगौरवात् अथद्रव्यासमवायिनाशयोः कथंहेतुमद्भाव इति
चेदत्राहुः प्रतियोगितयाद्रव्यनाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसमवायिसमवेतत्वकालिकविशेषणतोभयसंबंधेन
नाशत्वेनहेतुत्वेनेति इत्थं कालिकसंबंधस्य कारणतावच्छेदकसंबंधत्वेचघटादेः क्षणिकत्वापत्तिरतः स्वप्रतियोगिसमवाय
समवेतत्वनिवेशः स्वप्रतियोगिजन्यत्वसंबंधस्य दंडनाशात् घटनाशापत्तेः स्यादित्यतः भाविनाशमादायातिप्रसंगवारणा
यकालिकसंबंधप्रवेशः यद्विचकपालयवनसंयोगनाशात् घटनाशापत्तिरेवमपि दुर्वारेति विभाव्यते तदा स्वप्रतियो
गिसमवायिसमवेतत्वकालिकविशेषणतेतत्रितयसंबंधेन नाशत्वेनहेतुताबोध्या नचैवमपि तुरीतंतुसंयोगना
शाद्घटनाशापत्तिरितिवाच्यं तुरीतंतुसंयोगस्य पटं प्रति कारणत्वेन तत्संभवति किंतु तुरीवसंयोगसंबंधेनतंतु
निष्ठासती घटजनकेति नक्षतिप्रसंगाभावात् एवंच विशेषलक्षणेषु तुरीतंतुसंयोगादिभेदानामप्रवेशेनला
घवमपीतिकेचित् वस्तुतः स्वप्रतियोगिनिष्ठसमवायिकारणतानिरूपितफलोपधानात्मकाजन्यत्वसंबंधेननाश
त्वेहेतुतातुरीतंतुसंयोगस्तुनिमित्तं नतुसमवायीतिनतेननाशेन पटनाश इत्यन्यत्र विस्तरः वेगादीनामित्यादि
नास्पर्शपरिग्रहः अभिघातादीत्यादिनाचोदनापरिग्रहः ज्ञानादीत्यादिनेच्छाग्रहः इच्छादीत्यत्रप्रयत्नग्रहः तेन २५

समवेतत्वेसतितद्वृत्तितत्संयोगाद्यन्यत्वेसतिपटकारणत्वंपटासमवायिकारणत्वमितिविशेष्यैवलक्षणंवक्तव्यमित्याह
तथापीति वस्तुतस्तुतद्वृत्तितत्संयोगत्वावच्छिन्नप्रतियोगिताकभेदः पटासमवायिकारणलक्षणघटकतयाग्रंथकृ
तोऽभिप्रेतः अपितुतत्तुभिन्नसमवेतत्वावच्छिन्नप्रतियोगिताकभेदएवान्यथाहस्ततत्संयोगादिभेदानांपृथग्विवे
शापत्त्याभेदकूटनिवेशेनगौरवादितिध्येयं एतेनतंतुमात्रसमवेतत्वनिवेशेनैवोपपत्तौतद्वृत्तितत्संयोगान्यत्वनिवे
शनमनुचितमित्यपास्तंमात्रपदस्यास्मदुक्तार्थकत्वात् एवमिच्छाद्यसमवायिकारणलक्षणेआत्ममात्रसमवेत
त्वावच्छिन्नप्रतियोगिताकभेदएवनिवेश्योनतुज्ञानत्वाद्यवच्छिन्नभेदइतिबोध्यं तथाचेति द्विविधप्रत्यासत्तिवि
लक्षणेचेत्यर्थः फलितार्थइति द्विविधप्रत्यासत्योरितिशेषः पर्यवसितमसमवायिकारणलक्षणमाह इत्थं
चेति कार्यैकार्थप्रत्यासत्तिःसमवायिसंबंधः कारणैकार्थप्रत्यासत्तिःसमवायिसमवेतत्वसंबंधः तथाचसमवा
यसमवेतत्वान्यतरसंबंधेनकारणत्वेसत्यात्मविशेषगुणान्यत्वंसामान्यतोऽसमवायिकारणत्वमित्यर्थः अत्रप
टासमवायिकारणस्यतंतुसंयोगस्यपटरूपासमवायिकारणस्यतंतुरूपस्यचसंग्रहायसमवायिसमवेतत्वयोप्र
वेशः घटद्वयंप्रतिघटस्यासमवायिकारणतावारणायसमवायेकारणेप्रत्यासन्नत्वेसमिकारणत्वंपर्यवसन्नतादृ
शान्यतरप्रत्यासत्त्याकारणत्वपर्यंतानुधावनेऽआत्मविशेषगुणानामपितुविशेष्यदले यत्रकार्यनाशजनकता

मु॰
टी॰
२५

शप्रतियोगित्वं तत्र द्वित्वनाशप्रयोजकनाशप्रतियोगित्वामेयत्वावुद्भावति व्याप्तेरिति अवयवमात्रसंयोगत्वेद्रव्यासमवा
यिकारणमित्यादिविशेषणैर्वलक्षणं निर्वाच्य अखंडोपाधिरेवत्वात हित्यन्ये भिन्नकारणमिति अत्रेदंबोध्यं समवायिकार
णत्वासमवायिकारणत्वान्यकारणत्वमेव निमित्तकारणत्वं तेन तुरीपटसंयोगे प्रतितुरीत्वं तु संयोगस्यासमवायकार
णत्वेपि न तस्य पटं प्रति निमित्तकारणत्वहानिरिति यत्कार्यं प्रतीति यद्धर्मावच्छिन्नं प्रतीत्यर्थः येन रूपेणेति यद्रूपा
वच्छिन्नं प्रतीत्यर्थः इत्थं च तद्धर्मावच्छिन्ननिरूपितनियतपूर्ववृत्तित्वग्रहविशेष्यतावच्छेदकत्वे सति तद्धर्मावच्छिन्नं
प्रतिस्वतेनान्वयव्यतिरेकशून्यत्वं तद्धर्मावच्छिन्नं प्रत्यन्यथासिद्धत्वं प्रथममित्यर्थः द्वितीयान्यथासिद्धं दंडरूपादिवा
रणाय सत्यंतं कपालसंयोगोघटपूर्ववर्तीत्यादिग्रहे कपालस्यापि तादृशविशेष्यतावच्छेदकत्वात्तत्रातिव्याप्तिवा
रणाय विशेष्यं किंचित्कारणमिति कारणत्वं चात्र पृथगन्वयव्यतिरेकशालित्वं तेन नात्माश्रयः स्वातंत्र्येण तत्कार्यनिरू
पितान्वयव्यतिरेकशून्यत्वे सति तत्कार्यकारणावच्छिन्नसंनिष्ठतत्कार्यनियतपूर्ववर्त्तित्वग्रहविशेष्यताकं यत्तत्का
र्यं प्रत्यन्यथासिद्धमित्यर्थः कपालसंयोगोघटपूर्ववर्तीत्यादिपूर्ववर्त्तित्वग्रहविशेष्यतायाः कपालसंयोगनिष्ठायाः
कपालावच्छिन्नत्वात्कपालसंयोगेतिव्याप्तिवारणाय सत्यंतं दंडत्वादिवारणाय विशेष्यमिति अत्रैतदन्वयव्यतिरे
कप्रयुक्तान्वयव्यतिरेकशालित्वमित्युक्तौ प्रथमद्वितीयान्यथासिद्धयोः संग्रहोपि भेदेनान्यथासिद्धिद्वयप्रदर्शनं २५

शिष्यबुद्धिवैशद्यार्थमिति बोध्यं अन्यं प्रतीति फलानन्तगुणामन्यं प्रतीत्यर्थः तेन न कुलालजनके चतुर्थान्यथासिद्धाश्रयेति
व्याप्तिः शंके तेशब्दाश्रयत्वेनेति अन्यं प्रतीत्यादितृतीयान्यथासिद्ध्यभावादिति भावः पंचममिति अवश्यक्लृप्तनियतपूर्वव
र्तिरित्यादिकेत्यर्थः यद्यपि शब्दोद्भूतव्यत्वोपाजन्यगुणत्वादिलिंगानुमित्यात्मककार्यकारणभावग्रहरूपानुकूलतर्कसहकृ
तेनैव शब्दाद्व्याप्तितो गुणत्वादिलिंगानुमानेन शब्दाश्रयत्वेन गगनेन गृहीतात्तेन रूपेण घटपूर्ववर्तित्वे ग्राह्यं तथा च श
ब्दपूर्ववृत्तित्वे गृहीते व गगनस्य घटपूर्ववृत्तित्वग्रहात्तृतीयेवान्यथासिद्धिः संभवति तथाप्यन्यं प्रतीत्यस्य यथाश्रु-
तार्थकत्वेऽपूर्वं प्रति यागस्यान्यथासिद्धिः स्यात् स्वर्गं प्रति पूर्ववृत्तित्वे गृहीते व गृहीतेन कारणत्वान्यथानुपपत्त्या यागव्या-
पारत्वेनापूर्वकल्पनात् तोन्यं प्रति पूर्ववृत्तित्वघटितत्वरूपेण यस्य यज्जनकत्वं तस्य तेन रूपेणान्यं प्रत्यन्यथासिद्धत्वमि-
त्येतावत्पर्यन्तविवक्षणमावश्यकं यागस्य स्वर्गपूर्ववृत्तित्वघटितजनकत्वेनापूर्वं प्रत्यन्यथासिद्धित्वेपि यागत्वेन हेतु
त्वेन्यथासिद्ध्यभावात् एवं च शब्दपूर्ववृत्तित्वघटितशब्दजनकत्वेन गगनस्यान्यथासिद्धत्वेपि तद्घटितशब्दाश्रयत्वेन तृ
तीयान्यथासिद्धिः संभवेदित्यर्थः शब्दाश्रयत्वादेरव्यातिरिक्तद्रव्यत्वादिना गगनस्य घटं प्रतिहेतुत्वेपि तृतीयान्यथासि
द्धिः अन्यं प्रति पूर्ववृत्तित्वानुपपादकं यं प्रति यस्य पूर्ववृत्तित्वं गृहीत्वेत्यर्थान्नापूर्वं प्रति यागस्यान्यथासिद्धिरित्यपि के-
चित् कवत्वादिकमिति विनिगमकाभावेन बहूनां वर्णानां कारणतावच्छेदकत्वे गौरवात् वर्णानामसार्वकालीनत्वा

मु॰ दी॰ २६ त्याह विशेषपदार्थो वेति यत्कार्यजनकं प्रतीति अत्राद्यत्वं प्रतीत्या यदभिधानेन तृतीयचतुर्थान्यथासिद्धयोः संग्रहे फलाननुगु
णत्वतदनुगुणत्वयोर्विशेषणयोरुपादानेन तयोर्भेदेनाभिधाने प्रयोजनाभावस्तथापि शिष्यबुद्धिवैशद्याय पृथगुक्तमिति
अवच्छिन्नत्वमिति गंधप्रत्वावच्छिन्नत्वमेन गंधप्रागभावेनैव गंधोत्पत्तिसंभवेन तत्सहभूतरूपप्रागभावादिः पाकजगंधप्रत्यन्य
थासिद्धमेवं घटजातीयप्रत्यवच्छिन्नत्वमनियतपूर्ववर्तिभिर्दंडादिभिरेव घटोत्पत्तिसंभवे रासभोन्यथासिद्ध इत्यर्थः
नन्ववच्छिन्नत्वमनियतपूर्ववर्त्तिना पाकजरूपप्रागभावेन गंधसंभवे रूपप्रागभावेन गंधप्रागभावस्यान्यथासिद्धिः
स्यात् यत्कारणत्वमवच्छिन्नत्वमभिमतं तच्चात्माश्रयः स्यादिति चेदत्राह लघुनियतपूर्ववर्तित्वरूपमवच्छिन्नत्वमभि
हवोध्यं लघुत्वं च शरीरकृतमुपस्थितिकृतं संबंधकृतं चेति तत्र प्रथमसमनेकद्रव्यसमवेतत्वापेक्षया महत्वे द्वितीयं गंधं
प्रति रूपप्रागभावापेक्षया गंधप्रागभावे गंधात्मकप्रतियोगिज्ञानेन विनशीघ्रं तदुपस्थितेः तृतीयं दंडरूपापेक्षया
दंडत्वस्याश्रयदंडसंयोगादिघटितपरंपरयाऽगुरुत्वादिति ननु नियतपूर्ववर्तितैवान्यत्र लक्षणमिति दृश्यते तत्कथमत्रावच्छिन्न
त्वमिति कृतमतस्तस्य फलमाह अत एवेति अन्यथा महत्त्वस्यानेकद्रव्यत्वादन्यत्र लक्षणमनियतपूर्ववृत्तित्वाभावेन तस्या
न्यथासिद्धिर्महत्त्वेन न स्यादिति भावः अत्रानेकद्रव्यत्वं नानेकद्रव्यसमवेतत्वं तस्य त्र्यणुकेपि सत्त्वेन त्र्यणुकप्रत्यक्षत्वाप
त्तेः समवेतसमवेतत्वं तदित्यपि न आत्मनि तस्याभावेनात्मप्रत्यक्षत्वानुपपत्तेः किं त्वणुभिन्नद्रव्यत्वमिति बोध्यं अन्येषांद २६

८०

डत्वं दण्डत्वाकाशकुलालपितृणामनेनपंचमान्यथासिद्धेन च वितार्थत्वेन संग्रहः अनियतत्वरासभादेर्वीरणायनिषेतेत्या
दि न चानियतत्वरासभादेः पंचमान्यथासिद्धत्वात्तेनैव वारणे नियतपदं व्यर्थमिति वाच्यं अवश्यक्लृप्तनत्यैकस्याभावे
नयत्रयत्रप्रामाणिकानां कारणत्वव्यवहारस्तद्भेदस्य निवेशनीयतया नियतपदेनैव रासभादेर्वीरणेन तद्भेदस्याप्र
वेशादित्यभिप्रायात् पूर्ववर्तित्वं चाव्यवहितत्वपूर्ववर्तित्वं तेन व्यवहितपूर्ववर्तित्वमुदासः अतएव च यागादेः स्वर्गका
रणत्वानुपपत्त्या अपूर्वकल्पनया सर्वसंबंधेनाव्यवहितपूर्ववृत्तित्वोपपादं ग्रंथकृतां संगच्छते अन्यथा यागस्या
पि नियतपूर्ववृत्तित्वभावेनापूर्वकल्पनानुत्पादिति न चैतादृशस्य कारणत्वे व्यतिरेकव्यभिचारज्ञानस्य नियमां
शग्रहेण अन्याभावावगाहितया विरोधित्वेन व्यभिचारग्रहस्य कस्यैकारणतायहविरोधित्वमिति वाच्यं अव
श्यक्लृप्तमेत्यादि अन्यथासिद्धिज्ञानप्रयोजनकत्वात् तदितरनि...विलत्वकार्यत्वकारणस्तत्वेन कार्यव्यतिरेको यद्व्य
तिरेकात्तेनावश्यक्लृप्तेन नियतपूर्ववर्तिनान्यथासिद्धत्वज्ञानात् न व्याप्यस्तु कारणत्वस्यानन्यथासिद्धत्वनिय
तपूर्ववर्तितावच्छेदकधर्मवत्वे प्रतिबंधकाभावस्तत्तद्व्यक्तित्वेन हेतुतापत्तिः यत्र न कारणत्वव्यवहारस्त
द्व्यक्तिभेदकूटवत्वं तु सर्वज्ञेनैव ज्ञेयं तत्तद्व्यक्तिभेदकूटवत्वसंबंधेन कार्यविशिष्टो यो धर्मस्तत्वं तद्दित्यपि
न युक्तं तस्य संबंधत्वसंदेहात् तस्मात्कारणत्वं पदार्थांतरमेवेत्याहुः तद सत्कारणत्वस्यातिरिक्तत्वे दंडादौ सर्व

मु॰ टी॰ २८

दानन्प्रसक्त्यापत्तेः नचानन्यथासिद्धत्वे सतीत्यादिधर्मस्यव्यंजक इति वाच्यं तादृशधर्मज्ञानस्यावश्यकत्वे तस्यैव कारणताग्राह
कत्वौचित्यात् अस्तु वा दंडत्वादिकमेव कारणतं घटादिकार्यसंबंधितया तद्धेतुत्वधर्मस्यव्यंजकत्वादिति परे तु कार्या
न्वयव्यतिरेककाल एव कालान्वयव्यतिरेकशालित्वमित्यत्र च तदयुक्तं आत्मादौ सुखादिकारणप्रागभावस्य व्यतिरेका
संभवेनाव्याप्तेः मूले गुणकर्ममात्रवृत्त्यसमवायिकारणत्वमित्युक्तं तच्चायुक्तं आत्माविशेषगुणेष्वव्याप्तेरतो वैधर्म्य
परतया मूले व्याचष्टे असमवायिकारणत्वमिति साधर्म्यप्रकरणे वैधर्म्यकथनं न युक्तमित्याशयादाह अन्यथेति स
त्ताभिन्नद्रव्यत्वरूपजातिद्रव्येतिव्याप्तिवारणाय द्रव्यत्वं तेन तत्रैव सत्ताजातिमादायातिव्याप्तिवारणाय सत्ताभिन्नेति नवे
व द्रव्यगुणान्यतरत्वरूपधर्ममादायातिव्याप्तिवारणाय जातीति वृत्तित्वं जातिमत्वं च समवायेन विवक्षितं तेन गुणा
दौ द्रव्यत्वस्य कालिकेन वृत्तित्वात् द्रव्यस्य च कालिकेन गुणत्वादिसत्वाद्द्रव्ये नातिव्याप्तिः ननु गगनादिकं सर्वदेवा
स्तीत्यादिव्यवहारान्नित्यद्रव्येष्वपि कालिकसंबंधेनाश्रितत्वस्य सत्वादन्यत्राश्रितत्वं द्रव्येभ्यः इति मूलमयुक्तमत आ
ह आश्रितत्वमिति समवायादिसंबंधेन सत्त्वाधारतानियामककालिकसंबंधातिरिक्तसंबंधेन विशेषणतयेति का
लिकविशेषणतयेत्यर्थः अत्र नित्यद्रव्यातिरिक्तत्वं लक्ष्यतावच्छेदकं न च संयोगेन परमाणोरपि वृत्तेः परमा
णावतिव्याप्तिः तत्संयोगस्य वृत्त्यनियामकत्वादिति क्षित्यादीनां नवानामिति मूलस्य तु शब्देन सूचितमर्थं प्रकटय २८

ति इदानीमिति ननु धात्वर्थः क्रिया तत्र चातिप्रसंग इत्यत आह कर्मवत्त्वमिति वेगवत्त्वे वेगसंबंधित्वे दिक्कृतयोः परत्वापर
त्वयोर्हेतुरिदमस्मात्सन्निकृष्टमित्यपेक्षाबुद्धिः कालकृतयोः परत्वापरयोर्हेतुरयमस्मादल्पतरविक्रियासंबद्ध इ
त्यपेक्षाबुद्धिस्तत्र नोत्पन्ना तत्र परत्वापरत्वयोरनुत्पादाद्व्याप्तिमाशंक्यान्निरस्यति नचेत्यादिना आत्मन्यतिव्याप्तिवा
रणाय समानाधिकरणेतेन नैव सत्तामादायातिव्याप्तिवारणाय द्रव्यत्वव्याप्येति द्रव्यत्वान्यत्वेनापि जातिर्विशेष
णीया तेन न द्रव्यत्वमादायातिव्याप्तिः अपकृष्टेति अविभुवृत्तिपरिमाणवत्त्वमित्यर्थः तेन परमाणौ नाव्याप्तिः क्रि
याजनकतावच्छेदकतया मूर्त्तत्वं जातिरित्यपि केचित् तच्चेति निरुक्तमूर्त्तत्वं चेत्यर्थः चस्त्वर्थे पूर्ववदिति परत्वापर
त्वसमानाधिकरणेत्यादिकथित विवक्षितार्थवदिति भावः कालादौ स्पंदाभावेनासंभवमाशंक्याह सर्वमूर्त्तेति अहं
महानिति प्रतीतिप्रतीतिविषय परममहत्त्वत्वं गगनपरिमाणादिसाधारणस्य जातित्वसंभवे आत्मपरिमाणम
योग्यमिति टीकाकृन्मतमनुसृत्याह अपकर्षेति यद्यप्यणुपरिमाणेषु द्व्यणुकपरिमाणमेवापकर्षाश्रयो न प
रमाणुपरमाणामिति परमाणावतिव्याप्तिस्तथाप्यपकर्षानाश्रयमहत्परिमाणवत्त्वं तथेति बोध्यं बहिरिंद्रियेति आ
त्मन्यतिव्याप्तिवारणाय बहिः पूर्वं बहिरिंद्रियग्राह्यजातीयसंयोगादिति कालादावतिव्याप्तिवारणाय विशेष
ति विशेषगुणत्वे च गुणनिरूपणेव स्यात ...... द्रव्यत्वमादायातिव्याप्तिवारणाय गुणेति लौकिकत्वनिवे

मु. टी.
२८
९८

शास्यफलमाह तेनेति ज्ञातो घट इति ज्ञाने च प्रकारीभूतज्ञानांशेन लौकिकविषयताचक्षुरादेस्तत्र लौकिकसन्निकर्षा
भावादिति भावः स्वरूपयोग्यताप्रवेशस्यफलमाह नचेति ननु परमाणुरूपादेः स्वरूपयोग्यत्वे कुतो न तस्य प्रत्यक्षम
त आह महत्वेति लौकिकविषयतया द्रव्यसमवेतप्रत्यक्षे सामानाधिकरण्यसंबंधेन कारणस्य महत्वस्य परमाणुरूपादा
वभावान्न तत् लौकिकप्रत्यक्षमिति भावः ननु चक्षुरिंद्रियादिगतरूपादिविशेषगुणानामनुद्भूतत्वेन बहिरिंद्रि
यग्रहणायोग्यत्वाच्चक्षुरादावव्याप्तिमाशंक्यालाघवाच्चाह अथवेति अत्र कल्पे दैशिकपरत्वापरमादाय मनस्यति
व्याप्तिवारणाय विशेषेति स्पर्शवत्वं समवायेन स्पर्शवत्वं द्रव्यसमवायिकारणोत्पादिसत्तादिकमादाय गगनेतिव्या
प्तिवारणाय द्रव्यत्वव्याप्येति आकाशशरीरिणामित्यत्र मूले शरीरियदं परमात्मपदमित्यभिप्रायेणाह आकाशा
त्मनामिति लक्ष्ये लक्षणं प्रापयितुं शब्दज्ञानादीनामव्याप्यवृत्तित्वं क्षणिकत्वं चोपपादयति आकाशस्येत्यादि
ना क्षणिकस्य विशेषगुणस्यानभ्युपगमादाह क्षणिकत्वं चेति घटादिव्याप्ततयेत्तृतीयक्षणवृत्तीति हेतन्वृत्तीति
स्यपदं नाश्यत्वेनाभिमतं न इत्तरवर्त्ति हितीयक्षणवर्तीयो विशेषगुणस्तन्नाश्यत्वादित्यर्थः अत्र च यत्र प्रतियोगिता
संबंधेन योग्यविभुविशेषगुणानां तत्र स्वसमानाधिकरण्यस्वाव्यवहितत्वसंबंधवर्त्तितोभयसंबंधेन योग्यविभुः
विशेषगुण इति सामानाधिकरण्येन नाशकत्वं बोध्यं कार्यतावच्छेदके योग्यतानुपादाने प्रायस्थितादिजन्याह २८

ष्टनाशेऽव्यभिचारः योग्यत्वं च विषयतया लौकिकसाक्षात्कारविषयतानिर्विकल्पकान्यतरत्वं तत्त्वमतीन्द्रियजातिशून्यत्वं अ
दृष्टत्वस्य जातित्वे मानाभावेन न धात्वदृष्टेऽव्यभिचारात् इच्छादिनाशेऽव्यभिचारवारणाय विभ्विति संयोगादिनाशेऽव्य
भिचारवारणाय विशेषेति कारणतावच्छेदके योग्यत्वविशेषत्वयोरुपादानादिति यत्क्षणोत्पन्नादृष्टसंयो
गादिनात्तृतीयक्षणे अपेक्षाबुद्धिनाशः समानाधिकरण्यसंबंधनिवेशाच्च न शब्दादिनाऽव्यधिकरणानां ज्ञानेच्छा
दीनां नाशः स्वाव्यवहितपूर्ववर्त्तित्वसंबंधनिवेशाच्च न ज्ञानादीनामुत्पत्तिकाले इच्छादिनानाशः केचित्तु स्वस्य
तन्नाशक्रियस्यैव स्वाश्रयितया तत्क्षणस्य तत्क्षणे नाशकः अपेक्षाबुद्धित्वस्तद्वित्वप्रत्यक्षत्वमित्याहुः एतत्क्षणोत्पन्न
योग्यविभुविशेषगुणत्वेन नाशतायाः एतत्क्षणोत्तरक्षणवृत्तित्वविशिष्टगुणत्वेन नाशकताः अपेक्षाबुद्धिना
शे द्वित्वप्रत्यक्षत्वं विशेषसामग्रीत्वेनापेक्षाबुद्ध्युत्तरक्षणे सामान्यसामग्रीसत्त्वेपि न क्षतिः चरमज्ञानादिकं तूत्तर
क्षणवृत्तित्वविशिष्टं स्वयमेव नाशकं एतत्क्षणोत्पन्नसकलविशेषगुणसाधारणं चेदमित्याहुः शब्दस्याव्या
प्यवृत्तित्वं क्षणिकत्वे इत्युपायज्ञानादीनामपि नेत्यापादयति एवमिति क्षणिकपदस्य वैयर्थ्याय क्षणद्वयाभि
प्रायेणार्थमाह इत्थं चेति अव्याप्यवृत्तीत्युक्तमिति न च इच्छादीनामपि कालिकाव्याप्यवृत्तित्वात्कथं तद्वारण
मिति वाच्यं अव्याप्यवृत्तिपदेन दैशिकाव्याप्यवृत्तित्वस्योक्तत्वात् विशेषगुण इत्युक्तमिति विशेषगुणास्तु बुद्ध्या

वत्वमीश्वरेव्याप्तेन तद्गुणत्वाव्याप्यवृत्तित्वादिति तन्नाव्याप्यवृत्ति वृत्तिगुणत्वं २

मु० दि० २९ 29

द्विषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः अदृष्टभावनाशब्दा इति वैशेषिका गुणाः तल्लक्षणां गुणानिरूपेण वदूयते यत्राव्याप्यवृत्तिवि
शेषगुणत्वं व्याप्यजातिमत्वस्य विवक्षितत्वात् चतुर्लक्षणवृत्तीति चतुर्थलक्षणवृत्तीतियावत् जन्यानित्यद्वेष्टादीतितदवृत्तिर्या
जातिर्ज्ञानत्वादिस्तद्वान्विशेषगुणो ज्ञानादिस्तद्वत्वस्यात्मादौ सत्वाल्लक्षणसमन्वयः अत्रचावृत्तित्वं समवायेन विवक्षित
तेन जन्यमात्रे कालिकेन ज्ञानत्वस्य वृत्तित्वेपि न क्षतिः वृत्यंते च ज्ञानत्वादेर्जन्यवृत्तित्वादसंभववारणाय तदर्थत्वादि
तिलक्षणिकविशेषगुणत्वतात्पर्यत्वादित्यर्थः ननु त्रिलक्षणवृत्तित्वमुपेक्ष्य चतुर्लक्षणवृत्तित्वपर्यंतानुधावने प्रयोजनभावः
नवत्रित्वचतुष्टयोर्लाघवविरहेण चतुष्टयापादाने इच्छैव नियामकेति वाच्यं प्रथमोपास्थितत्वत्रयलाघवस्य त्रितत्वे सं
भवादत आह यत्रेसावुद्धिरिति तथाच त्रिलक्षणवृत्तित्वप्रवेशे ज्ञानत्वस्य संग्रहो न स्यादितिभावः चतुर्लक्षणवृत्ति जन्यावृ
त्तित्वस्य फलमाह रूपत्वादिकं त्विति तद्व्युदासः रूपत्वजातिव्युदासः तथाच रूपत्वजातिमद्विशेषगुणवत्वे यदादा
वति व्याप्तिः स्यान्निरस्तेतिभावः जन्यत्वस्य फलमाह ईश्वरीयेति शरीरिणामित्यत्र च मूले शरीरिपदस्य यथाश्रुता
र्थकत्वाभिप्रायेणाह यद्वेति ननु जन्यत्वस्याप्रवेशे ज्ञानत्वे छाद यत्नत्वजातीनां चतुःलक्षणवृत्यवृत्तित्वाभावात्कथं ल
क्षणसमन्वय इत्यत आह द्वेषत्वादिकमिति आदिना शब्दत्वपरिग्रहः विशेषपदकृत्यमाह परममहत्वस्येति नाद्द
शगुणत्वात् चतुःलक्षणवृत्तिजन्यावृत्तिजातिमद्गुणत्वादित्यर्थः ननु परममहत्वं न जातिः किंत्वपकर्षीनाश्रयप २९

रिमाणवत्त्वमित्युक्तं तथा च तत्समादाय जातिप्रसंग इत्यत आह चतुर्थं त्वणोर्हित्वादीनामिति यद्वा ननु जन्यपदानुपादाने
परममहत्त्वस्य चतुर्लक्षणवृत्तित्वात् तत्परममहत्त्वमादाय कालादावतिव्याप्तिरत आह चतुर्थं लक्षणमिति तथा चात्र नाहरूपजाति
मद्गुणत्वादित्यर्थः प्रथमो यास्थितत्वद्रूपलाघवमभिसंधायाह त्रित्वेति चक्षुरादीनामित्यादिना घ्राणादिपरिग्रहः तत्रा
दिचक्षुरादिष्वपि पृथिवीत्वादेरवश्यत्ववृत्तित्वमुपपादयति वृत्तजातित्यादिना योगिप्रत्यक्षविषयत्वस्वत्वादाह अतिव्या
प्तेश्चेति घटो वायुमानिति वायुसंयुक्तत्वानीतत्वभानात्मकघटविशेष्यकचाक्षुषविषयवायुवृत्तित्वद्वित्वव्याप्यवायुत्वजाति
मति वा यावतीत्यतिव्याप्तिवारणाय लौकिकेति गुरुत्ववत्त्वमिति गुरुत्वं रक्तिकमाषिकतोलकत्वादि इदमुपलक्षणं पतन
त्वमित्यपि बोध्यं पतनत्वं गुरुत्वासमवायिकारणककर्मत्वं उल्कापतनमित्यादिप्रयोगस्तु लाक्षणिकः वस्तुतस्तु गुरु-
त्वासमवायिकारणककर्मवृत्तिपतनत्वं जातिविशेष एव ननु समानो साधर्म्यं ज्ञेयत्वं तत्कस्य वैधर्म्यमित्याशंक्याह
ज्ञेयत्वादिकमिति वायोर्नवैकादश तेजसो गुणा जलक्षितिप्राणभृतां चतुर्दश दिक्कालयोः पंच षडेव चांबरे महे
श्वरेऽष्टौ मनसस्तथैव चेति प्राचीनश्लोकक्रममनतिक्रम्य वायोर्लाघवज्ञानाह मूले स्पर्शादयोऽष्टाविति स्पर्शसंख्याप
रिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानीति वेगाख्यः संस्कार इति वायोर्गुणा इत्यर्थः तेजसो गुणानाह स्पर्शादयो
ऽष्टाविति पृथिव्यादयो गुणानाह स्नेहहीना इति एते अव्यवहिताः पूर्वोक्ताः आत्मनो गुणानाह बुद्ध्यादिषट्कमिति

मु॰
टी॰
३॰
30

बुद्धिः सुखदुःखेच्छाद्वेषप्रयत्नाः संख्यादिपंचकं संख्यापरिमाणपृथक्त्वसंयोगविभागाः कालदिशोर्गुणानामेवमाद
केनैवाह संख्यादिपंचकमिति आकाशस्य गुणानाह शब्दश्चेति तथा चाकाशे शब्दः संख्यादयः पंचैवं षड्गुणा इत्यर्थः
ईश्वरस्य गुणानाह संख्यादय इति अत्र नवीनाः ईश्वरस्य परमाणुवत्त्वे मानाभावः न च द्रव्यत्वेन तदनुमानमिति वा॰
च्यमप्रयोजकत्वात् ईश्वरे द्रव्यत्वसत्त्वे मानाभावात् अत एव तत्र संयोगविभागयोः सत्त्वेपि न मानं पृथक्त्वस्य च गुणत्व
मेव निरस्तं यथा चेश्वरे सुखं तथाग्रे व्यक्तीभविष्यति एवं च संख्या बुद्धीच्छाप्रयत्नमुखानीति पंचैवेश्वरस्य गुणा इत्या
हुः इति श्रीभारद्वाजभट्टबालकृष्णात्मजमहादेवभट्टकृतौ मुक्तावलीप्रकाशे प्रथमः परिच्छेदः १ गंधहेतुत्वे काला
दावतिव्याप्तमतो व्याचष्टे गंधसमवायीति गंधवत्त्वमिति द्रव्यत्वव्याप्यजातिमत्व — र्थस्तेन सुरभ्यसुरभिकपालारब्धनिर्गं
धघटेनातिव्याप्तिः इयं तेन न जलादावतिव्याप्तिः द्रव्यत्वव्याप्यत्वेन न तत्रैव सत्तामादाय सा न चाद्यजातिपदे यद्वाना॰
ग्नलपृथिवीनिरूपितकालिकसंबंधावच्छिन्नवृत्तित्ववज्जलत्वादिमति वा जलादौ नातिव्याप्तिः प्रमाणेोयमाशये
ति यद्यपि पृथिवीत्वस्य प्रत्यक्षत्वेन तथा न प्रामाण्यं न तदपेक्षत्वात् तथाप्ययोग्यसाधारण्येन पृथिवीत्वसिद्ध्यर्थं तदुपन्यास इ॰
तिभावः अन्यथा गंधत्वावच्छिन्नं प्रति पृथिव्या हेतुत्वानंगीकारे आकस्मिकत्वापत्तेरिति नियतकारणानियम्यत्वा
पत्तेरित्यर्थः तथा च कार्यमात्रवृत्तिगंधत्वस्य कार्यतावच्छेदकत्वानुरोधेन तदवच्छिन्ने पृथिवीत्वेन हेतुत्वमावश्य ३॰

कमितिभावः इदमुपलक्षणं रूपादिनाशकतावच्छेदकतयापि पृथिवीत्वजातिसिद्धिर्द्रष्टव्या प्रतियोगितासंबंधेना
श्रयनाशजन्यरूपनाशं प्रति स्वसमवायिपृथिवीसमवेतत्वस्ववृत्तिरूपत्वोभयसंबंधेन विलक्षणतेजःसंयोगत्वेन
नाशकत्वात्पृथिवीत्वस्य तादृशनाशतावच्छेदकसंबंधघटकत्वात् आश्रयनाशजन्यरूपनाशे व्यभिचारवारणायाज
न्यांतं नाशविशेषणं च दाग्निसंयोगेन च रूपनाशापत्तिवारणाय समवेतत्वांतं तस्य नाशकतावच्छेदकसंबंधे प्रवे
शः तेजोवृत्तिरूपे प्रतियोगितासंबंधेन तादृशरूपनाशोत्पत्त्यापत्तिवारणाय स्ववृत्तित्वस्य नाशकतावच्छेदक
संबंधे प्रवेशः स्ववृत्तित्वं च कालिकविशेषणतया बोध्यं स्वसमवायिसमवेतत्वविशिष्टरूपत्वस्य संबंधत्वे रूपत्वविशि
ष्टसमवायसमवेतत्वमादाय विनिगमनाविरहेण नाश्यनाशकभावद्वयापत्तेरिति तत्परित्यागः एतेन पाकजगं
धे तेजःसंयोगस्य कारणत्वेनापाकजे च सुरभ्यादिगंधावयवात्तत्सुरभ्यादेर्नियामकत्वेन बाधत्वेन पृथिवीत्वेन
कार्यकारणभावे मानाभावात्पृथिवीत्वं न जातिरिति प्रत्युक्तं ननु गंधवत्वस्य पृथिवीलक्षणत्वे पाषाणादेर्गंधशू
न्याव्याप्तिरित्याशंकां निराकुरुते नचेत्यादिना तत्रापि पाषाणादावपि पृथिवीत्वेनेति शेषः गंधसत्वात् गंधानु
मानात् ननु पाषाणगंधसत्वेनुपलंभो न स्यादित्यत आह अनुपलब्धिस्त्विति अनुत्कटत्वेन अनुद्भूतत्वेन ननु पाषाण
स्य पृथिवीत्वप्रमाणाभावेन नितरां तदधीनगंधवत्व इत्यतस्तत्र पृथिवीत्वसाधनाय भूमिकां रचयति कथमिति अन्य

मु॰
टी॰
२१
31

थापाषाणादौपृथिवीत्वानंगीकारेतद्भस्मनिपाषाणभस्मनि यद्यपिपाषाणेपृथिवीत्वाभावेलत्वत्वादेवतत्रगंधवत्त्वलक्ष
णंनाव्याप्तमितिव्यर्थंतत्रगंधसाधनाययत्नविशेषमस्तथापिवस्तुस्थितिमनुरुध्यतथोक्तमितिध्येयं पाषाणभस्मनिगंधः
प्रत्यक्षसिद्धस्तेनतत्रपृथिवीत्वमंगीकरणीयं ततस्तद्भस्मारंभकावयवेष्वपिपृथिवीत्वमंगीकरणीयंतत्तस्तद्भस्मारं
भकावयवेष्वपिपृथिवीत्वाहिहिरित्यभिप्रायस्तदेवाह्विशदयति भस्मनीहीति एतेनपाषाणइवतद्भस्मन्यप्यनु-
द्भूतगंधायतिवारणायपाषाणावयवेषुपाकांगीकारस्यावश्यकः एवंचपाकोत्पादितगंधवद्भिःपाषाणावयवैरे
वतद्भस्मारंभः निर्गंधेभ्यस्तैरेवपाषाणारंभ इति अन्यथातद्भस्मनीत्यायसंगतिरितिपराहस्तं तथासत्यनुद्भूतगुणाल्पे
पाषाणेपृथिवीत्वसिद्ध्यातेनगंधानुमानंसंभवादिति यद्व्याप्तमिति अत्रघटध्वंसप्रत्यक्षेघटोपादानानुपादेयेव्यभिवारणा
यप्रथमेद्रव्यपदं अथवाघटध्वंसजन्यद्रूपध्वंसेव्यभिचारवारणायनतन्मिथ्याज्ञानध्वंसजन्यकायव्यूहेनवीनम
तेदृष्टप्रागभावध्वंसजन्येघटेवाव्यभिचारवारणायद्वितीयंद्रव्यपदंप्रतिबंधकद्रव्यात्यन्ताभावजन्येद्रव्येव्यभिचारवा
रणायध्वंसपदं ध्वंसत्वेनचेहजनकत्वंविवक्षितंतेननप्राचांमतेप्रतिबंधकसंसर्गाभावत्वेनतत्सहेतुत्वेपिनक्षतिःध्वंस
जन्यत्वंचादृष्टद्वाराविवक्षितंतेनेनशालिग्रामध्वंसजन्येनारकीयशरीरेनव्यभिचारः नचदुग्धध्वंसजन्येदध्निदुग्धा
वयवत्रुत्पत्तस्वीकारेदध्नोपिदुग्धपता पत्त्यादुग्धावयवैर्दधिनजन्यतइत्यंगीकरणीयंतथाचदध्निव्यभिचारइतिवा २१

च्यं द्व्यणुकातिरिक्तद्रव्यध्वंसजन्यतानङ्गीकारात् द्व्यणुकरूपद्रव्यध्वंसजन्यत्वेपि स्पर्शे न तत्र व्यभिचारः तदुपादान
परमाणुजन्यत्वस्य द्व्यणुस्पर्शे सत्त्वात् न च द्रव्यपरमाणुजन्यत्वेन द्व्यणुकोपि द्रव्यत्वापत्तिरिति वाच्यं द्रव्यपरमाणोर्द्रव्यत्वा
भावात् द्रव्यत्वव्याप्यव्याप्यजातिः परमाणुवृत्तित्वे मानाभावात् अन्यथा परमाणुस्वरूपद्रव्यजन्यत्वेन द्रव्यत्वाप
त्तिवारणासंभवात् अन्यथा परमाणुस्वरूपद्रव्यजन्यत्वेन द्रव्यत्व दधितयोः परमाणोर्जातिसंकरप्रसंगादिति
ति व्याप्तिबोधार्थं दृष्टान्तमाह दृष्टा चैतदिति मूले नानारूपवत्त्वं लक्षणान्तरमुक्तं तल्लक्षणं प्रतिपादयति शुक्लेत्या
दिना अलक्ष्ये लक्षणासत्त्वं प्रतिपादयति नवेति रूपद्वयेति रूपद्वयवद्वृत्तिमत्तारूपजातिमत्तिगुणादावतिव्याप्ति
वारणाय द्रव्यत्वव्याप्येति द्रव्यत्वव्याप्य जलत्वादिमति जलादावतिव्याप्तिवारणाय रूपद्वयवद्वृत्तीति जलपृथि
व्यन्यतरत्वादिरूपधर्मात्मादाय जलादावतिव्याप्तिवारणाय जातीति अपेक्षाबुद्धिविशेषविषयस्य रूपद्वित्वादि
चटितत्वेन गौरवादाह रूपनाशेति अत्रापि प्रतिपद्व्यावृत्तिः पूर्ववद्बोध्या षड्विधस्तु रसस्तत्रेति मूले नोक्तं रसस्य षड्
विधत्वं प्रकाशयति मधुरेत्यादिना ननु यत्र नानारसो नोत्पन्नस्तत्राव्याप्तिरित्यत आह अत्रापीति ननु मूले गंधस्य
द्विविधो मत इत्यनेन द्विविधगंधवत्त्वं पृथिवीलक्षणं प्रदर्शितं तच्च युक्तं द्वैविध्यं शास्त्रे वैयर्थ्यादित्यत आह वस्तुस्थि
तीति वस्तुगत्या गंधो द्विविधस्तिष्ठतीति सूचयितुमुक्तं न तु लक्षणं द्वैविध्यस्यापि प्रवेशे इत्यर्थः गंधद्वैविध्यं प्रकाशय

न्यु. ति द्वैविध्यं चेति अनुष्णाशीतत्वस्यैवैयर्थ्यादाह इत्थं चेति पाकजस्पर्शवत्त्वमात्रोक्तौ चेत्यर्थः न्यायमते पाकजस्पर्शाभाव
टी. वति पटे वैशेषिकमते पाकजस्पर्शस्य परमाणुष्वेव विद्यमानतयावयविनि पाकासिद्धिमाशंक्य निषेधयति यद्यपी
३२ ति पाकजस्पर्शेति यद्यपीत्यादिपदेन वैशेषिकमतेवयविमात्रपरिग्रहः सत्तारूपजातिमादाय गगनादवतिव्या-
32 प्तिवारणाय द्रव्यत्वव्याप्येति द्रव्यत्वसामानाधिकारण सत्तामादायातिव्याप्तिवारणाय व्याप्यभागः स्पर्शसमानाधिक
रणजलत्वादिकमादाय जलादावतिव्याप्तिवारणाय पाकजेति पाकजद्रवत्वसामानाधिकरणतेजस्त्वमादाय
तेजस्यतिव्याप्तिवारणाय स्पर्शेति जलपृथिव्यन्यतरत्वमादाय जलादावतिव्याप्तिवारणाय जातीति अत्र पृ
थिवीत्वस्य लक्षणतावच्छेदकत्वाल्लक्षणत्वेन संभवतीति तत्परित्यागः वस्तुतस्तु पृथिवीत्वजातिरपि पृथिव्याल
क्षणत्वेन संभवतीति तत्परित्यागः वस्तुतस्तु पृथिवीत्वजातिरपि पृथिव्या लक्षणं न च व्यतिरेकसहचारेणाव
यव्याप्तिरेव गृह्यते इत्याचार्यमते पक्षतावच्छेदकस्य न हेतुत्वमिति वाच्यं हेतुः साध्यसामानाधिकरण इति ज्ञानेपि
हेतुमान्साध्यवानिति बोधस्यानिष्पन्नत्वेन पक्षतावच्छेदकत्वेपि हेतुत्वाविरोधात् व्यतिरेकव्याप्तेर्गमकतायां
तु हततरां अणुत्वस्य द्व्यणुकेपि सत्त्वादाह परमाणुत्वेति बौद्धः शंकते नन्विति नत्वयं घट इत्यादिप्रतीतिरेव
तत्र प्रमाणं भविष्यत्यत आह परमाणुपुंजैरेवेति विलक्षणसंस्थानविशिष्टैः परमाणुभिरेवेत्यर्थः उपपद्यते ३२

रिति अयं च दूरत्वादिप्रतीतेरुपपत्तेरित्यर्थः तत्र महन्महत्त्वस्य परमाणुपुंजस्य तत्र दृष्टान्तमाह यथेति तत्र महत्त्वस्य केश
स्य महत्त्वस्य अनुपपत्तिरिति परमाणूनामनेकत्वादणुत्वाच्चेति भावः इतिवदुपपत्तेरिति तत्र यथा धान्यस्य तत्र राशेरेकत्वादेक
इति प्रतीतिरेवं संयोगविशेषस्यैव महत्त्वरूपतया महानिति प्रतीतिस्तथा परमाणुपुंजेष्वपीति भावः प्रत्यक्षत्वायो
गादिति तथा च स्वभावतो योग्यानां परमाणूनां परस्परसंयोगमात्रेणायोग्यत्वं न संभवतीति भावः दूरस्थकेश
स्तु स्वभावतो नातीन्द्रिय इति तत्र उक्तदृष्टान्तस्य वैषम्यमित्याह दूरस्थकेशस्येति तस्येति तस्य दूरस्थकेशस्य पर
कारस्त्वं तत्तु दूरत्वान्न तत्सन्निधानपदेनाचेति तथा च सन्निधानेन यत्र तस्य प्रत्यक्षत्वादित्यर्थः तथा च दूरत्वस्य
प्रतिबंधकत्वात् तद्दशायामप्रत्यक्षत्वमात्रेण तस्य न तत्स्वाभाविकमप्रत्यक्षत्वमिति भावः उत्पन्नत्वादिति त्रणभंगवा
दीनां तेषामनेकपरमाणूनामुत्पत्तिस्वीकारादिति भावः अन्यथा दृश्यस्य दृश्योत्पादकत्वेन चनादृशदृत्वोत्पत्ति
स्थले तदंतःपातिभिरतितप्तैलोत्तःपातिभिः स्वभावात्कारणैरनैरपेक्षात् उद्भूतरूपादीत्यादिना लोकादिपरिग्रहः
तदभावे महत्त्वोद्भूतरूपाद्यभावे तदभावे तदभावादिति महत्त्वाभावादित्यर्थः अत्र नास्तिकमतानुयायिनः परस्पर
विभक्तपरमाणूनां महत्त्वाभावादप्रत्यक्षत्वेपि परस्परसंयुक्तानां पुंजात्मनां तेषां प्रत्यक्षत्वे बाधकाभावः न च मह
त्वाभाव एव बाधकः परस्परविलक्षणसंयोगस्यैव महत्त्वरूपस्य प्रत्यक्षजनकत्वात् च परमाणूनां नित्यत्वात् च
नो

मु॰
टी॰
३३
33

रादावुत्पत्तिनाशयोः प्रतीत्यनुपपत्तिरिति वाच्यं मन्मते पदार्थमात्रस्यैव क्षणिकतया परमाणूनामुत्पत्तिनाशयोः स्वी-
कारात् नच परमाणूनामुत्पत्तिनाशयोः स्वीकारात् नच परमाणुपुंजेषु घटत्वांगीकारे कपालात् घट इति प्रतीत्य-
नुपपत्तिः परमाणूनां कपालजन्यत्वाभावादिति वाच्यं मन्मते कपालस्यापि परमाणुपुंजजन्यत्वस्वीकारात् पुंजानु-
त्पत्तिरिति तेषां सिद्धान्तादित्याह तत्र घट इत्यादि प्रतीतिविषयतया अनेकपरमाणुषु कल्पनागौरवादिति
पुंजातिरिक्तावयवारब्धत्वे मेरुत्वापत्तिः समुन्नीयते साम्यपरिमाणतारतम्यभावः नच मेर्ववयवानां सर्षपतुल्य-
परिमाणवत्त्वमित्यवयवयविनां विशेष इति वाच्यं मेर्ववयवसर्षपावयवयोरप्यनन्तावयवत्वेन तत्परिमाणतारतम्य-
भावस्याप्यापादनीयत्वात् नच मेरुसर्षपयोरवयवगतप्रचयाख्यसंयोगविशेषात्तद्विशेष इति वाच्यं प्रचय-
विशेषस्य संख्याविशेषनियम्यत्वेन तदभावे तद्विशेषानुपपत्तिरिति ननु तथापि विश्रामाश्रयस्यापि नित्यत्वे
मानाभाव इत्यत आह तत्र चेति असमवेतकार्योत्पत्तिप्रसंगः असमवेतभावकार्योत्पत्तिप्रसंग इत्यर्थः ननु
तस्य नित्यत्वसिद्धावप्यणुत्वे किं मानमित्यत आह महत्परिमाणेति चाक्षुषद्रव्यत्वादिति चाक्षुषद्रव्यत्वादित्या-
त्मनि व्यभिचारवारणाय चाक्षुषपदं तदवयवसिद्धौ च सर्व एवावयवसिद्धावित्यर्थः तदसिद्धेः अवयवधारायाश्च
सिद्धेरित्यर्थः अत्र नव्याः त्रसरेणोरवयवाः स्वावयवाः इत्यायतन्मानयोरुक्तयोरप्रयोजकत्वेन त्रुट्यावेव विश्रामः ३३

नचवात्रुटेःप्रतिमहत्वेकारणे तथाचत्रुटौमहत्त्वमावश्यकंतत्त्वावयवसंख्याजन्यमित्यवयवंविनानोपपद्यत इत्यनु
कूलतर्कसत्वात्तत्राप्रयोजकत्वेह्यनुकसाधकानुमानस्येतिवाच्यं त्रसरेणुमहत्त्वस्यानित्यत्वस्याकारेणाकृतकोनव
गाणत् नचाणुव्यवहाराख्याणुपरिमाणनिबंधनतः यातदाश्रयद्रव्यसिद्धिरावश्यकीतिवाच्यं तस्यावयवपरिमा
णनिबंधनत्वात् महत्त्वपिमहत्तमाद्अणुव्यवहारात् नचैवंत्रसरेणुपुंजएवाल्पावयवीतिवाच्यंविशकलितेष्वपि
तेषुघटइत्यादिप्रत्ययप्रसंगात् नचतत्संयोगहृत्यैवघटत्वंघटोद्रव्यमित्यादिप्रतीतेश्चपरंपरयातज्ज्ञानमितिवाच्यं
संभवतिसाक्षात्संबंधविषयत्वेपरंपरयासंबंधविषयकत्वकल्पनेगौरवादित्याहुः ननुपरमाणुत्र्यणुत्रये
णाकुतोनद्रव्यांतरोत्पत्तिः परमाणुद्वयेनद्व्यणुकवदेवंद्व्यणुकत्रयेणद्रव्यांतरोत्पत्तिस्त्रिभिर्द्व्यणुकैःत्र्यणु
कवदितिचेन्न प्रमाणाभावेनतादृशद्रव्यासिद्धेःपरमाणुत्रयेद्व्यणुकद्वयेचद्रव्यारंभकसंयोगाकल्पनात्
अथैवंचित्तांत्रिभिःपरमाणुभिरेवत्र्यणुकमस्तुपरमाणुभ्यामनारंभकत्वसिद्धांतिनांद्व्यणुकाभ्यामनारंभकत्वमा
नाभावात् फलबलेनत्रयाणामेवयुगपद्द्रव्यारंभकसंयोगकल्पनात् वस्तुतोगवाक्षांतरंध्रेदृश्यमानानांद्व्य
णुकत्वमेवयुक्तमणुद्वयारब्धत्वेलाघवादित्यूह्यं मूलस्थसदेहवृत्तीन्द्रियविषयरूपयोत्पत्तेश्चैवंविधोदेहस्तत्परत्वंहू
चयितुमाद्यमाह सांकर्येरूपेति योनिजंशुक्रशोणितेपरस्परमेलनजन्यंतद्भिन्नमयोनिजं जरायुजमिति

सू॰
टी॰
३४

गर्भवेष्टनचर्मपुटके जरायुः मानुषादीनामित्यादिना पशुमृगाणां परिग्रहः सर्पादीनामित्यादिना विहगपरिग्रहः
स्वेदजमुदाहरति कृमिदंशा या इति तच्छरीराणामुत्पत्तेरधर्मविशेषसहितेभ्योऽणुभ्य एव स्वीकारादिति भावः
उद्भिज्जादिकमित्यादिना देवादिशरीरपरिग्रहः तच्छरीराणामुत्पत्तेर्धर्मविशेषसहितेभ्यो ह्यणुभ्य एव स्वीकारा
दिति भावः तेषामयोनिजत्वे चागममप्येव ब्रह्मणो मानसाः सनकाद्याः पुत्रा इत्यादिः प्रमाणं योनिं विनानशरीरमि
त्येवं विधागमे च योनिपदं कारणमात्रपदं शरीरपदं वा मनुष्यदेहपरं गंधादीत्यादिना स्त्रक्चेतरद्रूपपरिग्र
हः क्लेदोष्मादेरित्यादिना व्यूहावकाशपरिग्रहः क्लेदः क्षरणं स्वेद इति यावत् ऊष्मा याः कौष्म्यमिति यावत्
तच्च शरीरसंबंधेन पुष्पादिष्वपादिपराहृत्यानुमीयते तस्मात्तदनुपपत्तेः व्यूहः क्रिया अवकाशो मुखाद्यव
न्नादिगत्यप्रतिबंधकः ननु कथं तर्हि शरीरे पांचभौतिकत्वव्यवहार इत्यत आह तेनेति शरीरस्य पार्थिवत्व
साधनेनेत्यर्थः एवं च शरीरे पांचभौतिकव्यवहारो न पंचभूतोपादानकत्वनिबंधनः किंतु पंचभूत
जन्यत्वनिबंधनः तत्र पृथ्व्येकैकस्योपादानत्वं च चतुर्णां निमित्तत्वमिति विवेकः किंतु चेष्टेति चेष्टावत्त्वं जातिविशेषस्पृ
ष्टत्व इति प्रत्यक्षसिद्धः न च शरीरत्वमेव पृथिवीत्वादिव्याप्यजातिः स्पृष्टत्वं च तात्क्रियावत्त्वमिति वाच्यं पृथिवीत्वादि
नासंकरेण पृथिवीत्वादिव्याप्यानेकशरीरत्वकल्पने गौरवात् आध्यात्मिकेति आध्यात्मिकवायुः प्राणाख्यः श ३४

कते नष्टेवेति भग्नद्रव्ये तेति भग्नद्रव्यतन्त्वोर्विभागविशेषविशिष्टावयवयोः संरोहणं आदिनावृद्धिसंग्रहः वृद्धिश्चाव
यवोपचयः नष्टत्वयनादिति आध्यात्मिकवायुसंबंधानुमितेः ननु भग्नद्रव्यतसंरोहणादिहेतुवायोः प्राणत्वेमात्रा
भाव इति चेन्न नर्मदातीरसंजाताः सरलाङ्गुनपादपाः नर्मदातोयसंस्पर्शात्ते यान्ति परमां गतिं गुरुद्रुमकत्वात्
कृत्स्नविप्रनिर्जिवादतः श्मशाने जायते वृक्षः कंकगृध्रोपसेवित इत्यागमसंवादत्वेन मानत्वात् अन्त्यावयविनेने
ति द्रव्यानारम्भकद्रव्यत्वेनेत्यर्थः मृतशरीरे चेष्टाया अभावेनाव्याप्तेराहाथवेति चरत्वमादाय चरेति व्या
प्तिवारणाय चेष्टावदिति हस्ताद्यवतिव्याप्तिवारणायान्त्यावयवीति न च हस्तत्वादिकं न जातिः पृथिवी
नासंतकार त्वादिनेति वाच्यं पृथिवीत्वादिव्याप्यनानाहस्तत्वांगीकारात् पृथिवीत्वव्याप्यतादृशजातिमादायातिव्याप्तेर्ल
प्रसंगात् क्षणान्तरमाहान्त्यावयवीति अन्त्यावयविमात्रवृत्तीत्यनेन द्रव्यत्वजातिव्युदासः चेष्टावद्वृत्तीत्यनेन च पृथिव्यादिव्यु
दासः चेष्टा च हिताहितप्राप्तिपरिहारार्थाक्रिया ग्राह्या न तु स्पन्दनमात्रं तस्य दारावपि सत्त्वात् ननु देवत्वादिरू
पजातिमादाय लक्षणसमन्वयः इत्यत आह जलीयेति देवत्वस्यापि अपि नानात्वसिंहत्वपरिग्रहः जातित्वाभावा
दिति जातिसांकर्यादिति भावः जातिसांकर्यस्यादोषत्वे देवत्वशरीरत्वानानाजातिमादायैव लक्षणसमन्वय इ
ति ध्येयं नृपादिषु मध्ये इति रसगंधस्पर्शा आदिपदार्थाः न वश शरावगंधव्यंजकजले मनसि च व्यभिचारण

घ्राणेन्द्रियेगन्धत्वाभिव्यञ्जकत्वात् हेतुप्रसिद्धिवारणाय हेतौ मध्यान्तं न चासिद्धिवारके विशेषणं निरर्थकमिति वाच्यं
व्यभिचारस्तानस्व

मु॰
टी॰
३५
35

यैवकारः तथाच सक्तुरसस्याभिव्यंजकत्वान्न दोषः घ्राणेन्द्रियहेतावपि व्याप्तिज्ञानभावेन व्याप्तिग्रहोपयिका
सिद्धिवारकविशेषणोपादानस्य सफलसिद्धत्वात् तदर्थत्वात् हेतुवाक्ये च एकमध्यात्तपदसमभिव्याहृतैवकारा
र्थत्वात् तथाच स्वेष्टेते नीयरूपव्यंजकेत्वानाद्यवसिद्धिवारणाय परकीयत्वं रूपादौ विशेषणं देयमिति भावः
तस्येति नवशरावगंधव्यंजकजलस्येत्यर्थः नचनवशरावगंधव्यंजकजलेन येन सक्तुरसो
नाभिव्यंजितस्तत्र जलविशेषे नैकान्तिक इति वाच्यं परकीयरूपादिविषयकसाक्षात्कारस्वरूपायोग्यत्वस्य
विवक्षितत्वात् नवशरावगंधव्यंजकजलेपि परकीयव्यंजकत्वावच्छेदकजलत्वस्य सत्त्वादिति परकीयेति विशेष
णाप्रवेशेन लाघवाद्दाहृयद्धेति तदर्शने रूपान्तमाह वायूपनीतेति इदमत्र बोध्यं रूपायव्यंजकत्वे सतीत्य
स्य हेतुत्वे तात्पर्यं शब्दाव्यंजकत्वे सति गंधव्यंजकोदके व्यभिचारेण तत्र गुरुत्वकल्पने तात्पर्याभावात् तत्र हे
तु स्वरूपरसस्पर्शानां परकीयत्वं विशेषणं नच प्रथमहेतौ नवशरावगंधव्यंजकजले व्यभिचारः सुभास्वर
मरीनीलद्रव्यव्यंजकत्वात् नच तृतीयहेतौ तत्र व्यभिचारः एतद्दशरसेनापि यद्धेति कल्पान्तरप्रणयणा
त् तत्रापि परकीयत्वविशेषणाचरितैहेतुत्रयमिति तत्र घ्राणेन्द्रियसन्निकर्षे इन्द्रियत्वेन ज्ञानातिलिङ्ग
त्वादिना सांकार्यात् किंतु शब्दे तरेत्यादिना वक्ष्यमाणे बोध्यं ननु विषयत्वेन जातिः सामान्यादौ सत्त्वादल ३५

लक्षणमाह उपभोगेति यद्यपि साक्षाद्भोगसाधनत्वं द्व्यणुकादावव्याप्तं परंपरया भोगसाधनत्वं च परमाणाव
पीति द्व्यणुकादिव्यावर्त्तनमिति ग्रन्थविरोधस्तथापि साक्षात्परंपरासाधारणभोगसाधनत्वं विवक्षितं परमाणु
रपि विषयत्वेन कार्यत्वं पृथिव्यामेव त्रिप्रकारेण विभजनात्कार्यपृथिवीविषय एव द्व्यणुकेऽपि दिनाप्रदर्शि
तत्वमिति न ग्रन्थविरोधः अत एवोक्तम् तदुपभोगसाक्षात्परंपरया वा जनयन्त्येवेति कार्यजातमित्यत्र जातप
दं संपातायातं अदृष्टाधीनमिति अत्र च कार्यमात्रं प्रत्यदृष्टस्य हेतुतां न समवायसंबंधेन च दृष्टाद्यधिका
णकपालादौ समवायेन तदभावाद्व्यभिचारात् यत्तु स्वसमवायिसंयोगेनादृष्टं कार्यमात्रे हेतुरिति तन्न
न्नाशादृष्टत्वं कार्याधिकरणे गगने दृष्टसमवायात्मसंयोगाभावेन व्यभिचारात् परं तु समवायिसंयुक्त
संयोगेन तस्य तत्ताबोध्या इदं तु बोध्यं अदृष्टस्य कार्यमात्रं प्रति हेतुतां न साक्षात्त्वं हि सामग्रीसमवाधा
नेऽदृष्टविलंबेन कार्यविलंबो दृष्टोऽयेन तस्मात्तद्धेतुः परंतु सामग्रीसंपादकतया प्रायः परंपरयैव त
दुपयोगः क्वचित्तु मेघसंचारादौ साक्षादेव तद्धेतुः अन्यथा सामग्रीसंपादकत्वस्यैवानुपपत्तेरिति एतद
र्थमेव साक्षात्परंपरासाधारणजन्यत्वबोधकमधीनपदं यदृष्टाधीनं यत्तु रुचीयाऽदृष्टाधीनत्वं का
र्यमित्यर्थः तदुपभोगसाधनत्वं तत्स्वरूपसाधनभोगसाधने तेन द्व्यणुकादिकार्यस्य तत्तत्स्वरूपसाधनभोगसाधने

मु॰
दी॰
३६
36

ननु रूपस्योपभोगसाधनत्वे तेन घ्राणकादिकार्यस्य तत्तनुरूपोपभोगसाधनत्वेन न त्वेवं सर्वस्यैव विषयत्वेन श
रीरेन्द्रियविषयभेदेन पृथिव्यास्त्रैविध्यं न सिद्ध्येदत आह शरीरेन्द्रिययोरिति इति पृथिवीग्रन्थः जलत्वजातौ
प्रमाणमाह स्नेहेति कारणतावच्छेदकतया धर्मसिद्धौ बाधकाभावात्तस्य जातित्वमिति नित्यवृत्तिधर्मस्य
कार्यतावच्छेदकत्वाभावेन स्नेहत्वस्य कार्यतावच्छेदकत्वं न संभवतीति शंकते यद्यपीति तथा कार्यतावच्छे
दकत्वस्य तस्य नित्यसाधारणधर्मस्य कार्यकार्यतावच्छेदकत्वे दोषाभावात् जन्यपदं न देयमेव ननु यथा
रण्यस्थदण्डादौ फलानुपधायके कारणतावच्छेदकतया दण्डत्वादिकं जातिस्तथापि भविष्यतीत्यत आह
तस्येति दण्डादेः स्वरूपयोग्यतायां न कापि क्षतिः तस्या नित्यत्वेन फलोपधायकत्वाभावादिति भावः जन्यज
लत्वजातेः जन्यजलमात्रवृत्तिजातेः तदवच्छिन्नेति जन्यजलत्वजात्यवच्छिन्नेत्यर्थः न चैवं जलत्वस्यावयवि
नि जलत्वं न स्यादिति वाच्यं जलस्य तावयवित्वानुपगमात् ननु जलत्वावच्छिन्नं प्रति समवायसंबंधेन स्ने
हस्यैव कारणत्वमस्तु अतिरिक्तजातिकल्पनापेक्षया लाघवादिति चेन्न जलत्वावच्छिन्नं प्रति स्नेहत्वेन वा
कारणत्वे शीतस्पर्शत्वेनैवेत्यत्र विनिगमनाविरहादतिरिक्तजातिसिद्धेः स्नेहमादाय कल्पनीयेन विनिग
मनाभावादिति केचित्तु धूमादिके प्रत्यार्द्रेन्धनादेः कारणत्वे निर्विवादे आर्द्रत्वं जलसंयुक्तत्वं तथा च ज ३६

लक्ष्येतु स्नेहं पवनत्वेनेंधनत्वे युक्तं जलत्वेन कारणतानत्यत्रविनिगमनाविरहात् जलत्वेंधनत्वयोः पार्थिवत्वेन कारणतानव
च्छेदकत्वाज्जलत्वजातिसिद्धिरित्याहुः परे तत्स्थूलजलवृत्तित्वमात्रासिद्धेर्जलावयवजात्यवच्छिन्नसमवा
यिकारणतावच्छेदकतया परमाणुसाधारण्येन जलत्वजातिसिद्धिः कार्यतावच्छेदककारणतावच्छेदकयोरै
क्येपि तत्त्वाभावान्नित्यसाधारणधर्मस्य कारणतावच्छेदकत्वे दोषाभावाच्चेत्याहुः नन्वित्ति पृथिव्यामेव
नित्यामेरिति भावः स्थूलत्वाद्युपस्थलक्षणत्वेपि नहानिरित्यभिप्रेत्याहाथवेति द्रव्यत्वव्याप्यवायुत्ववृत्त्यजाति
मादाय वायावायावतिप्रसंगाद्रूपवद्वृत्तीतिपाथश्च वायुतेजोजातिस्तथाग्रेवक्ष्यते पृथिवीत्वादिजातिमादाय
पृथिव्यादावतिप्रसंगवारणाय नैमित्तिकद्रवत्ववद्वृत्तीति सांसिद्धिकेति घटत्वादिवारणाय द्रव्यत्वसाक्षाद्
व्याप्यत्वं च द्रव्यत्वसाक्षाद्व्याप्यत्वं च द्रव्यत्वव्याप्यव्याप्यत्वमात्रे न तु द्रव्यत्वव्याप्यतत्त्वापि न ज्ञानभावः द्र
व्यत्वानि तु विशेषणेनैव रूपत्वादीनां वारणात् तद्विशेषप्रयोजनाभावात् घटपटवृत्त्यपापास्थितिकद्रवत्वेस
वयवरूपप्रत्यये प्रवेशो युक्तः तेनापि वायुत्वादेर्वारणात् एवं च द्रव्यत्वव्यापितत्त्वाभावादेव घटत्वादिनावार
णसंभवे द्रव्यत्वसाक्षात्व्याप्येत्यापि न देयमिति लाघवं तथापि स्नेहवत्त्वः स्थूलस्याप्यादिनाद्युपग्रहादित
लत्वस्येवाप्तत्वात्तत्र घटे तैलत्वाभावपरिष्कारस्थलविरोधः स्यादिति भ्रमेंन्नजलत्वजात्यनभ्युपगमने चेदत्ते

मु॰ टी॰ ३८ तज्जलत्वस्य द्रव्यत्वव्याप्यमूर्त्तत्वव्याप्यत्वेऽपि न क्षतिः जलत्वघटान्यतरत्वमादाय घटादाववतिव्याप्तिवारणाय जातीति नो क्वचि
त्स्पृष्टरूपवद्वृत्तीति पाठस्तत्र स्पृष्टपदं स्पृष्टरूपपदं संपातायातं तथैव मे व्याप्तिरभास्वरशुक्लेतररूपेऽत्र रूपवद्वृ
त्तिद्रव्यत्वसाक्षाद्व्याप्यपदयोर्वैयर्थ्यात् पृथिवीत्वमादाय पृथिव्यामतिव्याप्तिवारणाय भास्वरशुक्लेतररूपासमाना
धिकरणेति जलत्वस्य शुक्लरूपसमानाधिकरणत्वासंभववारणाय शुक्लेतरेति तेजस्त्वमादाय तेजस्यतिव्याप्ति
वारणाय भास्वरेति शीतस्पर्शवदिति यद्यपि शीतेऽगुरुत्वादिति कोशात् शीतवत्त्वं वाचितात्तथापि विशेषस्पर्शशब्दस्य
लिंगत्वया पुंस्त्वेन निर्देशः स्पृष्टरूपमित्यादौ स्पृष्टपदस्य स्पृष्टत्वविवक्षेवेति द्रव्यत्वव्याप्यपृथिवीत्वरूपजातिमादा
य पृथिव्यामतिव्याप्तिवारणाय तिक्तावृत्तीति तेजस्त्वादिजातिमादाय तेजस्यतिव्याप्तिवारणाय मधुरवृत्तीति शेष
दर्शितादेशावसेयं शीततरेति द्रव्यत्वरूपजातिमादायातिप्रसंगवारणाय शीतेतरस्पर्शवदवृत्तीति आत्मत्वादि
कमादायात्मन्यतिव्याप्तिवारणाय स्पर्शवद्वृत्तीति शेषं पूर्ववत् ननु जले नीलरूपाभावे कथं नीलरूपप्रतीतिरत
आह कालिंदीति संभवापिसंयोगसंबंधेनोपष्टंभके पार्थिवभागे नीलरूपप्रतीतिः कालिंदीजलादाविति भा
वः अतएवोपदर्शितसंबंधस्य जले नीलमिति प्रतीतिनियामकत्वादेवेत्यर्थः वियतीति तदोपदर्शितसंबंधघ
टकसंयोगस्य नाशादितिभावः तत्र जले तस्य माधुर्यस्य अन्यथा आश्रयोपाधिकत्वाभावे व्यंजकत्वादित्युक्तं वहीत ३८

कीभक्षणोत्तरंप्रत्यक्षेणमाधुर्योपलंभादिति पृथग्रसोत्पत्तिकल्पनागौरवादिति अवयवरसाज्जन्यस्य पृथिवीरसस्याग्निसंयो
गसाध्यत्वदर्शनादेतदनुरोधमात्रेणजलसंयोगस्यापिपृथिवीरसोत्पादकत्वस्वीकारेऽतिरिक्तकार्यकारणभावस्य
हरीतकीमधुररसस्यकल्पनेगौरवादितिभावः ननुजलेमधुरोरसः तथापिजंबीरजलादौप्रत्यक्षसिद्धस्या
म्लरसस्यापिस्वीकारेबाधकाभावइत्यतआह पृथिवीत्वस्य अम्लादिजनकतावच्छेदकत्वादिति यद्यपिपृथि
वीत्वस्याम्लादिजनकतावच्छेदकत्ववन्मधुजनकतावच्छेदकत्वमप्यस्तीतितुल्यंतथापि हरीतकीभक्षणो
त्तरंजलेपिमधुरोपलब्धेस्तत्रमधुरस्वीकारस्यावश्यकत्वाज्जलत्वेनापिमधुरंप्रतिहेतुत्वंकल्प्यमितिभावः न
नुजंबीरसलिलावम्लप्रत्यक्षाज्जलत्वेनाम्लादिरसेपितुल्यवहेतुत्वंस्यादत आह जंबीररसादावेतिरस
मवायिसंयोगेनजंबीरगताम्लरसप्रतीतिस्तज्जलइत्यर्थः अन्यत्रापिजंबीरे आम्लप्रतीतेस्तत्राम्लरसावश्यक
त्वेनस्यैवतज्जलेपरंपरयाप्रतीतिः हरीतक्यांतुमधुररसस्याभावान्नहरीतकीगतमाधुर्यस्यजलेप्रतीतिरि
तिभावः कर्कटीभक्षणोत्तरंजलपानेतिक्तरसस्यानुभवात्तिक्तरसोपिजलेस्यादितितन्नजलपानात्पूर्वमपि
कर्कट्यांतिक्तरसोपलब्धेः कर्कटीभक्षणेनरसनाग्रवर्तिपित्तस्यैवतद्दीयतिक्तोपलब्धेर्वैयक्यासिद्धत्वाच्च
बहुनानिदाघपीतनिर्मलगंगाजलमाधुर्यस्यानुभवसिद्धस्यापलापासंभवान्मधुररूपवेन्नु क्तं एतेनहरीत

मु॰ टी॰ ३८ 38

कादौ न जलसंयोगेन माधुर्यमुपपद्यते येन कल्पनागौरवं परं तु हरीतक्यां न कषायवन्मधुररसोऽपि विविच्यते नन्वं
जकस्य जलसंयोगः ननु तज्जन्यरसान्तरस्य फलबलात् यदि चित्ररूपवच्चित्ररसे मानाभावात् तत्र विरोधेन नी
रसे वृहरीतकीरसः मनीति स्वावयवेषु रससत्वान्तरपरयेत्तु च्यते तथा लू जलसंयोगो हरीतक्यवयवगतमा
धुर्यस्यैव व्यंजकः स्यन्यथासि जलत्वजातावनुमानान्तरेण प्रमाणमाह एवमिति ननु जलत्वाभावेऽपि घृष्टच
न्दनादौ शैत्योपलम्भे व्यभिचारेण कथं जलत्वेन तत्र हेतुत्वमतआह घृष्टेति स्पर्शे शीतः एव स्पर्शे स्पृक्तं
साधयति तेजःसंयोगादिति तत्र जले विवेचयिष्यति च यावत्सम्भवमुपविष्टान् घृतादावित्यत्रादिपदेन तै
लादिपरिग्रहः जलस्यैव स्नेहः इत्युक्तानेन तदाश्रयसंयोगेन प्रतीयत इति शेषः तेन घृतादौ समवायेन स्ने
हनिरासेन जल एवेति स्नेहस्यावान्तरविशेषाभावात् इत्यनोकीर्त्तितः तदवच्छेदकं तदेव जन्यजलत्वमेव
तदवच्छिन्नजनकावच्छेदकं जलत्वमिति भावः अथैवं नित्यापरमाणुव्याहतमाद्यद्व्यणुकं जलत्वमेकं
परमाणुसाधारणं हि नीयमिति जलत्वजातिभेदाग्रहः कुत इति चेन्मम नियतयोग्यव्यक्तिवृत्तित्वादिति
एवमग्रेऽपि तैलादिर्वित्यत्रादिपदेन क्षीरपरिग्रहः ननु घृतस्य तत्र नैमित्तिकद्रवत्वसमवायेनैव सना
त इव तन्मिश्रणेन तदाश्रयसंयोगेन प्रतीयत इति शेषः ननु तैले जलसत्वे तैलस्य दहनानुकूलत्वं न स्यात् जल २०

स्यन्दनप्रतिकूलत्वादत आह स्नेहेत्यप्रकर्षेणेति प्रकृष्टस्नेहस्य जलस्यन्दनानुकूलत्वमेवापकृष्टस्नेहस्य स्यन्दनानुकू-
लत्वमेवापकृष्टस्नेहस्यैव नस्यन्दनप्रतिकूलत्वादिति भावः वर्तयतीति स्नेहनिवर्तयत्येवमस्य इति शेषः प्रथममव-
दिति षष्ठीसमर्थाद्वतिरित्यभिप्रायेणाह पृथिव्या इवेत्यर्थः एवमग्रेपि जलीयं शरीरमिति तन्न पार्थिवावयवैरुपष्ट-
म्भो वोध्यस्तेन नमात्रेहत्यपादादित्यव्यवस्थायां सम्भवेपि न क्षतिः ननु नादृश शरीरमानाभावोनुपलम्भादित्यत आ-
ह वरुणलोके इति तत्र श्रुतिरेव प्रमाणमिति भावः गंधेतिरसव्यंजके मनागपि चारवारणाय गंधाव्यंजकत्वे
सतीति कासारः सरः कारकादिरित्यत्रादिपदात्कूपादिपरिग्रहः कठिनत्वादिति समस्यमर्थे षष्ठी का चिद्विली-
नयोरिति पाठः सत्त्वं तु रेव विलीनतयाद्रवत्वं तया या जलत्वं तया या जलत्वव्यंजकत्वादिति भावः ननु वि-
लीनत्वे नैमित्तिकं द्रवत्वमेव तदुक्तं सूक्ष्मणेति तत्र तस्मिन्न जलत्वव्यंजकं यदि च विलीने तस्मिन्नित्यस्त-
स्मिन्नष्टे सतीत्यर्थः तथा च करकादिनाशोत्पन्नद्रवत्वे जलत्वस्य प्रत्यक्षत्वासिद्धता उक्तव्याप्त्यकाका-
दिग्वापि जलत्वमिति भावः ननु हिमकरकयोः पार्थिवत्वाभावे कथं काठिन्यप्रत्यय इत्यत आह अदृष्ट-
विशेषेणेति इति जलग्रन्थः इन्धनवेति उल्मवजातिसिद्धौ चेत्यर्थः ननु कथं तर्हि जन्यानामसमवा-
यिकारणाभिन्नेषु परमाणुषु तेजस्त्वजातिसिद्धिरित्यत आह तस्येति तेजस्त्वस्येत्यर्थः जलस्यैवेति यथा जन्य

मु॰
दी॰
३९
39

जलत्वावच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धिस्तथा जन्यतेजस्त्वावच्छिन्नजनकतया तेजः परमा
णावपि तेजस्त्वजातिनावच्छिन्नप्रतिसमवायेन तेजः संयोगत्वेन हेतुता तेजस्त्वजातिसिद्धिरित्यपि द्रष्टव्यं
चन्द्रकिरणादावित्यादिना चन्द्रकिरणादिसंग्रहः तत्रापि चन्द्रकिरणादावपि ननु तर्हि कुतो नोष्णस्पर्शप्रती
तिरित्यत आह किन्त्विति तु इत्यन्तः पातिजलस्पर्शेनेति चेद्विकिरणान्तर्गतजलभागस्पर्शेनेत्यर्थः
ननु चक्षुरादीन्द्रियस्योष्णस्पर्शस्य केनाप्यनभिभूतत्वात्तत्प्रत्यक्षापत्तिरत आह चक्षुरादौ चेति मत्किन्तु किर
णादावित्यादिस्पाद्रूपं शुक्लं भास्वरमिति मूले तत्र शुक्लेति स्वरूपकथनं भास्वररूपमात्रस्य शुक्लत्वेनापि
प्रसंगाभावात् भास्वरत्वं जातिविशेषः स च तेजोरूपमात्रवृत्तिः शुक्लत्वव्याप्यश्च ननु रूपाविषयकद्रव्य
प्रत्यक्षस्याभावाद्वैश्वानरादेस्त्वाक्षुषत्वानापत्तिरिति शंकते तद्रूपाग्रह इति वैश्वानरादेरचाक्षुषत्वेऽत
उद्भूतस्पर्शादिगुणानामपि चाक्षुषत्वं न स्यात् योग्यमात्रवृत्तित्वाभावादित्यपि नास्ति चेत् अनुद्भूतरूपे
रौ चेति वायवीयरूपेऽरौ वेत्यर्थः मातौ वरमाह वह्न्यालोकेति स्वर्णादिरूपे तेजस्त्वितत्त्वानादित्तिने न नासंभ
व इति भावः पृथिवीवृत्तीति नैमित्तिकद्रवत्ववृत्तीति द्रवत्वत्वरूपजातिमादाय पृथिवीव्याप्तिवारणाय पृथिवीवृत्ती
ति पृथिवीवृत्ति वायुत्वादिकमादाय वायावतिव्याप्तिवारणाय नैमित्तिकद्रवत्ववृत्तीति वायुतेजोऽन्यतर ३९

त्वमादायवा यावत्तिव्याप्तिवारणाय ज्ञातोति परकीयस्पर्शादिति गंधाद्यंजकत्वादित्युक्ते तद्धेत्वंतरस्य सूचनाया
दिपदेन गंधादिपरिग्रहः चक्षुषि परकीयत्वपादिव्यंजकत्वादसिद्धिवारणाय स्पर्शपदं इहकेचिदाहुः चक्षुर्वि
षयासंबंधमेव गृह्णाति कथं यदि प्राप्यकारि स्यात् तदा रसनादिवदधिष्ठानसंबंधमग्रहीष्यत् नचैवं गोलकासंबद्धग्रह-
णात् किंच यदि चक्षुः प्राप्यग्रहीष्यत् तदा शाखाधिकपरिमाणवन्नग्रहीष्यत् नखलु नखरजनिका परशुच्छे
द्यं छिनत्ति शाखाचंद्रमसोस्तुल्यकालग्रहणं नापपत्ति स्वगतिक्रमेण प्राप्यग्रहणे हि क्रमेण ग्रहणं स्यात्
नतुल्यकालमुपलंभः अनुभवति तून्मीलयत्येव नयने शाखां शीतमयूखं च एवं च प्राप्यकारित्वे च गोलक
मेव चक्षुः स्यात् न तेजसमिति तदसत् अधिष्ठानासंबद्धार्थग्राहित्वाः प्रदीपप्रभायाइव चक्षुषोपि प्राप्यका
रित्वसंभवात् पृथुतरग्रहणस्य च गोलकनिर्गतस्य महत्त्वात्तेषः एवंशीघ्रत्वेन प्रदीपप्रभायाइवोपपत्तेः
स्वाधिकपरिमाणवद्द्रव्यग्राहित्वाद्वहिरिंद्रियेण व्यभिचारात् नाहि शाखानियमे मानाभावाच्च तुल्यकालग्रहणं
चासिद्धमेव तदभिमानस्य कालसान्निकर्षेणैवोपपत्तेः अचिंत्यो हि तेजसो लाघवातिशयेन वेगातिशयो
यत्प्राचीनाचलचूडावलंबिन्येव भगवति मयूखमालिनि भवनोदरे प्यालोक इत्यभिमानो लौकिकानां य
दाहुः शालिकाचार्याः चक्षुर्वाह्यालोकाभ्यामारब्धेन च स्पर्शानावदर्थसंबंधे नयुगपत्तावदर्थग्रहणं

मु॰ टी॰ ५॰ ५०

मितिशाखाचंद्रमसोस्तुल्यकालग्रहणमुपपद्यतएवेति नन्वशोभनं चक्षुर्वाह्यालोकाभ्यामारब्धस्य चक्षुषः
एकभागेपिसत्वानेकभागास्थितपदार्थग्रहणापत्तेः एकदेशस्थवाह्यालोकेस्वस्तुरूपादेमानाभावश्चेति
चेदग्रदेशस्थवाह्यालोकेरपितद्रूपादेमानाभावः नदनभ्युपगमेपि चाक्षुषोपपादनस्याव्यपदमकृत्वा
दिति लोचवादाह अथवेति तैजसत्वेकिंमानमिति सुवर्णं पार्थिवं नैमित्तिकद्रवत्वादित्यनुमानस्यापा
र्थिवत्वेतैजसत्वसुवर्णस्य चानुमानात्सर्वमसिद्धापत्त्यासिद्धिः धर्मशास्त्रेपीतिमद्रव्योपिसुवर्णपदप्रयोगे
नतस्यापिसुवर्णे यद्वा व्याप्तयासुवर्णेयद्वा व्याप्तस्यपक्षतावच्छेदकत्वेपि वादानादवृत्त्यादितिवाच्या
अत्यंतानलसंयोगेसत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वस्यैवपक्षतावच्छेदकेन साध्यसिद्धेरुक्तेश्चपक्षतायाश्चपक्ष
तावच्छेदकहेतुभेदप्रयुक्तसामानाधिकरण्येनसिद्धसाधनस्यादोषत्वात् अत्यंतप्रतिबंधक इति जलमध्य
स्थघृतादौ व्यभिचारवारणायात्यंतप्रतिबंधके इति अग्निसंयोगानाशकद्रवत्ववति घृतादौ व्यभिचारवार
णाय संयोग इत्यंतं तेनाहशक्लघटसमानाधिकरणत्वेनाग्निसंयोगसमानकालीनत्वान्न व्यभिचा
रः अनुच्छिद्यमानद्रवत्वादित्यत्र यौनत्वाच्छिद्यमानद्रवत्वानाधिकरणत्वादिति गगनादौ व्यभिचारात् पूर्ववृत्ति
णा शंकनाम प्रयोजकतां निरस्यति नचेति अग्निसंयोगनाश्यत्वादिति एतज्ञोपलक्षणं अग्नेर्ग्रहस्यग्रहणमं ५॰

हिरण्यमित्याद्यागमानुपपत्तेरप्यनुकूलतर्कत्वादिति पतेनाशजन्यद्रवत्वनाशे व्यभिचारवारणाय द्रव्यत्वे आश्रयना-
शप्रद्रव्यत्वव्याप्तजातिविशेषकल्पयित्वा विजातीयद्रवत्वनाशं प्रत्यग्निसंयोगत्वेन हेतुता ही कार्या नच वैजात्ये प्रव-
णद्रवत्ववाप्तत्वमधीतिदर्शितानुकूलतर्कासंगतेः सुवर्णस्य पृथिवीत्वे तदीयद्रवत्वस्याग्निसंयोगनाश्यतावच्छेदकाना-
क्रांततया तत्त्वनाग्निसंयोगस्यापि नाशापत्तेरसंभवादिति परास्तेन्नोदः। चूर्णे तस्य पीतिमगुरुत्वाश्रयस्य प्रकारांतरेणात-
स्यतेजस्त्वं साधयता मतमाह अपरे त्वित्यादि तत्प्रतिबंधकं रूपपराहतिबंधकं अग्निसंयोगस्य तेजसस्सुवर्णेपि सत्वादु-
क्तं पातिमेति साध्ये विजातीयपदमुद्देश्यप्रसिद्ध्यर्थं हेतो सत्यंतमग्निसंयोगरहिते पूर्वरूपविजातीयरूपानाधारे यथे
व्यभिचारवारणाय अग्रे हेतो पृथिवीत्वे देयं तेन जलपरमाणौ न व्यभिचारः यथाकथंचिदग्निसंयुक्तघटे तद्वार-
णायासंत्वेति नचाप्रयोजकत्वं द्रवत्वनिरोधिद्रवद्रव्यसंबंधं विना पार्थिवाग्निसंयोगस्य पूर्वरूपविजातीयरूपजन-
कत्वादितिभावः नच द्रवद्रव्यादन्यदेव प्रतिबंधकं वाच्यं अदृष्टकल्पनापत्तेरिति तस्य चेति तस्य द्रवद्रव्यस्य पृथिवीज-
लभिन्नस्येति पृथिव्याः प्रतीकृतपीतिमाश्रयायाः विजातीयत्वाभावाज्जलस्य च तत्रासंभवादितिभावः तेजस्त्वनिय-
मादितिवा स्यादो रूपाभावादितिभावः नचांधकारे पीतरूपाश्रयद्रव्यग्रहापत्तिः सुवर्णरूपालोकस्सत्वादितिवाच्यं
उद्भूतानभिभूतरूपालोकसंयोगस्यैव द्रव्यप्रत्यक्षहेतुत्वात्सुवर्णे रूपस्याभिभूतत्वात् नच तदानीं पीतरूपस्याप्य-

मु॰ टी॰ ४२ ग्रहात्सजातीयग्रहणाकृतमग्रहणेनसुवर्णेरूपस्येति नतस्याभिमतत्वमितिवाच्यं लक्षुतयासजातीयसंबंधस्यैवाभि
भवपदार्थत्वात् नचतथाप्यंधकारेसुवर्णसाक्षात्कारापत्तिस्तेजोसि त्वद्रव्यप्रत्यक्षेप्रत्येवालोकसंयोगस्यहेतुत्वादि
तिवाच्यं सुवर्णभिन्नेघटेतेजस्त्वाद्भिन्नद्रव्यप्रत्यक्षेप्रत्येवतस्यहेतुत्वादिति नव्यास्तु सुवर्णपार्थिवमेवपीतंसुवर्ण
द्रुतमितिसाक्षात्संबंधेनद्रव्यत्वप्रतीतेर्भ्रमत्वायोगात् द्रुतेद्रुतत्ववमितिप्रतीतेद्रवत्वस्यापतत्वेतोच्छेदान्तरपि
पीतस्यपीतरूपस्यमवाधिकारणतावच्छेदकत्वात्पनाशेतादात्म्येनसुवर्णस्यविरोधित्वाच्चनपीतरूपनाश इति
वदंति इतितेजोग्रंथः वायोप्रमाणंदर्शयितुमूले पाकजोनुष्णाशीतस्पर्शस्तु तेनमतेइत्युक्तंतत्रापाकजाति
पदानांक्रमेणव्यावृत्तिमाह अनुष्णाशीतस्पर्शेति उक्तेमपाकजइतीति यद्यप्यपाकजानुष्णाशीतस्पर्शव
त्वंद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वंपाकजानुष्णाशीतस्पर्शवद्वृत्त्यनुष्णाशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्य
जातिमत्त्वंवातदर्थोवसेयः एतेनस्पर्शस्यानुष्णाशीतत्वादिकंयेनतज्जनकतावच्छेदकमिति तथाचविजा
तीयस्पर्शजनकतावच्छेदकतयावायुत्वजातिसिद्धिरित्यपिजातव्यंमूलेस्पर्शादिलिंगकइतिस्पर्शादीतिलिं
गानियस्यसतथा सुक्त्वावलंपाथतोति धृतिस्त्वगरुणाद्भव्यस्यायतनेविजातीयस्पर्शेनेति तृतीयात्र चतु
ष्कमनुमानादित्यनेनान्वितं अनुमितिप्रकारलापायत्त्वंयत्रद्रव्यासमवेतःस्पर्शःस्तुकचिदाश्रितःस्पर्शत्वा ४२

५१

न्पृथिवी स्पर्शवत् पृथिव्यादिस्पर्शे सिद्धसाधनवारणाय रूपवद्द्रव्यासमवेत इति पक्षविशेषणं एवमपि रूपव
द्द्रव्याभिचारेयो पर्णादिषु शब्दसन्तानः सस्पर्शवद्वेगवद्द्रव्यसंयोगजन्यः भज्यमानावयवद्रव्यसंयोगविषयश
ब्दसन्तानत्वात् दण्डाभिहतभेरीशब्दसन्तानवत् पृथिव्याद्यभिघातजन्यत्वेन सिद्धसाधनवारणाय सन्नीत्यादि
पक्षविशेषणं विभागजन्यत्वेन शब्दे व्यभिचारवारणाय हेतौ विभज्यमानेत्यादि सर्वं नभसि त्वरणात्ललसन्तनु
धिन्वविमानादीनां धृतिः सस्पर्शवद्वेगवद्द्रव्यसंयोगहेतुका अस्मदाद्यनधिष्ठितद्रव्यधृतित्वात् नौकादिधृति
वत् जलादिगतत्वरणादौ सिद्धसाधनवारणाय नभसीति प्रयत्नवदात्मसंयोगहेतुकधृत्यादौ व्यभिचारवार
णायास्मदादीति एवं रूपवद्द्रव्याभिघातमन्तरेण तृणकम्पः स्पर्शवद्वेगवद्द्रव्याभिघातजन्यविजातीयकम्पत्वा
त् नदीप्रवाहहतकाशादिकम्पवदिति अग्रे वक्ष्यते आत्मनिरूपणावसर इत्यर्थः मूले पूर्ववन्नित्यता युक्तमिति
पूर्ववन्नित्यता युक्तमिति पूर्ववज्जलवदित्यर्थः नित्यतादीत्यादिना नित्यत्वग्रहः उक्तं बोध्यमित्यर्थः एतदेवस
र्शयति मुक्तावल्यां वायुर्हि विविध इति नत्र हेतुषु मध्ये अयोनिजमेवेत्यर्थः पिशाचादीनां मरुतां लोके प्रसिद्ध
मिति शेषः ननु वायोस्त्वात्वादिवाग्व्यापाराभावात्कथं चरणाद्यभावात्कथं भोगायतनत्वमित्यत आह परेति
ति जलीयतैजसशरीरयोरप्याद्येयस्तुल्यत्वात् करणलाघवममीमेत्यसाधारणेन समानानमहं जली

मु॰ दी॰ ५२

यैतेजसवायवीयेति ननुतर्हिकथंजलीयत्वादिव्यपदेशस्तत्राह जलादीनामिति अत्रत्वगिंद्रिये यो विशेषो
घिष्ठानादिः शरीरव्यापकमिति नचनखलोमकेशादीनां त्वगिंद्रियानाधारत्वादसंभवइतिवाच्यं तेषामसंयो
गिद्रव्यत्वेन शरीरत्वाभावात् मूलस्य त्वगिंद्रियमित्यस्यानवच्छिन्नमिंद्रियमित्यर्थः एतेनदेहसहजावरण
त्वगित्युच्यते नत्वपार्थिवं मन्यत्वसिद्धं चेति तेनेंद्रियं नचवायवीयमिति परास्तं त्वगिंद्रियस्य लक्षणमाह स्पर्शे
ति कार्यमात्रजनककालादावतिव्याप्तिवारणायेंद्रियमिति चक्षुरादौ तद्वारणाय स्पर्शग्राहकमिति त्वक्
त्वगिंद्रियं नच त्वगिंद्रियं चयदेतत्स्पर्शनाभिव्यंजकत्वा[illegible]मिति वारणाय रूपादिष्विति मनसि व्यभिचारवारणाये
मेवकारः त्वगिंद्रियसन्निकर्षव्यभिचारवारणाय द्रव्यत्वे सतीत्यपि बोध्यं अंगसंगिसलिलस्वेदः आकारेस
शीतलपदभाष्यादौ प्राणस्यैकत्वेति कथंतर्हि पानादिव्यवहारस्तत्राह स्थानभेदादिति हृदिप्राणोगुदेपानः
समानोनाभिसंस्थितः उदानः कंठदेशस्थः व्यानः सर्वशरीरगः इतिस्थानभेदादित्यर्थः क्रियाभेदाद्वेति मुख
नासिकाभ्यां निःक्रमेणप्रवेशनात्प्राणः मलादीनामधोनयनादपानः आहारार्थपाकार्थवह्नेः समुन्नयना
त्समानः ऊर्ध्वनयनादुदानः नाडीमुखेषु विततनाद्व्यान इतिक्रियाभेदान्यथसंज्ञाजलमेतेनतुसंज्ञाभेदेन
संज्ञिभेद इतिभावः इतिवायुग्रंथः आकाशेति कालत्वेदिक्त्वे नजातिरित्यग्रेवक्ष्यं नलाघवेनाज्ञेयप्रसंगात् ५१

युगपदस्मिन्नित्तेन जातिरिति अनेकसमवेतत्वाभावादिति शेषः तेनैकव्यक्तिकस्य जात्यभावे हेतुतद्वैयर्थ्यादिकरणत्व
मितिप्रयुक्तं किंत्विति आश्रयत्वाच्चात्रसमवायेन विवक्षितमतेन कालस्य जगदाधारत्वेन शब्दाश्रयत्वेपि न क्षतिः मूले
वैशेषिकपदवैयर्थ्यमाशंक्याह वैशेषिकइतीति इत्थं च शब्द इति मूलं सावधारणं ज्ञेयं एतेन विशेषगुणत्वक
थनेन प्रमाणमित्यस्य आकाश इत्यादि तच्च शब्दः पृथिव्यादयष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे स
तिद्रव्याश्रितत्वादित्येवं रूपं बोध्यं दर्शितं हि चिंतेति अत्रानुमाने स्वरूपासिद्धिं परिहर्त्तुमाह तथाहीति घटादौ
व्यभिचारवारणाय चक्षुर्ग्रहणायोग्येति आत्मनि तद्वारणाय बहिरिंद्रियग्राह्येति रसादौ तद्वारणाय जाति
मदिति एतच्चानुमानमग्निमद्द्रव्यसमवेतत्वसाधकानुमानस्य स्वरूपासिद्धिनिरासायेति बोध्यं गुणत्वादिति
एतदनुमानेनोक्तपरिशेषानुमाने हेतोर्विशेष्यासिद्धिनिरासाविशेषणासिद्धिमुद्धारयत्याह शब्देति तस्य शेष
त्वे द्रव्यस्य पृथिव्यादिचतुष्टयस्य गुणादित्यर्थः अकारणगुणपूर्वकप्रत्यक्षत्वादिति अकारणगुणपूर्वकत्वे
सतिप्रत्यक्षत्वादित्यर्थः हेतुसत्त्वे प्रतिपादयितुं पाकजेति जलपरमाणौवेति अनित्यानां पार्थिवरूपादीनां
केषांचिदग्निसंयोगासमवायिकारणकत्वात्केषांचित्कारणगुणपूर्वकत्वादत्रोपेतानादिकालेति शब्दस्य
तु वर्तते नहि बहिरिंद्रियेति मनसोन्यदिंद्रियेति मनसोन्यदिंद्रियं बहिरिंद्रियं प्रत्यक्षत्वादित्यर्थः एतेन नात्मगुण

मु॰ टी॰ ८३

ग्रहणके इन्द्रियत्वं बाह्येन्द्रियत्वे तच्च मनस्यतिप्रसक्तं तेनापि रूपादिग्रहणादिति निरस्तं इत्थं चानेन प्रकारेण पृथिव्याद्
द्रव्याणामाश्रितत्वसिद्धौ च सिद्ध्यतीति शेषः कार्यविशेषानुमानेन नासिद्ध्यतीत्यर्थः ननु चैतत्सर्वं तदेव स्याद्यद्येतद्यदि शब्दस्य
विशेषगुणत्वे किंचित्प्रमाणं स्यात् तच्चैव नास्तीत्याशय इति चेन्न शब्दो विशेषगुणः लौकिकप्रत्यक्षत्वे सत्येकेन्द्रियग्राह्यत्वे स
ति लौकिकप्रत्यक्षप्रत्यक्षैकेन्द्रियग्रहणयोग्यतावच्छिन्नस्य च सति गुणत्वव्याप्यजातिमत्त्वादित्यनुमानेनैव तत्र प्र
माणत्वात् प्रभाप्रमादायतद्वारणाय प्रथमं सत्यन्तं संख्यात्प्रमादायतद्वारणाय द्वितीयं सत्यन्तं सांसिद्धिकद्रव
त्वस्नेहधर्माधर्मभावनासु प्रकृतहेतोरभावेऽपि तद्धेत्वन्तरेणैव विशेषगुणत्वं साधनीयमिति सर्वोक्तानुमाने
बाधस्वरूपासिद्धि चाशंकते नचेति वायविति तथा च स्पर्शो वायुगुणत्वप्रसक्त्वात् तदभावसाध इति भावः कारण
गुणपूर्वकत्वकथनं नकारणगुणपूर्वकत्व चाद्धेतौ हेत्वर्थसिद्धिप्रदर्शनार्थं अयावद्द्रव्यभावित्वेनेति स्वाश्रयना
शजन्यनाशप्रतियोगियावत्ताद्धित्वेनेत्यर्थः ननु तथाप्याकाशे प्रत्यक्षमेव प्रमाणं किमिति नोपात्तमिति चे
न्न चाक्षुषत्वे प्रयोजकस्य महत्त्वे सत्युद्भूतरूपवत्त्वस्याकाशेऽभावेन च त्वाचः प्रमाजनकाभावात् ननु यथाकाशा
न चाक्षुषस्तदेह यत्तीति चाक्षुषाधिकरणेन किं भासते इति चेदालोकवत्तेति यद्विकल्प ननु आकाशीयश
ब्दविषययोः प्रदर्शनमनुचितं नाकसिद्धि प्रदर्शनसिद्धिमभवेच्छोत्रसिद्धानेनग्रन्थेन क्रियते इत्याशंक्याह ८३

तत्रचेति आकाशेचेत्यर्थः कर्णशष्कुलीभेदादिति चैत्रादिकर्णशष्कुल्यवच्छिन्नमाकाशं चैत्रादिश्रोत्रमितिभावः
नत्वात्मशब्दनिमित्तकारणत्वेन तत्पुंसोऽदृष्टस्यैव शब्दसमवायिकारणत्वं नचैवमदृष्टस्य शब्दसमवायिकारणत्वे जीव
स्यैवात्मत्वविनिगमनाविरहः जीवस्य शब्दसमवायित्वे ज्ञानवच्छब्दस्यापि मानसत्वापत्तेः अदृष्टस्यादिवत्प्रतिबं
धकत्वकल्पने चातिगौरवं नचैवं कर्णशष्कुलीविवरावच्छिन्नस्याकाशस्य कथं श्रोत्रत्वोपपत्तिरिति वाच्यं
तथाविधस्यादृष्टस्यैव श्रोत्रत्वोपपत्तेरित्याहुः स्वतंत्रास्तु मृदंगादीनामेव गुणः शब्दः शब्दं प्रति मृदंगादिना
दिनां समवायिकारणतायाः स्वीकारान्न प्राचीनैरपि मृदंगावादिना निमित्तकारणतायाः स्वीकारान्मृदंगे शब्द
इत्यादिप्रतीतेश्च तत्रावच्छेदकत्वं विषयः मानाभावात्कल्पनात्तत्रावच्छेदकताख्यस्वरूपसंबंधस्यान्यत्र
समवायस्य कल्पने गौरवादिति वदंति इत्याकाशग्रंथः मूले जन्यानां जनक इति कार्यत्वावच्छिन्नं प्रति
निमित्तकारणमित्यर्थः अत्र च कालिकसंबंधावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपितमधिकरणतया
निमित्तत्वं काललक्षणं कालिकसंबंधावच्छिन्नेति करणाद्धि घटादिकरणेतिकरणादृष्टेश्वरयोर्नाति
व्याप्तिरिति बोध्यं ननु कार्यमात्रं प्रति कालस्य निमित्तकारणत्वे किं मानमिति चेदत्राहुः अद्य घटो भविष्य
तिघ्नः घटो भवितेत्यादिप्रत्ययेन तत्तत्कार्योत्पत्त्यधिकरणत्वेन कालो विषयीक्रियते तदुत्पत्त्यधिकरणत्वेन च

मु॰
टी॰
५५

वहारविवहारविषयस्य तदुत्पत्तिहेतुत्वनियमात् तदुत्पत्तित्वस्य हेतुत्वव्याप्यत्वात् एवं च तत्तत्कार्यविशेष
प्रति तत्तत्कालविशेषस्य हेतुत्वे सिद्धे याहि शोष यो गिति व्याप्तमेकार्यमात्रे कालस्य हेतुतासिद्धिरिति सा च हे
तुता निमित्तकारणत्वेन न च कालस्य कार्यमात्रे हेतुत्वं न संभवति स्वसमवेतद्वित्वपृथक्त्वसंयोगविभागप्र
तिकालस्य समवायिकारणत्वेन तादृशत्वस्य चाहितस्य निमित्तकारणत्वस्य तत्राभावादित्याचार्योक्तशंके
समवायसंबंधेन द्वित्वादिकं प्रति तस्य समवायिकारणत्वेपि कालिकसंबंधेन द्वित्वादिकं प्रति निमित्तका
रणत्वस्यानपायात् एवमेकार्यमात्रे दिशोपि निमित्तकारणत्वं बोध्यमुक्तावल्यां तत्रेति तत्र कालेजग,
तामाश्रय इति कालः सर्वेषामिति प्रत्यासर्वाधिकरणत्वेन कालसिद्धिरिति भावः ननु एतादृशप्रतीति
दिविषयित्वेवास्तु अतिरिक्तकालकल्पने गौरवादतो न केवलमनया प्रतीत्या कालः सिद्ध्यति किंत
प्रमाणान्तरेणाकाले सिद्धे सकलप्रतीतिबलात् सर्वाधारत्वं कल्प्यत इत्याहुः इदानीमित्यादिनाह सूर्य
परिस्पन्दादिकमिति प्रतीतिमहाकालविषयीकरोतीवाच्यं तथा सति इदानीं घटो न तदानीमिति प्रत्य
यानुपपत्तेः न च तत्तत्क्रियाविशिष्टमहाकाल एवेदानीमित्यादिप्रत्ययविषयस्तथेदानीं घटो न तदानीमित
सायतत्तत्क्रियाविशिष्टमहाकाल इत्यर्थ इति वाच्यं तथा सति तत्तत्क्रियाविशिष्टमहाकालापेक्षयालाघ ५५

वेनतत्तत्क्रियायाएवतादृशप्रतीतिविषयत्वस्योचितत्वात् इतिप्रतीत्यनंतरंस्वाश्रयतपनसंयोगिसंयोगएवसंबंधो
वाच्यस्तत्रेति विशेषः नचाकाशएवसंबंधघटकआत्मास्तामितिवाच्यं आकाशादिमात्मनांविनिगमनाविरहेण
तिरिक्तैककालस्यैवन्याय्यत्वात् इत्यंचेति अतिरिक्तकालसिद्धौ चेत्यर्थः सम्पागिति कालःसर्ववातीतिप्रतीतेरति
रिक्तकालविषयत्वस्योचितत्वात्इतिभावः परत्वापरत्वबुद्धेरिति ज्येष्ठेपरत्वप्रत्ययः कनिष्ठे अपरत्वप्रत्ययः
सचपरत्वगुणविषयाधीनः परत्वापरत्वेचस्वासमवायिकारणकेभावकार्यत्वादसमवायिकारणंचतयोःका
लपिंडसंयोगएवेतिपरत्वयोरसमवायिकारणसंयोगाश्रयतयाकालसिद्धिरितिभावः परत्वापरयोरित्यपिस्व
ववत्तुमुचितत्वेपितद्बुद्धिपर्यंतानुधावनेकालिकपरत्वयोःप्रमाणंदर्शयितुंतेनचपिंडगतत्रूपादेरेवपरत्वासम
वायिकारणत्वमास्तामितिवाच्यं कालिकपरत्वापरत्वयोर्वापाकजन्याव्यभिचारादेवपृथिवीपिंडसंयोगस्यतत
त्कारणत्वेपृथिव्यांसंयुक्तपदार्थेपिपरत्वयोरुत्पादेनव्यभिचारात् ननुतथाप्याकाशादिगात्ममनोभिःपिंडसंयो
गस्यतत्त्वाथास्तांकिंकालकल्पनयेत्यतआह लाघवादितिआकाशादिगतपिंडसंयोगस्यतत्त्वेजीवात्मभिःप्र
त्येकंविनिगमनाविरहात्सममनस्मोत्वंनतत्त्वात्तथात्वंकिंतुलाघवादतिरिक्तःकालएवतत्त्वेनकल्प
नइतिभावः ननुयदिकालएवएवतदातत्क्षणलवकाष्ठादिव्यवहारस्तत्रनस्यान्नचेकाम्येत्रेवघटेघटःकल

मु॰
टी॰
४५

श्यः कुंभ इति व्यवहारवदत्रापि क्षणादिव्यवहारे बाधकाभाव इति वाच्यं एकस्मिन्निरुद्धनानाव्यवहारयोगात्तन्न
ह्यित्घटकलशत्वादिना नादिकं विरुद्धमेव नहि दिनं क्षण इति प्रतीतिरस्तीति शंकते नन्वेकस्येति समयभे
दः समयभेदव्यवहारः विभिन्नव्यवहारविषय इति यावत् एकस्मिन्निरुद्धनानाव्यवहारविषयकत्वाभा
वादिति भावः उपाधिभेदादिति तथा चैकस्य कालस्य किंचिद्धर्मविशिष्टस्य क्षणत्वं किंचिद्धर्मविशिष्टस्य
दिनत्वं न केवलकालस्येति भावः उदयलक्षणं तादृशोपाधीनामेव क्षणत्वादिव्यवहारविषयत्वेन तु
महाकालस्येति इष्टत्वात् स्वजन्येति स्वक्रियाघटगतैकक्रियानाशोत्तरोत्पन्नतज्ज्ञतक्रियान्तरजन्यविभागभा
वविशिष्टस्य प्रथमकर्मणः क्षणचतुष्टयावस्थायिनः क्षणत्वापत्तेरतः स्वजन्येति नन्वेवं प्रथमक्षणे क्षण
व्यवहारोपपादनेपि द्वितीयक्षणे कथं तदुपपादनेन तत्क्रियाजन्यविभागोत्पत्त्या विभागप्रागभावाभावात्
न च द्वितीयक्षणत्वं तत्क्रियान्तरस्यैव निरुक्तविशिष्टस्य न तु क्षणत्वमिति वाच्यं प्रतिक्षणं क्रियोत्पत्तेरमाना
भावात् तत्रत्रापि क्षणव्यवहारोपपादकमुपाधिमाह पूर्वसंयोगेति स्वजन्यविभागनाशपूर्वसंयोगविशिष्ट
स्वजन्यविभाग इत्यर्थः तेन स्वजन्यविभागस्य यत्किंचित्संयोगविशिष्टस्य द्वितीयक्षण इति वोपि यत्किंचि
द्विभागस्य स्वजन्यविभागनाशपूर्वसंयोगविशिष्टद्वितीयक्षणत्वं तनिवेपि तथात्वापत्तिः तृतीयक्षणेत ४५

डपपायकमनुपायकमनुपाधिमाह एवंसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वेति स्वजन्यविभागजन्यपूर्व
संयोगनाशावच्छिन्नस्वजन्योत्तरसंयोगप्रागभाव इत्यर्थो न्नातिप्रसंगः क्वचित्पुस्तके एवंसंयोगनाशावच्छि
न्नविभागो वेति पाठः स च प्रामादिकः प्रथमद्वितीयचलनयोर्लक्षणेषु एकैकोपाधेरेवाभिहिततया तृतीयलक्षणे
ऽप्युपाधिद्वयाभिधाने सन्दर्भविरोधापत्तेः उत्तरसंयोगस्यैव विभागनाशकतया सिद्धत्वेन तया निरुक्तोपाधि:
लक्षणद्वयाव्याप्त्यापत्तेः लक्षणत्रयोपादाने यदि च तत्पाठः प्रामाणिकस्तदाग्रहः तदा एवंसंयोगनाशस्यैव विभाग
नाशकत्वाभिप्रायेण संयोजनीयः चतुर्थलक्षणमाह उत्तरसंयोगेति स्वनाशकोत्तरसंयोगेत्यर्थः तेन सर्व
स्यैव संयोगस्योत्तरसंयोगतया न हि विशिष्टकर्मणः लक्षणे चलनस्याव्याप्त्यापत्तेः लक्षणत्वापत्तिर्निरस्ता न चै
तादृशलक्षणलक्षणं महाप्रलयात्मकक्षणे व्याप्तं तत्र तादृशकर्मत्वाभावात् न च महाप्रलयस्य क्षण
त्वाभाव इष्ट एवेति वाच्यं तत्राप्यक्षणव्यवहारस्य सत्त्वात् अन्यथा महाप्रलयोत्पत्तावुत्पत्तिलक्षणस्यानादा
धिकरणक्षणवृत्तित्वव्याप्तस्ववृत्तिध्वंसप्रतियोगिताकसमयावृत्तित्वस्वरूपस्याव्याप्त्यापत्तेः तत्र महाप्रल
याधिकरणक्षणपरिहाराय आह महाप्रलयेति महाप्रलये क्षणव्यवहारो नास्त्येव तदुत्पत्तिलक्ष
ण""स्येन चेति स्ववृत्तिध्वंसप्रतियोगिमहाप्रयात्मकक्षणकयावद्ध्वंसविशिष्टसमयस्यैव तत्र क्षण

मु॰
टी॰
५९

व्यवहारविषयत्वादितिभावः इतिकालग्रंथः ...... प्रयोजकं कथं दिशामत्र प्रयोजकत्वं तत्दर्शयति देशिकेतिपर
त्वापरत्वबुद्धिं प्रतिपरत्वेति निमित्तेन तत्तद्दिक्पिंडसंयोगस्तत्तद्दिगितिक्रमेण परेपरयादिशस्तद्द्वौ निमि
त्तत्वं बोध्यं अत्रापि बुद्धिपर्यंतानुधावनं देशिकपरत्वापरत्वयोः प्रमाणादर्शयितुं ताद्दशपरत्वापरत्वेतिमित्त
त्तद्दिक्पिंडसंयोगस्तत्तद्दिगितिक्रमेण परेपरयादिशस्तद्द्वौ निमित्तत्वं बोध्यं अत्रापि बुद्धिपर्यंतानुधावने
भ्यामेवतदनुमितेः संभवादिति प्रतीच्यादीत्यादिनोदीच्यादिसंग्रहः उपाधीति वस्तुतोदिशएकत्वेपितत
दुपाधिभेदेन प्राच्यादिसंज्ञाभेद इतिभावः प्राच्यादिसंज्ञास्तुनिमित्तभूतानुपाधीनाह यत्पुरुषस्येति पु
रुषस्येतिपदार्थमात्रोपलक्षणं पंचम्यर्थेषष्ठीदिक्त्वं तंएवमग्रेपि तथाच यदपेक्षयोदयगिरिसन्निहितय
न्मूर्त्तं सा ततः प्राचीत्यर्थः तदपेक्षयोदयगिरिसन्निहितंयन्मूर्त्तं सा ततः प्राचीत्यर्थः तदपेक्षयोदयगिरि
सन्निहितं यन्मूर्त्तं सा ततः प्राचीत्यर्थः तदपेक्षयोदयगिरिसन्निहितं यन्मूर्त्तं सा ततः प्राचीत्यर्थः तद
पेक्षयोदयगिरिसन्निहितत्वं चतन्निष्ठोदयगिरिसंयुक्तसंयोगापेक्षयाल्पतरोदयगिरिसंयुक्तसंयोग
वत्वं इत्थं चमयूखायाः प्राच्याप्रयोगइत्यत्रमयूखनिष्ठोदयगिरिसंयुक्तसंयोगपर्याप्तसंख्याख्यसंख्या
पर्याप्त्याधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्त्तंवृत्तिः प्रयागइत्यत्र यतोधः एवंकाशीतः प्रतीच्यां प्रया ५९

गङ्गात्रकाशीनिष्ठोदयगिरिसंयुक्तसंयोगपर्याप्तसंख्याव्याप्यकसंख्यापर्याप्त्यधिकरणोदयगिरिसंयुक्तसं
योगवत्त्वमितिवृत्तिः प्रयागादन्वयबोधः एवमन्यत्रापि बोधा ऊहनीयाः तन्निष्ठोदयाचलसंयुक्तसंयोग
परंपराघटकेयत्त्वं तेन तत्प्राचीत्यपि वदंति दीधितिकृतस्तु दिक्कालौ नेश्वरादतिरिच्येते मानाभावात्त
त्कालोपाधिदिगुपाधिविशिष्टादीश्वरादेव तत्तणदिनप्राचीप्रतीच्यादिव्यवहारोपपत्तेरित्याहुः
नचनव्याः ईश्वरस्यादिकालत्वोपगमे तत्तज्जीवस्यैवेति विनिगमनाविरहेणातिरिक्तयोरेव तयोः स्वीकारः न च तत्तज्जी
वस्य जगज्जनकत्वे परत्वापरत्वजनकत्वकल्पनमीश्वरस्य तु क्लृप्तमिति लाघवमिति वाच्यं संबंधघटकया
दिक्कालयोर्जगज्जनकताकल्पनादिकालोपाधीनामेव जगज्जनकत्वकल्पनात् परत्वापरत्वयोस्तु गुणत्वेन
एवमानाभावात् सन्निकृष्टविप्रकृष्टाभ्यामेव परापरव्यवहारोपपत्तेरिति वदंति इति दिक्॥ इयणां सुखदुःखा
दीति आदिना ज्ञानेच्छाद्वेषप्रयत्नधर्माधर्मभावनापरिग्रहः यद्यप्यात्मनः स्वात्मत्वप्रत्यक्षत्वेपि स्वात्मनि
स्वत्वरूपतो मानसप्रत्यक्षविषयत्वमस्त्येव तथापि सकलात्मसाधारणानुगतप्रत्यक्षासंभवेन ननत्वच्छितज्ञाति
नग्रहे अनेकव्यक्तिग्रहहेतुत्वस्य सर्वत्राभिहितत्वादित्यनुमानमेव न च प्रमाणमित्यभिप्रायेण सुखादिकारणता
वच्छेदकतयात्मसिद्धिं प्रदर्शिताः अथ सुखत्वावच्छिन्नं प्रत्यात्मत्वेन कारणत्वे मानाभावः सुखदुःखच्छे

मु॰
टी॰
५८

षभावनाधर्माधर्मान्यतिरयथाकर्मेण धर्माधर्मौ निरूप्य साधनमादिज्ञानानुभवविहितकर्मनिषिद्धकर्मणां समवा
यसंबंधेन निमित्तिकारणत्वावश्यकत्वयातिप्रसंगभंगाद्भावकार्याणां समवायकारणकत्वनियमस्य तु द्रव्य
त्वेन तत्तद्व्यक्तिसंभवे तेष्वनितत्तद्व्यक्तित्वेन समवायिकारणत्वमादायैवोपपन्नत्वादिति चेदत्र प्राचः कार्यमात्रवृत्ति
जातेः समवायिकारणकार्यतावच्छेदकत्वनियमेन तमादाय दृष्टपकार्यकारणभावस्यावश्यकत्वात् न च तावतापि स
मवायवच्छिन्नं प्रति सत्त्वेन द्रव्यत्वेन वा कारणत्वमस्तु अदृष्टस्य तु निमित्तकारणत्वादेवातिप्रसंगविरहादिति वा
च्यं व्याप्यलघुभूतधर्मेण कारणतावच्छेदके संभवति व्यापकधर्मेण कारणत्वकल्पनायां अन्याय्यत्वादित्याहुः
वस्तुतस्तु मनसि ज्ञानोत्पत्तिवारणाय ज्ञानभावच्छिन्नं प्रत्यात्मत्वेन हेतुत्वमावश्यकमिति नन्वेतथाप्यात्मत
ज्ञाते भगवदात्मसाधारण्ये प्रमाणाभाव इत्यत आह ईश्वरमिति आत्मा वा अरे द्रष्टव्य इत्यादिश्रुतावात्मपदव्यवस्था
रादिति भावः ननु हीश्वरे सुखाद्युत्पत्तिः कुतो न भवतीत्यत आह अदृष्टादीति आदिना शरीरपरिग्रहः ननु नित्य
स्यास्तु ज्ञानयोग्यत्वे फलावश्यंभाव इति नियमेनेश्वरस्य सुखयोग्यत्वे फलोपधानापत्तिरित्यत आह नित्यस्येति
अप्रयोजकत्वादिति जलपरमाणौ स्नेहानुत्पत्त्याऽतादृशनियमे मानाभावादिति भावः नन्वीश्वरेऽदृष्टं कुतो नोत्प
द्यत इति चेन्न मिथ्याज्ञानरूपकारणाभावात् मिथ्याज्ञानस्याहेतुत्वे च मुक्तात्मन्यदृष्टोत्पत्तिप्रसंगः वेदस्या ५८

त्मपदादेर्ज्ञानादिमत्तिलक्षणायतिविरूपस्वरसमाह चिन्त्यनेन स्वचितः इंद्रियाद्यधिष्ठातेति मूलमात्मनेप्रमा-
णपरतयाव्याचष्टे इंद्रियाणामिति आदिपदसंग्राह्यमाह शरीरस्येति परंपरयाजनकतासंबंधेनावच्छेदकतासं
बंधेन च चैतन्यं ज्ञानवत्त्वं एवात्मनि प्रमाणमुपदर्शितं अचेतनाधिष्ठिततया करोतीति व्याप्तेः अहं सुखीत्या-
दीत्यादिनाह ज्ञानाधिकरणीत्यादिपविग्रहः नचात्माज्ञावन्नप्रत्यक्षइति सूत्रभाष्यविरोधइति वाच्यं आत्मत-
त्वविवेकपरत्वात्माभिप्रायेण भाष्यव्याख्यानस्य प्रदर्शितत्वात् विप्रतिपन्नमतीति अहमिति प्रतीतेः शरीरा
द्यतिरिक्तविषयकत्वे विप्रतिपन्नं प्रतीत्यर्थः नैयायिकमते यथा मुक्तात्मनां ज्ञानाभावेन ज्ञानाधिकरणत्वं
रूपं न चैतन्यं तथा ममापि मते मृतशरीरस्य न चैतन्यमिति शरीरमेवात्मेतिवादी चार्वाकः शंकते ननु चैत-
न्यमिति ज्ञानाधिकं ज्ञानाद्यधिकरणत्वं तदभावे ज्ञानाद्यभावे ननु तन्मते मृतशरीरे चैतन्याभावः किंनिबं-
धनः मन्मते तु प्राणविशिष्टात्मनो विरह एव तत्र प्रयोजकस्तत्र आह प्राणाभावेनेति तथा च लाघवा-
त्प्राणाभाव एव चैतन्याविरहे प्रयोजक इति भावः ननु बाल्यशरीरे तद्वृत्तेष्वेव तत्र आह शरीराणामिति सं
स्कारद्वारा यत इति तथा च स्वप्रयोज्यसंस्कारसंबंधेन बाल्यशरीरसम्बन्धेनानुभवस्य स्थविरशरीरस्य तानस्म-
रणानुपपत्तिरिति भावः गौरवस्य फलमुखत्वान्नादूषणं तत्र माह एवमिति नस्यादित्यत्र हेतुमाह इष्टेतिनेह

मुः
टीः
५८

तत्वात्प्रवृत्तिहेतुत्वात् तदानीं स्तन्यपानकृत्यव्यवहितपूर्वकाले ननु प्रवृत्तस्तन्यपानानुपपत्तिस्तवापि समानेत्याशंक्या-
स्वयमेत्य प्रवृत्तस्तन्यपानानुपपत्तिं परिहरति मन्मतेनेति अन्यदपीति इष्टसाधनत्वादन्यदपीत्यर्थः अत्र तत्स्तन्या-
पाने प्रवृत्त्यनुकूलेष्टसाधनतास्मरणात् आत्मनो नित्यत्वं साधयतीत्यर्थं चेति प्रागभावस्य नाशासंभवादाह भा-
वस्य नाशासंभवादिति नाशंप्रति जन्यभावत्वेन हेतुत्वादात्मनोनादित्वेन नाशासंभवादित्यर्थः ननु चक्षु-
रादीनामेव ज्ञानादिके प्रति करणत्वं कर्तृत्वं चात्मनीति करणत्वं च व्यापारवत्वे सति कारणत्वं भवति चक्षुरादे-
चक्षुःसंयोगादिरूपव्यापारवत्तिचात्तव ज्ञानाव्यवहितपूर्वकालवृत्तित्वं न फलोपाहितत्वं राजसूयेन स्वारा-
ज्यकामो यजेतेत्यादौ यागादिनिष्टकरणत्वादाव प्रसंगात्करणत्वयोर्विशेषप्रसंगात्करणत्वयोरविशेष-
प्रसंगाच्च कर्तृत्वं च यद्यपि क्रियानुकूलकृतिमत्वं तत्संभवत्यचेतने चक्षुरादौ तथापि सर्वप्राहिरणातिरिक्तस्या-
त्मनः कृत्यादीनामात्मसमवेतत्वस्य चानेनाकरणात्कृत्याश्रयत्वमपि चक्षुरादीनामात्मित्यर्थः ननु कस्यैव कर्तृ-
त्वेकरणादिव्यवहारभेदानुपपन्न इत्यत आह विरोध इति विरोधविभन्नाधिकरणवृत्तित्वेन तथा च कर्तृत्वकरण-
त्वादिलक्षणयोधर्मभेदात्कर्तृकरणादिव्यवहारभेदोपपत्तिरित्याशयः नचेतनत्वामित्यत्रविशेषणतयोपास्थि-
तस्याभावस्य तत्त्वकुचृत्वेनपरामर्शासंभवाद्व्याचष्टे तथात्वेचेतनत्वव्वमिति उपघात पदस्य लोके व्ययवनाशय ५८

वप्रयोगादाह नाशइति मूले उपघाते नत्वं स्मृतिरित्युक्तं तत्रोपघातः केषामित्याकांक्षायाः सत्वादाह अर्थादि
ति नयाचैकमेवेंद्रियाणामिति यदमाकांक्षायां शाड्डमयत्रस्तेवद्युत इत्याशयः कथं स्मृतिरिति मूलेमेंद्रिया
णां चैतन्ये चक्षुरभावे स्मृत्यभावआपादितस्तत्रहेतोरनुक्तेः स्वयं हेतुं पूरयन्नर्थमाह पूर्वंचक्षुषेति नन्विंद्रि
यांतरेणैव स्मृतिर्भविष्यतीत्यआह अन्येनानुभूतस्येति अत्र हेतुमाह अनुभवेति यद्यपि व्यधिकरणयोः
कारणाभावविरहात्सामानाधिकरण्येनेत्युक्तिर्विफला तथापि यत्र विषयतासंबंधेन स्मृतिस्तत्र विषयतासं
बंधेनानुभव[illegible] हृशाविषयत्वघटितसामानाधिकरण्यप्रत्यासत्त्याकार्यकारणभावआवश्यक आत्मनिष्ठ
सामानाधिकरण्यघटितकार्यकारणभावेनत्वघटायनुभवोत्तरपटादौविषयतासंबंधेनस्मृत्यापत्तेरसंभव
दिति इत्थं च चक्षुः कर्तृकानुभवस्य घटे सत्वादिंद्रियांतरककर्तृकं स्मरणं तत्र नानुपपन्नमित्याशंकांनिराकार
णायतथोक्तिः समवायघटितसामानाधिकरण्यप्रत्यासत्त्येतितदर्थः चैत्रस्यघटानुभवकालेमैत्रस्यघट
स्मरणवारणायतन्निरूपितत्वनिवेशः पुरुषभेदेनानंतकारणभावकल्पनेगौरवात्समवायघटितसामाना
धिकरण्यप्रत्यासत्त्यातयोर्हेतुमद्भाव इत्याकारादितिभावः इतिध्येयं इंद्रियाणां चैतन्यपक्षे योदोषः सोध्यत्रक
ल्पनायामस्तीतिसूचयितुं नित्यस्येति ननुतथेत्यत्रमूलेतच्छेदेनसर्वोपास्थितचैतन्यस्यैवपरामर्शः स्यात्तथाच

स्तु॰
टी॰
५९

संगतिरत आह तथा न चेतनमिति अनधीस्वं तदा भवेदिति मूलेन मनसः स्वैर्वे नन्वेज्ञानादेरभ्यस्य दानमुक्तं तत्र
हेतुं प्रदर्शयन्नर्थमाह मनसेति नन्वस्य सेतिज्ञानानात्मत्वमनुपपत्तेरित्यर्थः ननु मनसोऽणुत्वमेवासिद्धम
तमाह यथाचेति अग्नेर्वत्स्यतइति अयोगपद्याज्ज्ञानानां तस्याणुत्वमिह सिध्यतइति ग्रन्थेन मनसोऽणुत्वं साधयि
ष्यतइत्यर्थः विज्ञानवादी शंकते नन्विति विज्ञानमेवेति आत्मनि त्वयणस्य प्रसक्तुं तत्वादात्मेत्युक्तं वस्तुमात्र
स्यैव तन्मते विज्ञानरूपत्वादितिवोध्यं अत्र ज्ञानत्वमपि यत्र स्वत्वस्य वा व्यापकं नवेति विप्रतिपत्तिः तत्र विधि
कोटिर्योगाचारस्य निषेधकोटिर्नैयायिकस्येति ध्येयं द्विविधं विज्ञानं प्रवृत्तिविज्ञानमालयविज्ञानं चेति तत्राद्य
त्वटइत्यादि प्रवृत्तिविज्ञानं अहंजनामि इत्यालयविज्ञानं तदेवात्मा तस्य विज्ञानस्य ननु स्वभावात्मा न सिध्येत
पूर्वोक्त्या न विज्ञानस्य क्षणिकत्वेन नाशाद्विज्ञानोत्तरस्य च तदानीमुत्पादकाभावादत आह एवंसर्वेति ननु वि
ज्ञानस्य क्षणिकत्वे तदाश्रितसंस्कारस्यापि क्षणिकत्वात्कालान्तरे स्मरणं न स्यादित्याशंकां परिहरति मृगमदेति
विज्ञानस्य जगद्विषयत्वं यत्किंचिद्विषयत्वं वाभिप्रेतमिति विकल्प्याद्ये दूषणमाह तस्येति द्वितीये त्वाह यत्किंचि
दिति आत्मत्वविज्ञानस्य सविषयकत्वे दूषणमाह स्वभावेति शंकते तदानीमिति निराकाराणि निर्विषया
चित्संततिर्विज्ञानसंततिः प्रकाशत्वेज्ञानत्वस्य विषयता व्याप्यत्वादिति भावः अन्यथा प्रमाणाभावेपि तत्त्वसा ५९

नन्वस्तिाकारे आकारस्य विज्ञानातिरिक्तत्वमनतिरिक्तत्वं वेति विकल्पाद्येदूषणमाह तर्हि समायातमिति द्वितीये
त्वाह समूहालंबन इति नीलः पीत इति समूहालंबनज्ञानस्येत्यर्थः स्यादिति तदभिन्नाभिन्नस्य तदभिन्नत्वनियमादि
ति भावः एतद्दोषपरिहारयति स्वरूपत इति विज्ञानस्य स्वरूपस्येत्यर्थः अविशेषादेकत्वात् ननु नीलाकारः पी
ताकारस्याभिन्न एव भेदप्रतीतिस्तु तद्धर्मयोर्नीलत्वपीतयोर्भेदान्नचनयोरपि विज्ञानस्वरूपत्वादभेदः नी
लत्वादेरपारमार्थिकस्य पारमार्थिकविज्ञानेनाभेदासंभवादित्यभिप्रायवान् शंकते अयोरुरूप इति अनी
लव्यावृत्तिरूप इत्यर्थः इतरथा विरुद्धनीलत्वादीनामेकत्र समावेशो ननु समूहालंबनेन नीलाकारेण
वा पीताकारोऽभ्युपेयते परं तु चित्राकार एवेति नोक्तदोष इति पूर्वोक्तवासनासंक्रमं मुख्यतया दूषय
ति नवेति मातृपुत्रयोरिति मात्रानुभूतस्य गर्भस्थेन तनयेन स्मरणप्रसंगादिभावः उपादानेनानुभूतमुपादेयेन
स्मर्यत इत्यपि निरस्यति नचेति शंकते उत्तराग्निरिति तदुत्पादकेति वासनोत्पादकेत्यर्थः चितामेव ज्ञानानामेव सं
स्कारोत्पादकत्वे तेषामानंत्यात् संस्कारानंत्यापत्तिरित्यर्थः शंकते तत्तत्क्षणिकेति अतिशयविशेषः उत्तरोत्तरज्ञानानु
कूलत्वयतिशेषः गौरवादिति सपचायमित्यायामरप्रत्यभिज्ञानात्तत्क्षणिकानंतशक्तितत्प्रागभावध्वंसकल्प
ने गौरवादित्यर्थः ननूत्तरस्य वीजादंकुरोत्पत्तिर्नकुलेऽस्मन्य वीजादंकुरतावच्छिन्नं प्रति कुर्वद्रूपत्वेन हेतुत्व

म॰ टी॰ ५॰ ५०

मेणीक्रियते कुर्वद्रूपत्वं चांकुरजनकतावच्छेदकतया सिद्धो जातिविशेषः स च पलोपधायकक्षणिकसमर्थेषु बीजमा
त्रवृत्तिश्च तत्त्वाख्याः कल्प्यते एवमत्रापि कुर्वद्रूपत्वेनैव क्षणिकशरीरेष्वन्तरोत्तरशरीरनिष्ठवासनोत्पादकत्वं वाच्य
मत आह बीजादावपीति उपपत्तेः कस्माद्बीजादंकुरोत्पत्तिः कस्माच्च नेति नियमो यतः कुर्वद्रूपताकल्पनादिति कु
सूलस्थबीजादिषु धरणिसलिलसंयोगादिरूपसहकार्यभावादेवांकुरोत्पत्तेः कुर्वद्रूपत्वं कुर्वद्रूपेण जनकत्व
च न कल्प्यते प्रमाणाभावादिति भावः अत्र वदंति यत्सत्तत्क्षणिकमिति व्याप्त्या जगतः क्षणिकत्वानुरोधेन च कु
र्वद्रूपत्वं तद्रूपेण कार्यं प्रति हेतुत्वं चावश्यकं न च तादृशव्याप्तौ मानाभावः तादृशव्याप्त्यस्वीकारे कुसूलस्थबी
जादंकुरोत्पत्तिः कुसूलस्थबीजादंकुरोत्पत्तिवारणाय धरणिसलिलसंयोगादीनां सहकारित्वकल्पने गौ
रवात् तादृशव्याप्तिस्वीकारे तु कुर्वद्रूपत्वेन हेतुत्वकल्पनात् कुसूलस्थबीजे कुर्वद्रूपताभावादेवांकुरानुत्पत्ते
नेसहकारिताकारणांतराणामिति लाघवात् न च क्षणिकत्वमतेपि बीजस्य धरणिसलिलसंयोगादेर्वांकु
र्वद्रूपत्वेन हेतुत्वमिति विनिगमनाविरहेण सर्वेषां सहकारिणां कारणत्वकल्पनमावश्यकमिति वाच्यम
स्मन्मते कुरं प्रति बीजानां धरणिसलिलसंयोगादिसहकारिणां च कुर्वद्रूपत्वेनैव हेतुत्वकल्पनात् कुर्वद्रूपत्वानं
गीकारे तु बीजत्वधरणिसलिलसंयोगत्वादिनानाहेतुत्वकल्पने गौरवादिति तदसत् ईदृशगौरवापत्त्या ५॰

क्षणिकानेकपदार्थकल्पनेति गौरवादिति तदसत् ईदृशगौरवापेक्षया क्षणिकानेकपदार्थकल्पनेति गौरवात् न च ल-
घवात् कार्यरूपत्वेषामेकहत्त्वनास्ति ह्यपीदृशं गौरवं न दोषाय फलमुखत्वादिति वाच्यं फलमुखगौरवस्यापि दोषत्वात् किंच
जगतः क्षणिकत्वे स एवायं घट इति प्रतिज्ञानुपपत्तिः पूर्वकालीनघटाभेदस्यैव तत्कालीनघटेऽभावात् न च तज्जातीया
भेद एव तादृशप्रतीतेर्विषयः त्वन्मते जातेरपि क्षणिकत्वेन सर्वकालीनघटवृत्तिघटत्वस्य तत्कालीनघटेऽभावात् ए-
तेन जगतः क्षणिकत्वे नाशित्वावच्छिन्नप्रतिसत्त्वेनैकमेव हेतुत्वमिति लाघवमित्यप्यपास्तं यदपि स्थिरपदार्थाङ्गीका-
रे एकस्मिन् पदार्थे सामर्थ्यसामर्थ्यमसामर्थ्यं च विरुद्धमतो भेद इति तदपि न एकस्मिन्नेव पदार्थे एककालावच्छेदे-
न सामर्थ्यतदभावयोरेव विरुद्धतया कालभेदेन तत्स्वीकारे बाधकाभावात् यत्तु पूर्वापरकालीनधर्मिणोरभेदे
न हि धर्मयोः सामर्थ्यासामर्थ्ययोर्भेदोऽनुपपन्नस्तन्मते धर्मधर्मिणोरभेदादिति तन्न घटत्वेन घट इत्यादिप्रतीतीनाम
प्रामाण्याय तयोर्धर्मधर्मिणोरभेदस्यैव क्रमणकत्वादिति दिक् इति वेदान्ती शङ्कते अस्तु तर्हीति क्षणिकविज्ञानर
ति आत्मनः क्षणिकविज्ञानस्वरूपत्वपदस्यार्थः आत्ममात्रस्य नित्यविज्ञानरूपत्वमीश्वरस्यैव वेति विकल्पाद्ये दूष-
णमाह तस्येत्यादिना दर्शितत्वादिति तस्य जगद्विषयकत्व इत्यादिग्रन्थेन दर्शितत्वादित्यर्थः तथा च जीवस्य तथात्वा-
संभवात् आत्ममात्रस्य नित्यज्ञानरूपत्वमिति भावः ननु न जीवस्य जगद्विषयकत्वं न वा नियत यत्किंचिद्विषयकत्वं

मु॰ टी॰ ५१

51

ब्रूमः परं तु यद्विषयकत्वं यत्र जीवेनुभवसिद्धं तत्र तद्विषयकत्वमत आह सविषयकत्वस्येति ननु सत्यं ज्ञानमिति श्रुति
र्जीवस्य ज्ञानस्वरूपत्वे प्रमाणमत आह सत्यमिति ननु जीवब्रह्मणोरैक्यान्नित्यविज्ञानरूपत्वे जीवस्य निराबाध
सिद्धत्वतो जीवब्रह्मणोर्भेदं साधयति ज्ञानाज्ञानेति सुखित्वादीत्यादिना दुःखित्वपरिग्रहः सुतरामिति जीवात्मनां
नानात्वसिद्धावीश्वरस्यैकस्यानेकात्मजीवात्मकत्वासंभवात् एकत्वानेकत्वयोर्विरोध इति भावः ईश्वरभेद ईश्वरजी
वात्मनोर्भेदः सिद्ध इति शेषः अन्यथेश्वरस्य जीवात्मकत्वे बंधमोक्षेति कश्चित्संसारी बद्धः कश्चिन्मुक्त इति व्यव
स्थानुपपन्नस्यादित्यर्थः चैत्रमैत्रात्मनोरीश्वरस्वरूपयोरैक्यादिति भावः ननु कथं तर्हि तत्त्वमसीत्यादि तच्छ्रुतिप्र
तिपाद्यब्रह्मणि युष्मच्छब्दप्रतिपाद्यजीवस्याभेदबोधको वेदः प्रमाणमित्यत आह यावदिति मोक्षकाले जीवात्म
नां ब्रह्मणा सहाभेद इत्यस्यान इति मनेनेति रस्येति मोक्षेति भेदस्यानित्यत्वमभ्युपेत्यापि मोक्षकाले जीवब्रह्मणो
र्भेदं व्यवस्थापयति भेदनाशेपीति भेदसत्त्वे व्यक्तिद्वये निर्वाहमेवेत्यपि नास्त्युचितं तत्त्ववेदांतिनः निर्धर्मक इति
इदं च सत्यत्वाभावेपीत्यत्र हेतुतयोक्तं ननु निर्धर्मकत्वमसिद्धं धर्मशून्यत्वमिथ्यात्वाभावरूपसत्यत्वस्य ब्रह्मत्वे र
पत्वात् तदभावस्य चाधिकरणात्मकत्वान्नानुपपन्नमित्यभिप्रायेण शंकते मिथ्यात्वाभाव इति ननु कथमेकत्वाधिक
रणत्वतदभावद्वयाहितत्वमत आह अनेकमिति ननु ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेर्मोक्षदशायामभेद इत्याशयेनाह ५१

र्थिकायाः कामनिरित्यत आह योयीति अतएव ब्रह्मैव भवतीति श्रुते साम्यप्रतिपादकत्वादेव निरंजनः निर्दुःख
ह्रितीयदोषमाह इश्वरोयीति विज्ञानपदेन नित्यमित्यादिश्रुतेः तत्र गतविज्ञानपदेन अधिकरणल्युडंतविज्ञानप
देन विज्ञानाश्रयबोधनादिति भावः आनंदवदित्यपि इति मत्वर्थीयाच्प्रत्ययात्तेनानंदशब्देनानंदवतो बोधनाद
न्यथानंदमितिनपुंसकत्वानुपपत्तेरिति भावः नत्वानंदवदित्यर्थो न संगच्छते नवसते इश्वरे आनंदाभावादित्यत आ
ह आनंदोयीति लक्षणाकल्पनमेव नत्वदोष इत्यत आह अस्त्वेति अस्तु सुखमिति असुखमित्यत्र नञा सुख
मात्रस्य भेदबोधनादिति भावः कष्टकल्पनापत्तेरिति बहुव्रीहावन्यपदार्थलाभार्थं नञ् लक्षलक्षणापत्तेरि
त्यर्थः नचनञ्तत्पुरुषेपि नञो लक्षणा आवश्यकीति अन्यथा नञर्थस्य नामार्थेन याभेदेनान्वयासंभवा
दित्याच्यं तस्य नामत्वेपि निपातत्वादिति ननुतत्पुरुषेपि नञः सुखपदाव्यवस्थपदयोरेकधर्मिबोधकत्वलक्षणं
सामानाधिकरण्यमनुभवसिद्धमन्यथा तयोः समानवचनत्वानुपपत्तेरतस्तन्निर्वाहार्थं नञोभाववति लक्षणा
न वा आवश्यकीत्यत आह प्रकरणेति प्रत्ययविरोधादिति आनंदशब्दस्य पुंलिंगनियमेनानंदमिति रूपस्य
मत्वर्थीयाच्प्रत्ययं विनानुपपत्तेरिति भावः सत्वामतं दूषयति तस्य पन्यस्यति एतेनेति पूर्वोक्तयुक्त्यात्मनित्यत्वा
नवत्वसाधनेन वक्ष्यमाणयुक्त्या चेत्यर्थः प्रकृतिरिति मूलप्रकृतिरित्यर्थः कर्त्री इति कर्तृत्वं चात्र कर्तृभूता तःकर

सां॰
टी॰
५२
52

त्यप्रकृतिर्वे अनुकूलप्रकृतिमवलम्ब्य दुःखकर्तृत्वस्य तत्त्वेनेश्वरेऽन्तःकरणधर्मत्वादिति ध्येयं पुष्करपलाशवदिति पद्मपत्रव
दित्यर्थः तथा च यथा पद्मपत्रं भस्मालिप्तं न भवति तथा पुरुषः कर्तृत्वाद्युपाश्रयो न भवतीति भावः तथा च पुरुषः कर्तृ
त्वाभावे कारणत्वाभावादित्यनुमाने तत्र प्रमाणं बोध्यं ननु तत्र कारणत्वसत्त्वाद्धेतुरप्रसिद्धिरत आह कार्यकारण
योरिति तस्मादिति माभवत्वित्यर्थः तस्य पुरुषस्य नन्वेतादृशपुरुषस्य तर्हि किं मानमत आह बुद्धिगतेति बुद्धिस्थ
सिद्धस्यैव चैतन्यस्य बुद्ध्यावारोपसम्भवादिति भावः प्रकृतेर्विति मूलप्रकृतेरित्यर्थः ननु पुरुषस्य कर्तृत्वाभावेन तत्र
धर्माधर्मयोरुत्पत्त्यभावात्तदधीनसुखदुःखयोस्तत्रानुत्पत्तौ दुःखध्वंसरूपमोक्षः पुरुषस्य न स्यादत आह तत्सम्ब
न्धाद्बुद्धिसत्त्वाभ्यामित्यर्थः बुद्धिसत्त्वे इन्द्रियप्रणालिकया तत्परिणामेनायं घट इत्यादिज्ञानेन सम्बद्धो घटादिवि
षयः स्वाकारज्ञानपरिणामिबुद्ध्या गृहीतानां संसर्गकाले सम्बन्धेन पुरुषनिष्ठः पुरुषस्वरूपप्रतिरोधानेन पुरुषस
सारे सम्पादकः बुद्धिनाशे तत्परिणामस्यायं घट इत्यादिज्ञानरूपस्याभावाद्विषयावच्छेदकाभावात्कैवल्याव
स्थाने पुंसो मोक्षः दुःखसम्बन्धनतद्ध्वंसरूपौ संसारमोक्षौ न तु न पुंसः किन्तु बुद्धेरेवेति ननु पुरुषस्य साक्षात्सम्बन्ध एव
चेत्तस्मिन्संसारव्यवहारो नियामकाभावात् किमुक्तं बुद्धिचारितयेति सम्बन्धेनेत्यत आह तस्यायमेवेति तथा च
विषये बुद्धेरेव सम्बन्धः पुरुषस्य सम्बन्धस्तु बुद्धिपुरुषयोः संसर्गग्रहात् ननु पुरुषस्य साक्षात्त्वेन विषयसम्बन्धोऽस्ति मा ५२

नाभावात् नचविषयप्रकाशार्थस्तास्तासंबंधएवस्वीकार्यः किंमत्कृपंपरयेतिवाच्यं तस्यपुरुषस्वभाव
निबंधनेत्वपुरुषस्यानित्यत्वेन तत्स्वभावाधीनविषयसंबंधस्यसर्वदासत्वान्मोक्षाभावप्रसंगात् चरमकर्मकालेप
रादिरूपविषयस्वभावाधीनस्य घटादिरूपचैतन्यसंबंधस्यसत्वात्पटादेरपिप्रकाशायतेरितियद्वा बुद्धितोज्ञा
नस्यभेदमाह तस्याप्येवेति तथाचबुद्धेःप्रतिपत्तिर्ज्ञानं नतु बुद्धिरेवेतिभावः भेदाग्रहादिति बुद्धिपुरुषयोर्भे
दाग्रहादित्यर्थः इदानींबुद्धिनउपलच्येभेदप्रदर्शनाबुद्धेरंशत्रयंप्रदर्शयति ममेदमित्यादिना पुरुषोपरागः
पुरुषसंबंधे दर्पणस्येव यथा मुखसंबंधः प्रतिबिंबमात्रान्नतु तात्त्विकस्तथा बुद्धिपुरुषयोर्भेदाग्रहादेकताभिमा
नः पुरुषोपराग इत्यर्थः इंद्रियप्रणालिकया इंद्रियद्वारा यत्परिणतिर्भेदः अयं घट इत्यादिज्ञानरूपः परिणाम एव
विषयेण घटादिना बुद्धेः संबंध इत्यर्थः तस्य पारमार्थिकत्वेनि स्वाभासामिहि तद्दर्पणस्य मलिनमादृष्टान्तः कर्तव्य
मितीति पूर्वोक्तपुरुषोपरागविषयोपरागाभ्यां कर्तव्यस्य घटादेर्व्वभासस्तेन करोम्यहमित्यध्यवसायो व्यापार
वेश इत्यर्थः ज्ञानेन पुरुषस्य नात्विकः संबंध इति अत्र ज्ञानेन पुरुषस्य यो नात्त्विकः संबंधः स उपलब्धिरुच्यत इ
त्यन्वयः अतात्त्विकत्वे दृष्टान्तो दर्पणमलिम्नेव मुखस्य संबंध इति तथा च ज्ञानेन सह चेतनोऽहं करोमीदं जा
नामीत्याकारो बुद्ध्यारोपितस्य यः संबंधोऽतात्त्विकः स उपलब्धिनेन बुद्धिर्वोपलब्धिरिति भावः कृतिसा

मानाधिकरण्येनेति अदृष्टस्यातीन्द्रियत्वेनापि धार्मिकोहं करोमीति तद्देशो ऽपनीतभानरूपं यत्प्रत्यक्षं तद्वोध्यं परिणा
मित्वादित्यर्थः कृत्यदृष्टभोगानामिवेति कृतिः स्वसमानाधिकरणमेवादृष्टं जनयति तच्चादृष्टं स्वसमानाधिकर
णमेव भोगं जनयतीति कृत्यदृष्टभोगानां परस्परसमानाधिकरण्यप्रसिद्धमिति वच्चो तेनोहं करोमीति सामा
नाधिकरण्यमिति प्रतीतेरित्यर्थः तद्भिन्ने कर्त्तरि भिन्ने मानाभावादित्यस्य चेतन इत्यादिः चः पूर्वोक्तदोषगणस
मुच्चायकः कर्तृत्वाश्रयो न चेतनः जन्यधर्माश्रयत्वात् घटवदिति बाधकसत्त्वाच्चेतनोहं करोमीति प्रतीतिश्चैत
न्याध्यासमात्रेणापि शक्यते चेतनोहमिति कृत्याश्रयीति बुद्धिः कर्तृत्वाभाववती जन्यधर्माश्रयत्वादिति बाधकस्य तत्रा
पि सत्त्वादिति भावः अन्यथेति कर्तृचेतनयोर्भेदांगीकार इत्यर्थः बुद्धेर्नित्यत्व इति कर्तृभिन्नस्य चेतनस्यांगीकारेण
स्मिन्सुखदुःखाभावात्संसारापवर्गौ वाच्यौ न तथा च बुद्धेर्नित्यत्वेनुत्पत्तिनिबंधनस्य संसारस्य सर्वदायत्या मोक्षाभा
वप्रसक्तत्वाद् बुद्धेरनित्यत्वेन तत्र जन्यत्वस्वीकरणीयं अजन्यस्य नाशासंभवात् तथा च तदुत्पतेः सर्वेतत्सत्त्वनिबंधनः स
मानेन स्यादित्यर्थः वस्तुतस्तु न उत्पत्तेः पूर्वं तदाश्रितादृष्टादेरभावाद्बुद्धेरनुत्पत्त्या संसारः कदापि न स्यादित्यव
धेयं असिद्धेरिति बुद्धेः प्रकृतिकार्यत्वाभावादित्यर्थः ननु कर्तृत्वेन जन्यत्वानुमितिः परिशेषात्प्रकृतिजन्यत्वा
विषयिणी स्यादत आह कर्त्तुरिति कर्तृत्वस्य जन्यत्वव्याप्यत्वेनानुकूलतर्काभावादित्यर्थः मनुतनन्द्रियविनाना ५२

दित्वग्राहकत्वकिसत्वादर्शनादित्वमेव कर्त्तृरित्याह वीतरागेति वीतरागजन्मादर्शनादिति न्यायसूत्रे सरागजन्मदर्शी
नादितितदर्थः अनादित्वमिति स्तन्यपाने बालस्य प्रवृत्तिर्नेष्टसाधनताज्ञानमन्तरेणात इष्टत्वानानुभवसंस्कारं विनाधातस्म
रणासंभवसमानाधिकरणपूर्वानुभवसापेक्षतया पूर्वजन्मसत्वे पूर्वजन्मन्यपि प्रथमप्रवृत्त्यनुरोधेन तत्पूर्वस्यैवं
ततत्पूर्वस्य जन्मनः सिद्धावनादित्वमात्मन इति भावः अनादेरिति सत्वसभावस्येति शेषः जन्माभावत्वेन नाशहेतुत्वादिति भावः
न च प्रकृतेरिति प्रकृतिर्मायात्मस्याः गुणाः सत्वरजस्तमोलक्षणाः क्रियमाणानि कर्माणि भवन्ति अहं करोमीति प्रत्यय
स्तेन विमूढ आत्मान्तःकरणं यस्य तथाविधः पुरुषः कर्त्ताहमिति मन्यत इत्यर्थकेन भगवद्वचनेनेत्यर्थः तेनात्मनः
कर्तृत्वाभावप्रतिपादनादिति भावः अहमेवेति विधः पुरुषः कर्त्ताहमिति मन्यत इत्यर्थकेन भगवद्वचनेनेत्यर्थः
तेनात्मनः कर्तृत्वाभावप्र॰ तथा च तेन सूत्रेण कर्तृत्वाभाव एवात्मनि प्रतिपाद्यते ननु कर्तृत्वसामान्याभाव इति भा
वः प्रकटीकृतो यामिति अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधं विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमं इत्यनेन पंचा
नामपि कर्तृत्वं प्रतिपाद्यते नैवं सतीत्यादिनापि सूत्रं अकर्तृत्वस्यैवात्मनो निषिद्धत्वादिति भावः एवं पुरुषस्यैवक
र्तृत्वमस्तु न च कारणताभावेन कर्तृत्वाभावस्तत्र साधनीय इति वाच्यं स्वरूपासिद्धेः कार्यकारणयोरभेदात्कार्यना
शे कार्यरूपतया नाशो न स्यादित्यकारणत्वे पुरुषस्यैव तु पिनसत्व कार्यकारणयोरभेदस्यैवासिद्धत्वादित्यादि वि॰

मु० त्वरभियानोक्तमित्यभिप्रायेणाह संबन्धेपीति तदाश्रयत्वेधर्माधर्माश्रयत्वे अन्यथाविशेषगुणसंबंधाद्धेतेइत्यादिप्र
दी० तीतेविनिइत्यादिज्ञानादिसंबंधप्रकारेणैवात्मनः प्रत्यक्षस्यानुभवसिद्धत्वादित्यर्थः परकीयप्रवृत्त्यादेरतीन्द्रियत्वे
५४ नहेतुज्ञानासंभवात्कथमित्याशंक्याह प्रवृत्तिरत्रेति उक्तप्रायत्वादिति शरीरस्य चैतन्यनिरासेनोक्तत्वादित्यर्थः
54 इच्छादीनामभावस्य कंठरवेणानुक्तेः प्रायःपदं चेष्टायःपदं चेष्टायाः प्रवृत्तिज्ञापकत्वेनुकूलतर्कमाह चेष्टायाश्चेति
चेष्टायेतिपरशरीरे समवायेन चेष्टानुमितस्यावच्छेदकतया प्रयत्नस्य समवायेनाश्रय आत्मैवेति भावः दृष्टान्त
सिद्धिमाशंक्य निराकरोति यद्यपीति तथापीति तथा चोचोनरसंयोगप्रामित्योग्यपक्षियावत्त्वस्यैव हेतुत्वमिति
भावः आत्मनो मनोमात्रजन्यज्ञानविषयत्वे हेतुमाह रूपाद्यभावेनेति कालखात्मदिशां सर्वगतत्वं परमं महत्त्व
मोक्तेः पौनरुक्त्यमाशंक्याह नत्वेति सर्वमुक्तामिति बुद्ध्यादिषट्कं संख्यादिपंचकं भावनातथाधर्माधर्मौ गुणाः एते
आत्मनस्तु चतुर्दशोप्येतेन साधर्म्यप्रकरणे कथिता इत्यर्थः इतिश्रीभारद्वाजकुलोद्भववालकृष्णभट्टतनूज
वमहादेवभट्टकृतौ मुक्तावलीप्रकाशे द्वितीयः परिच्छेदः २ मूले बुद्धिस्तु द्विविधा मता अनुभूतिः स्मृतिश्च
स्यादित्युक्तं तत्रानुभूतिः प्रत्यक्षात्मिकैवेति चार्वाकाः अनुमितिरपीति कणादसुगतौ उपमितिरपीति केचन
न्यायैकदेशिनः अर्थापत्तिरपि प्राभाकराः अनुपलब्धिरपीति भाट्टा वेदान्तिनश्च संभवैतिह्ये अपीति[illegible] ५४

णिकाः तत्सर्वमयुक्तमिति सूचयितुं अनुमितेश्चानुविधामाह अनुमिनोम्युपमिनोमि शाब्दयामि इति प्रतीतिसि
द्धानामनुमित्यादीनां तु वीर तथा चार्वाकोक्तिरयुक्ता अर्थापत्तेस्त्वनुमितावेवान्तर्भावो व्यतिरेकप्रयोज्यज्ञीभविष्य
ति अभावस्य चानुपलब्धेस्तेनभावः अन्यासां चेष्टाशतत्वाशतानां तु गतत्वेशान्तन्ये नसंख्यानात्‌ दर्शितत्‌ यथामनुमि
त्यादावेवान्तर्भाव इति भावः उद्दिष्टासु प्रमासु प्रथमोद्दिष्टं प्रत्यक्षं लक्षयति मुक्तावल्यामिन्द्रियजन्यमिति इन्द्रिय
जन्यत्व विशेषणे दत्तेपि अनुमित्यादावतिव्याप्तिस्तदवस्थेत्याशंकाते यद्यपीति नन्विन्द्रियजन्यत्वाभावादीश्वरप्र
त्यक्षे रत आह ईश्वरप्रत्यक्षं त्विति तथा च जन्यप्रत्यक्षमेव लक्ष्यमिति भावः ननु तस्यैव लक्ष्यत्वे किं मानमत आह
इन्द्रियार्थेति इन्द्रियार्थसन्निकर्षोत्पन्नमित्यनेनेश्वरप्रत्यक्षमनुमित्यादि च व्यावर्त्यते भ्रमवारणायाह अव्यभिचारी
ति भ्रमभिन्नमित्यर्थः एतावता प्रत्यक्षप्रमाया लक्षणमुक्तं तद्विभागमाह अव्यपदेश्यमिति निर्विकल्पकमित्य
र्थः न चाव्यपदेनकथं निर्विकल्पकलाभ इति वाच्यं व्यपदेशः पदवाच्यत्वेन तद्विषयकमित्यर्थो हि विशिष्टज्ञानेन
तत्पदवाच्यत्वमुपनीतं भासते इति प्राचीनमतानुसारित्वात्‌ अत एव करणादकरणादतामानेमुनि मित्यादिनतत्तेनो
क्तसंगच्छते यद्वाव्यपदेशः शब्दप्रयोगः स च विशिष्टज्ञानादेव न व्यपदेशत्वेन व्यपदेशानर्हत्वेन निर्विकल्प
कलाभः व्यवसायात्मकमिति विशिष्टव्यवसायात्मकमित्यर्थः विशिष्टज्ञानात्मकमिति यावत्‌ एवं च सूत्रे इन्द्रि

मु॰ यार्थसन्निकर्षोत्पन्नमव्यभिचारिअव्यपदेश्यंव्यवसायात्मकमितियोजनाबोध्या अन्यथालक्षणवाक्येविभागबोधक
टी॰ पदेनव्यवधानादसंगतेरितितथैवोक्तत्वादिति ईश्वरप्रत्यक्षालक्ष्यत्वमस्यैवाभिप्रेतत्वादित्यर्थः ईश्वरप्रत्यक्षस्या
५५ पिलक्षणमभिप्रेत्याह अथवेति ज्ञानाकरणकमिति ज्ञानाजन्यमित्युक्तौचाव्याप्तिः विशिष्टज्ञानमात्रस्यविशेषण
55 ज्ञानजन्यत्वात् तदोज्ञानाकरणकमिति अनुमित्यादौव्याप्त्यादिज्ञानकरणकत्वमस्त्येवेति नानुमित्यादावतिव्याप्तिः
अकरणत्वादेवचेश्वरज्ञानसंग्रहः अथनिदिध्यासनद्वारामननादिज्ञानकरणकपदेनज्ञानत्वगर्भधर्मावच्छि
न्नकरणकत्वाभावस्यविवक्षितत्वात् नचैवंयोगिप्रत्यक्षाव्यापकं श्रवणादिप्रतिपत्तीनांशाब्दत्वादिनेवजनत
कत्वेनविशिष्टाभावसत्वादिति अथवाज्ञानकरणकत्वाव्यभिचारजातिशून्यज्ञानत्वमिहविवक्षितंतेनादृष्टी
चजातिरनुमितित्वादिरेवेति एतेनानुमित्यादौव्याप्तिज्ञानादेर्जनकेनकरणत्वानपेक्षणत्वचोदितकारण
तावच्छेदकधर्मोप्रसिद्ध्यासंभवोपिप्रत्युक्तइति व्याप्तिज्ञानस्येति षष्ठ्यंतचतत्स्पृश्यस्यकरणत्वादित्यनेना
न्वयः नचस्मरणात्मकपरामर्शस्थलेव्याप्तिज्ञानस्यकरणत्वासंभवइतिवाच्यं तत्रव्याप्तिज्ञानस्यसंस्कारद्वा
रानन्नहेतुत्वकल्पनेनेतिवाच्यं इच्छादितः संस्काराद्वात्रहेतुत्वकल्पनेनेतिवाच्येनत्संद्यामनसविषयकत्वा
स्यातिप्रसक्तत्वात्सादृश्यज्ञानस्यसादृश्यप्रकारकज्ञानस्यतत्रानुमित्यादौअनुमितिंलक्षयतिपरामर्शे ५५

ति परामर्शत्वं च व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वं तथा व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वे तथा व्याप्तिविशिष्टपक्षध
र्मताज्ञानजन्यं ज्ञानमनुमितिरिति फलितं भवति हि वह्निव्याप्यधूमवान्पर्वत इति ज्ञाने व्याप्तिविशिष्टपक्षधर्मता
ज्ञानत्वं तज्जन्यं पर्वतो वह्निमानिति ज्ञानमिति तत्र लक्षणसमन्वयः यद्यपीत्यादि प्रत्यक्षादिकमित्यादिना विशेष
णतावच्छेदकप्रकारकनिश्चयविधया परामर्शजन्यस्य तद्विशिष्टवैशिष्ट्यबोधस्य परिग्रहः परामर्शजन्यामि
तिविषयविधया तज्जपरामर्शस्य हेतुत्वादिति भावः कादाचित्केति धूमवान्पर्वतो वह्निमानित्यनुमितौ पक्षतावच्छे
दकविधया धूमस्य भानादिति भावः तादृशेति कथितनिश्चयजन्यहेतुविषयके त्यर्थः सत्तामादायातिव्याप्ति
रतोऽनुमनुभवत्वव्याप्येति अनुभवत्वन्यूनवृत्तित्वेन तदर्थः तेन नानुभवत्वजातिमादाय प्रत्यक्षादावतिव्याप्तिः
जातिमत्त्वे च समवायेन विवक्षितं तेन कालिकसंबंधेन जातिमति काले नातिव्याप्तिः पक्षधर्मताया अप्रवेश
नल्लाघवाल्लक्षणान्तरमाह अथवेति अत्रापि साध्यतावच्छेदकधर्म साध्यतावच्छेदकसंबंधहेतुतावच्छे
दकधर्महेतुतावच्छेदकसंबंधानामननुगमादेकव्याप्त्युपादानेऽन्यानुमितावव्याप्तेरेकां व्याप्तिमुपादाय तज्ज्ञा
नकरणकत्वस्यानुभवत्वव्याप्यजातिमत्त्वे विवक्षणीये नन्वनुमितित्वमपि व्याप्तिज्ञानत्वेन न कारणता किं तु ज्ञा
नत्वेन मतत्वेनैव वा यथा वा एवमुपमित्यादावपि मनस्त्वेनैव करणत्व न च कार्यवैजात्यं न स्यादिति वाच्यं सामग्री

सं॰ टी॰ ५६ 56

वैलक्षण्यादेव तदुपपत्तेः न च प्रमाणविभागानुपपत्तिः क्रियाविशेषात् तदुपपत्तेः न च प्रमाणविभागानुपपत्तिः क्रियावि
शेषात् तदुपपत्तेरतः सर्वोक्तानुमित्यादिलक्षणानामसंभव इत्यत आह वस्तुत इति यदेतेति व्याप्तेर्वारणाय इत्यंतद्
तिवेपिनातिव्याप्तिः ज्ञानत्वावन्नुभवत्वादिकमादाय प्रत्यक्षादावतिव्याप्तिवारणाय विशेष्यदलं ननु मनसः कर
णतापत्ते ज्ञानाकरणकत्वं प्रत्यक्षाणामनुमित्यादावतिव्याप्तिमनः प्रत्यक्षस्य लक्षणान्तरमाह एवमिति प्रत्यक्ष
त्वादिकमिति यत्किंचिद्रूपमिति व्यमादाय न व्यमादाय तद्व्यक्तिमादाय तद्व्यक्तित्वेति प्रत्यक्षसमवेतजातिमत्वं
शाब्दबोधत्वं निर्वाच्यमित्यर्थः प्राहुर्भेदेनानुमित्यादीनां लक्षणकथनमनुभवत्वजात्यंगीकारेण तदनंगीकारे
तद्व्यक्तिसमवेतस्मरणासमवेतधर्मसमवायित्वरूपस्य लक्षणचतुष्टयस्यैकशाब्देनवक्तुं शक्यत्वादिति बोध्यं उक्ता स्त
त्रेति इन्द्रियादिसन्निकर्षोत्पन्नमित्याद्युपदर्शितलक्षणानुसारादित्यर्थः घ्राणस्य निर्विषयकत्वादाह ग्राह्य इति सुर
भितादीत्यादिना सुरभित्वपरिग्रहः तत्तद्धीतिगंधवृत्तीत्यर्थः उद्भूतेति उद्भूतदस्पर्शत्वमाह ग्रीष्मेति ऊष्मादावि
त्यादिना चूर्णप्रविष्टतेजः परिग्रहः न तत्प्रत्यक्षं नोष्मादिगतरूपं प्रत्यक्षं नोष्मादिगतरूपप्रत्यक्षं ननु तत्परिह
तमाह एवंचकादिकमपीति आलोकसंयोगेति तस्य च कारणत्वमंधकारे चाक्षुषत्ववारणाय उद्भूतरूपस्य
जकवादिनामसहस्रसंचयति अन्य इति सत्प्रतिपक्षस्य दूषकताबीजे प्रदर्शयति अत्र त्वादिना सत्प्रतिपक्षस्य संश

स्यस्वरूप

तत्कालीनानित्यत्वव्याप्यकृतत्व=।

तिप्रथमोपस्थितिविशेषणात् तादृशकालीनानित्यत्वव्याप्यवत्तापरामर्शसत्वेपि तत्राप्रामाण्यग्रहकालेन यावद्व्यवहाराभाव
दगृहीताप्रामाण्यक =३

मु॰ यज्जनकत्वं दूषकताबीजं न त्वनुमितिप्रतिबन्धकत्वं तदभावव्याप्यवत्ताज्ञानस्यानुमितिप्रतिबन्धकत्वे मानाभावादिति
टी॰ रत्नकोशकारमतं दूषयितुमुपन्यस्यति अन्ये केचिदिना अनुमितिर्भवत्येवेति अनुमितिं प्रति तदभावव्याप्यवत्ता
७५ ज्ञानस्य प्रतिबन्धकत्वे मानाभावः उक्तमतेतदभावानुमितिसामग्र्या एव न तु तदभावकोटिकसंशयानुमित्युत्प
75 त्तौ संशयानुमितिं प्रत्युभयव्याप्यवत्तानिश्चयत्वेनैव न तु तदभावकोटिकसंशयानुमितिं प्रत्येतौ संशयानुमितिं
प्रत्युभयव्याप्यवत्तानिश्चयत्वेनातिरिक्तहेतुताकल्पने पुनरुक्तगौरवाभावाच्चेति भावः ननु यद्युभयभासकत्वे
भा उभयभाने तदापि तादृशदोषसत्त्वेपि पीतत्वमुक्तं तदोभयस्य ताद्वुभयोर्भानापत्तिरित्यत आह फलवत्त्वे चेति न ले
भ थाच तत्र पीतत्वस्याप्रकारस्यैवानुल्लेखकतया प्युक्तत्वग्रहेऽपि तद्दोषस्य प्रतिबन्धकत्वं कल्पयितुमपि तत्त्वभा
त्वाकारसामग्र्या अधिकबलत्वमेवं दूरं तद्दोषसत्त्वेपि स्थाणुत्वपुरुषत्वयोः स्यतो संशयस्यैवोदयात् तत्सामग्र्याः
समबलत्वमेव कल्प्यत इति भावः ज्ञानमात्रे तादृशज्ञानत्वावच्छिन्ने विशेष्ये विशेषाज्ञनु गौरवादिति का
र्यकारणभावद्वयकल्पने गौरवादिति भावः कथमनुमितिं अनुमितेरपि तं प्रति वध्यतावच्छेदकक्रान्तत्वा
दिति भावः कथं तत्रोभयव्याप्यवत्तानिश्चयात्प्राक्तनादिकः संशय इत्यादि इत्याशङ्कां न भवत्येव तानि श्चयेत्य
प्राक् न स्यात् इत्याह यत्र चेति आश्रयासिद्ध्यादीत्यादिना स्वरूपासिद्धिर्व्याप्यत्वासिद्धिः पक्षविग्रहः साध्याभावासिद्धी दी॰५

मारांयं नग्र
दिति
दोष=४
बध्यावन्नं = २

द्वि=१ ह: सा=१

नामाधिक्यं निराकरोति साध्याभावेत्याद्यइत्यंतीति आदिनासाधनाप्रसिद्धिपरिग्रहः केषांचिन्मतमाह एवं वह्निरित्यादिना
वदंतीत्यन्तेनाग्रहस्तद्बीजं नु नीलधूमे व्याप्तिसत्वात्कथं व्याप्यत्वासिद्धिः न च तत्र व्याप्तिसत्वेपि नीलधूमत्वस्यानवच्छे ग
दकतयातदवच्छेदेन व्याप्यत्वाभावात् सिद्धिरेवेति वाच्यम् अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य नीलधूमत्वेपि स
त्वात् स्वरूपसंबंधरूपावच्छेदकत्वाभावाद्व्याप्यत्वासिद्धिरिति चेन्न तथासति यत्र धूमान्मानस्तादृशमतेइत्यादाववृत्तिव्या
प्यत्वासिद्ध्यापत्तेः सामान्याद्येपि तयागोत्वादिजातेर्लघुत्वेन साक्षादेः स्वरूपसंबंधावच्छेदकत्वाभावात् अस्तुवा
त्वा नीलधूमादेः स्वरूपसंबंधरूपावच्छेदकत्वाभावात्तदवच्छेदेन व्याप्यभावरूपाव्याप्यत्वासिद्धिर्न तु तस्याहेत्वा
भासत्वं अनुमितिकारणीभूतव्याप्तिज्ञानाविरोधित्वात् न च वह्निमदन्यावृत्तित्वप्रमेयत्वानित्यादितिप्रमेयत्व
सामानाधिकरण्येन व्याप्यवगाहिज्ञानादनुमित्यापत्तिवारणाय हेतुत्वावच्छेदकावच्छेदेन व्याप्तिज्ञानस्यैव
कारणतया तद्विरोधितया निरुक्तव्याप्यत्वासिद्धिर्हेत्वाभासइति वाच्यं तावताप्यनतिरिक्तवृत्तित्वरूपावच्छे
दकत्वाभावग्रहस्य ग्राह्याभावानवगाहितया विरोधित्वात् तस्माद्व्यर्थविशेषणस्थले न व्याप्यत्वासिद्धि
र्हेत्वाभासः गुरुधर्मस्याधिकेन निग्रहस्थानम् इति साध्याभावादीत्यादिनासाध्यवदन्यत्वस्य पक्षेवृत्तित्वसाध्याद्य
परिग्रहः तद्धर्मिकतदभाववन्निश्चयः अनाहार्याप्रामाण्यज्ञानानास्कन्दितं तद्धर्मिकतदभाववन्निश्चयः बाधबुद्धि

त्वग्राहकज्ञानस्यकारणत्वेपि तत्र स्वरूपसंबंधरूपावच्छेदक=२ स्कं ता=५

व

मु॰ दी॰ ७९

तत्तद्गुणे लौकिकसन्निकर्षजन्यविशिष्टबुद्धेरनुभविकत्वादाह लौकिकसन्निकर्षाजन्येति नन्वेवं तदिन्द्रियजन्यलौ
किकबाधनिश्चयोत्तरं तदिन्द्रियजन्यलौकिकविशिष्टबुद्ध्यापत्तिरिति चेन्न अलौकिकत्वे प्रतिबध्यतावच्छेदक
कोटौ निवेश्य तदिन्द्रियजन्यतद्विशिष्टबुद्धौ तदिन्द्रियजन्यलौकिकतदभावनिश्चयत्वेन प्रतिबन्धकत्वोपगमा
त् तदिन्द्रियजन्योपनीतभानात्मकबाधनिश्चयोत्तरं तदिन्द्रियजन्यलौकिकतद्विशिष्टबुद्धेरप्यापत्तेः प्रतिबध्यक
तावच्छेदककोटौ लौकिकत्वस्य निवेशः न च लौकिकतदिन्द्रियजन्याभावप्रमात्वेन तदधिकरणप्रतियोगिनोः
~~लौकिकतदिन्द्रियजन्याभावप्रमात्वेन तदधिकरणप्रतियोगिनो~~ऽसत्त्वादेव न तद्विशिष्ट
लौकिकप्रत्यक्षापत्तिरित्यलं तथाविधप्रतिबध्यप्रतिबन्धकभावेनेति वाच्यं यत्र प्रतियोग्यधिकरणत्वसन्निकृष्टा
धिकरणे तद्वृत्तेरभावस्य लौकिकप्रत्यक्षात्मकारोपो दोषेण जनितस्तत्र तदधिकरणे प्रतियोगिनो लौकि
कप्रत्यक्षापादनात् तत्राभावलौकिकप्रत्यक्षजनकदोषस्य प्रतिबन्धकत्वादेव नेयमापत्तिरन्यथाभावारोपोत्प
ति त्तिक्षणे प्रतियोगिप्रत्यक्षापत्तिरिति तन्न यत्र विनश्यदवस्थदोषेणाभावलौकिकप्रत्यक्षात्मकारोपस्तत्र तत्र प्रतियो
गिप्रत्यक्षापादनात् यत्राभावलौकिकप्रमासमकालं तद्द्वितीयक्षणे वा तदधिकरणे प्रतियोगिप्रकारकानुभूय
मानोत्पाद्यजनकदोषसमवधानं तत्राभावप्रमोत्तरं प्रतियोगिनो लौकिकप्रत्यक्षात्मकारोपापादनवारणायतादे ७९

76

अलौकिकत्वाद्

वध्यप्रति वार बा=३ ज

द्रियभेदेन तथाविधप्रतिबंधकभावोपगमात् शंखो न पीतो वंशो नोरग इति निश्चयेपि पित्तमेदुकवसांजनादिदोषवशात्
शंखः पीतः वंश उरग इत्यारोपोदयात् व्यभिचारवारणाय हृदोषविशेषेति दोषमात्रान्यत्वे त्याचनिवेशेप्यप्रमात्वसं
वलवाधाप्रतिवध्य पीतिमत्व बाधतिरतो विशेषेति तथा च पित्तमेदुकवसांजनादिदोषनिशिष्टाप्रायानदजन्यत्वं प्रति-
वध्यतावच्छेदककोटौ निवेशनीयमिति भावः न च पित्तद्रव्यात्मकदोषाजन्यत्वनिवेशाव्यर्थः शंखः पीत इति भ्रमे शं
खांशेनुभूयमानस्य पित्तद्रव्यपीतिम्न आरोपोपगमेन तदंशे लौकिकत्वस्य प्रतिवध्यतावच्छेदके निवेशादेव त
द्व्यभिचारवारणादिति वाच्यं पित्तद्रव्यस्यांतर्वर्तित्वस्यानदशायामपि पित्तपीतिम्नः शंखादौ प्रत्यक्षोदयेन स्वरूपे भा
णारोपस्यैतदन्वेनवीनैः स्वीकारात् तदंशे तस्यालौकिकत्वात् तथा सति शंखः पीत इति प्रत्यक्षोत्तरं पीतेमां साक्षात्का
रोमीति साक्षात्कारित्वग्रहानुपपत्तिस्तद्ग्राहकलौकिकविषयतायास्तत्राभावादिति तन्न लौकिकविषयतायाश्च
दोषविशेषाजन्यत्वस्यापि साक्षात्कारित्वव्यंजकत्वात् तथाप्यनुव्यवसायः इति स्मर्यमाणारोपे साक्षात्कारित्वग्रहानुपप
त्तेः शंखो न पीत इत्यादि तद्देद्रियजन्यबाधबुद्ध्युत्तरं पित्तादिदोषवशात् तद्देद्रियजन्यः शंखः पीत इत्याद्यारोप

यदा नुभवसिद्धस्तदाहरेवेनोक्तेंद्रियभेदभिन्नप्रतिवध्यतिवंधकभावेपि दोषविशेषाजन्यत्वं प्रतिवध्यतावच्छेदकमति वेद्य
वेशनीयमिति ध्येयं ननु बाधप्रतिवध्यतावच्छेदककोटौ लौकिकान्यत्वस्य निवेशो बाधनिश्चयोत्तरं लौकिकसन्नि

दौ वै

क

मु॰ टी॰

कर्षजन्यसंशयापत्तिरितिचेन्न भ्रमत्वेऽपि घटवदित्याद्याकारकलौकिकप्रत्यक्षोत्पत्तिकाले स्थाणुत्वेन कथं चेदयं स्थि
तस्यच्चत्राभावादेर्भ्रमत्वेऽप्रकारतया भानं वा वारणाय समानधर्मितावच्छेदकतत्कोटिलौकिकप्रत्यक्षसामग्र्या विप
रीतकोटिभानप्रतिबंधकत्वमवश्यमंगीकरणीयं तथाच बाधनिश्चयोत्तरमपि [illegible] नापत्तिः लौकिकसन्निकर्ष
जन्यसंशयस्य तत्कोटिलौकिकप्रत्यक्षसामग्र्याः प्रतिबंधिकायाः सत्त्वेन विपरीतकोटिसंभवात् नहि क्वापि लौ भान्ता
किकसन्निकर्षजन्यसंशयोत्पत्तिः स्यादिति चेदोमित्युक्तानत्प्रत्यासत्त्यैव स्थूले यथास्थितकोट्यावभानसंभवादिति यत्तु सं
शयस्थले तत्कोट्यंशे लौकिकसन्निकर्षसत्त्वे कथं संशय ~~[illegible]~~
स्य न लौकिकत्वं कथं वा तत्र संशये विपरीतकोटिभाने तत्कोटिलौकिकप्रत्यक्षसामग्र्याः प्रतिबंधिकाया
सत्त्वसत्त्वादिति तन्न तत्र लौकिकसन्निकर्षसत्त्वेऽपि संशयस्य ज्ञानकहतत्वादिदोषस्य लौकिकप्रत्यक्षप्रतिबंधक
स्य सत्त्वेन लौकिकप्रत्यक्षसामग्र्यभावादुभयोपपत्तेरित्यन्यत्र विस्तरः कस्यचिन्मते ह्यपयुक्तिनान्तरितेति यु
क्तमित्यनेनान्वयः ननु बाधनिश्चयकाले सत्त्वहेतुज्ञाना[illegible]भावादेवानुमित्यभावोपपत्तौ बाधनिश्चयस्य
नानुमितिविरोधित्वमिति हेत्वाभासत्वेन स्यादत आह नहीत्यादित्ययेति अनुमितिकारणीभूतं साध्यसत्त्वहेतुज्ञा
नाविरोधित्वेत्यर्थः ननु प्रसिद्धसाध्यकानुमितिः कुत्रापि न भवत्येवात आह संधास्तं शयेति न नु संशयजन्यकालेऽपि

धि

सं=१ स्मान=१

सिषाधयिषाकालीनसाध्याभावनिश्चयात्मकं साध्यसंशयस्थलेऽसत्वेऽपि तत्र आह आदीति आदिनासिषाधयिषाकालीनसाध्या
भावनिश्चयात्मकसिद्धिपरिग्रहः ननु संशयानन्तरं तत्र वानुमितिरिति वाच्यं सति विशेषदर्शने संशयायोगात् ननु एवं
विशेष्यकसाध्याभावज्ञानप्रमात्वनिश्चयोऽनुमितिप्रतिबन्धकस्तदभावः कारणं मते तादृशप्रमात्वमेव बाध इ
ति प्राचीनमतं दूषयति एवमिति प्रमात्वज्ञानमपि प्रमात्वत्वानिश्चयेऽपि प्रमात्वनिश्चयेऽपि मानाभावादिति अप्रामा
भावानवगाहित्वेन तादृशज्ञानस्य विरोधित्वे मानाभावादित्यर्थः ननु एतत्साध्याभावज्ञानेऽपि तत्राप्रामाण्यज्ञानका
लेऽनुमितेरुदयात् साध्याभावज्ञानं प्रतिबन्धकं अप्रामाण्येन तु तदा साध्याभावज्ञाने प्रमात्वनिश्चयाभावादेवा
नुमित्यनुत्पत्तिरत आह गौरवादिति तथा च तत्रानुमितिनिर्वाहाय संशयनिश्चयसाधारणाप्रामाण्यज्ञानाभाव
एव प्रतिबन्धकतावच्छेदककोटौ निवेश्यते न तु एतद्विशेष्यकसाध्याभावज्ञानप्रमात्वनिश्चयत्वेन प्रतिबन्धकत्वे
गौरवादित्यर्थः यत्र यत्र साध्याभावज्ञानमस्ति न तु तत्राप्रामाण्यज्ञानं न वाऽप्रामाण्यज्ञानं तत्रानुमितिर्न भ
वत्येवेति भावः साध्याभाववत्यत्र वृत्तित्वप्रमात्वविषयकत्वेऽनुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वप्रसक्ताभावसा
भासत्वं दुर्वारमिति तन्न प्रमेयत्वविशिष्टव्यभिचारादेर्विवक्षितज्ञानतादृशविशिष्टानवच्छेदकत्वे नाभासतायोगादिति
ननु गृहीताप्रामाण्यकसाध्याभावनिश्चयप्रतिबन्धकेन प्रथमोपात्तेन प्रमात्वनिश्चयेनैव तथा स्यादत आह अन्यथेति

स्ता

यो

स्य=२ आह=

मु॰
टी॰
८८

178

सत्प्रतिपक्षज्ञानादावित्यादिना ॥ सिद्ध्यादिपरिग्रहः ॥ प्रतिबंधकतापत्तेरित्यस्यानुमित्यादेरिः ननु साध्याभावज्ञानप्रमात्वज्ञानेऽनुमि
तिप्रतिबंधकत्वदर्शनात्तेनैव तद्व्याप्तिशंकाभावात् प्रमात्वज्ञानस्यानुमितिप्रतिबंधकत्वमत आह किंचेति क्वचिदप्युपयुज्यत इ
ति तथा चानुमितिनिवर्त्तकज्ञानान्यत्वं प्रतिसाध्यज्ञानप्रतिबंधकीभूतज्ञानविषयत्वाभावात्साध्याभावज्ञानप्रमात्वे हे
त्वाभासत्वमितिभावः ॥ व्यभिचारज्ञानादेरित्यादिना ॥ सिद्धिज्ञानपरिग्रहः ॥ भेदादिति तथा च वाधस्य लिंगसिद्धिव्यभिचा
रान्यतरनियमेऽपि वाधज्ञानस्य व्यभिचारादिविषयकत्वाभावेन तस्य हेत्वाभासांतरत्वमिति भावः ॥ न च हेतुमान् पक्षः
साध्याभाववानित्याकारकस्य वाधग्रहः ॥ कुतो न भवति सामग्रीसत्वात्तथा च व्यभिचारज्ञानात्मिकैव वाधबुद्धिरि
ति वाच्यं परामर्शात्मकव्यभिचारज्ञानस्य प्रतिबंधकत्वेन वाधत्वे द्वैव्यभिचारविषयकत्वासंभवात् एकत्र
हेतौ व्यभिचाराव्यभिचारविषयकैकनिश्चयासंभवाच्च न च योगोलकपक्षकधूमसाध्यकवह्निहेतुके वाधलौ
किकप्रत्यक्षत्वव्यभिचारलौकिकप्रत्यक्षत्वमपि व्याप्तिनिश्चये सत्यपि भविष्यतीत्यत आह किं चेति अकिंचित्कर इ
ति व्यभिचारज्ञानं हि अनुमितौ न साक्षात् प्रतिबंधकं किंतु परामर्शप्रतिबंधद्वारा तथा च परामर्शानंतरकालीनव्य
भिचारज्ञानमकिंचित्करमिति तत्र वाधबुद्धिरेव प्रतिबंधकेति भावः ॥ व्यभिचाराद्यसंकीर्णमपि वाधं दर्शयति पक्षमि
त्यादिना वाधस्यैवेति तत्र पक्षे हेतुसत्वेन सद्धेत्वात्सिद्धेः प्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्व रूपस्यव्यभिचारस्याभावादि ८८

आप्ति

तिभावः बाधस्य व्याप्यभिन्नत्वे हेत्वाभासान्तराव्याप्त्या अपि तत्त्वघ्यापवां नाग्न वेतीति पाठः बाधस्य साध्याभाववद्विशिष्टप
त्वादिरूपव्याप्यत्वात् प्रतिपक्षस्य च भिन्नाव्यभिचारविरुद्धयोश्च व्याप्यासिद्धावन्तर्भाव इत्यर्थः अन्यथेति व्यभिचारादि त
त्यं=४ ग्रिव्यभिचारादिज्ञानस्यापि व्याप्तिग्रहप्रतिबन्धकज्ञानविषयत्वेन पञ्चहेत्वाभासातिरिक्तहेत्वा
भासत्वे स्यादित्यर्थः न प्रतिबन्धक इति साध्याभाववद्व्याप्यवत्ताज्ञानस्य साध्यवत्ताज्ञान[redacted]विरो
ह=५ धित्वे मानाभावादित्यर्थ इति भावः हेतुकतावीजस्याभिन्नतयेति साधारण्यस्य व्यभिचारज्ञाने विरुद्धस्य सामा
ति नाधिकरण्यग्रहे प्रतिबन्धकत्वादिति भावः असाधारण्यघटके सपक्षत्वे ति व्यर्थगर्भे ननु साध्यवत्त्वमात्रमित्याह
त्व सपक्ष इति यवमग्रेपि सपक्षत्वविपक्षयोर्नानिलयोर्ति व्यर्थनिवेशस्य फलमाह शब्द इत्यादिना सर्वमुक्तमिति अ
साधारणे साध्यासमानाधिकरणा इत्यादिनोक्तमित्यर्थः केवलान्वयिपक्षक इतीति अनुपसंहारिसाध्यसंशयरूपे
ग्रास्यात्वेन सर्वमभिधेयं प्रमेयत्वादित्यादित्यादौ दोषदासिद्धिः सिसाधयिषा च तदा साध्ये निश्चये सत्यभावेन सामाना
धिकरण्यघटितव्याप्तिग्रहसंभवात् नस्यपक्षहेतोर्बलवत्तया सिसाधयिषाविरहविशिष्टसिद्ध्यभावे सत्वनुपपा
दयति सर्वमभिधेयमित्यादिना सर्वे सपक्षत्वनात्सामानाधिकरण्यग्रहस्य लाभावादिति संशयेत्यतिरोणेति
श्चयवारणायेति निश्चयं प्रति संशयसामग्र्याः प्रतिबन्धकत्वावश्यं वाच्यतया प्रकृते सर्वं च साध्यसंदेहसत्वेनक्त

त्व=१ सतदा केवलान्वयित्वेपि नतत्रातिव्याप्तिः अनुपसंहारिणो
हेत्वा=२

मु॰
टी॰
७६

रि प्रमेय

वैतन्नसाधनग्राःसत्वेन साध्यनिष्ठयस्यकुत्राप्यसंभवेन व्यापकत्वसामानाधिकरण्यविशिष्टधूमत्वादिरूपव्याप्ति
[redacted] ग्रहानुत्पादात्तत्रानुमितिविरहोपसंहारिणो हेत्वाभासत्वमिति भावः। ज्ञानेतरभावादितिज्ञानं दानीमपि केव
लान्वयिपक्षतावच्छेदकत्वरूपस्यानुपसंहारित्वस्य ज्ञानेतरभावादित्यर्थः तथाच ज्ञाऽनुपसंहारित्वस्य सत्वान्नस्याव्य
भिचारज्ञानानुत्पादप्रयोजकत्वाभावाद्धेत्वाभासत्वानुपपत्तिरिति भावः। न च संशयसामग्र्याः सत्वात्कथं पक्षैकदे
शे साध्यनिश्चय इति वाच्यं सर्वत्र धर्मितावच्छेदकसंशयसामग्रीसत्वेपि घटत्वादिधर्मितावच्छेदकसाध्यनिश्चयोत्पादि
बाधकाभावात् समानविषयकत्वेन प्रतिबंधकत्वेप्याह ग्रहत्वेति तस्य सहचारग्रहस्य तस्य सहचाररूपस्य तत्त्व एव विरो
धित्वेन तज्ज्ञानस्यानुमित्यनुत्पादप्रयोजकत्वाभावादिति भावः। न च तत्र सहचारग्रहप्रयोजकः संशयः एव हि
त्वाभासत्वस्यापि स्वरूपत एव विरोधित्वात् न च संशयविषयस्य साध्याभावविशिष्टपक्षादेरेव तत्त्वाभासत्वमि
ति वाच्यं सर्वस्याभिधेयमित्यादावभिधेयत्वाभावविशिष्टपक्षाप्रसिद्धेरित्यन्यत्र विस्तरः तदर्थं इति तेन साधा
रणेनातिव्याप्तिरिति भावः। स्वसाविषयकप्रतीतिविषयत्वरूपसाध्यघटितभावादृश्यमानरेति न च नीलधूमत्वस्या त्वा
पिताद्वशधर्मान्तराघटितत्वमस्त्येव धूमत्वस्य नीलधूमत्वभिन्नत्वाभावादिति वाच्यं स्वाविषयकप्रतीतिवि
षयत्वस्य स्वपर्याप्त्यवच्छेदकतानिरूपकप्रकारतानिरूपितावच्छेदकतापर्याप्त्यानधिकरणत्वपर्यवसितत्वस्य ७६
धूमप्रागभावत्वेति तस्य व्याप्यतावच्छेदकीभूतधूमत्वघटितत्वेन तत्संग्रहो न स्यादित्यभावः॥ स्व-द

समानप्रकारकत्वेनैव विरोधित्वादि॥

पर्वतत्वे ... लोक

तद्रूपत्वात् शुद्धधूमत्वपर्याप्तावच्छेदकतानिरूपकप्रकारत्वनीलत्वादिविशिष्टधूमत्वपर्याप्तावच्छेदताकप्रकारत्व
योर्भेदात् ननु एवं वह्निमदन्यावृत्तित्वस्य वह्निव्याप्यतावच्छेदकतानुपपत्तिः तस्य वह्निनिरूपितात्वस्य धर्मान्तरत्वादिति न
तद्धूमान्यान्यत्वादेर्व्याप्यतावच्छेदकतापत्तिभिया धर्मान्तरस्य विशेष्यविधयावच्छेदकत्वविवक्षणाच्छाशक्यत्वादिति
चेन्न स्वसामानाधिकरण्यपदेन स्वव्यापकस्यैव विवक्षितत्वात् वह्निमदन्यावृत्तित्वाव्यापकत्वाद्धूमत्वस्य धूमाभाव
व्यापकत्वाद्वोक्तदोषस्य प्रकाशानां सव्यापकत्वे च धर्मान्तरस्यैव घटकस्य साध्यसंबंधितावच्छेदकत्वेन अन्यथा धूमा
लोकान्यतरत्वस्य वह्निव्याप्यतावच्छेदकतापत्तेः धूमत्वालोकत्वयोः प्रत्येकमन्यतरत्वाव्यापकत्वादिति विरुद्ध
योः परामर्शो हेत्वोरित्यत्र च विरुद्धयोर्हेत्वोः परामर्श इति भ्रमवारणायाह समानाधिकरणेति सत्प्रतिपक्षत्वेनाभिमतो
हेतुसत्त्वासाध्यस्य विरुद्धायः साध्याभाव इत्यर्थः ननु सतिकालीनघट इत्यादिस्थले मयुक्तं तत्र पर्वतत्वघटत्वेनाध
स्मृत्यत्वाभावादित्यत आह पर्वतत्वावच्छेदकेति कालस्येव देशस्यापि पर्वतत्वावच्छेदकत्वे बाधसंभवादप्रदर्शनेन
न्यूनत्वमतां परिहर्तुमाह एवमिति बोधामिति तत्र पर्वते वृत्तेः संयोगस्य तेषि पर्वतत्वावच्छेदक [illegible]
मूलावच्छेदेन संयोगाभावादिति भावः इत्यनुमानत्वरूपम् अवसरसङ्गतिमभिप्रेत्याह उपमितिमिति तत्रोपव
येसादृश्यपदर्शनसादृश्यज्ञानं तत उपमितिकरणमिति नवीनमते तेनातिदेशवाक्यार्थस्मरणव्यापारः सा

अतिदेशवाक्यार्थशाब्दबोधः करणात्

मु.
दी.
८

दृश्यविशिष्टपिंडदर्शनेसंस्कारोत्तितिसंप्रदायमतं संस्कारितया आवश्यकं सादृश्यविशिष्टपिंडदर्शनस्यैवकरण
त्वंयुक्तमित्युपेक्षितं स्मरणं जातमिति [illegible]
सादृश्यविशिष्टपिंडदर्शनस्योद्बोधकविधया तादृशवाक्यार्थस्मारकत्वादिभावः तदेवव्यापार इति एतेन सा
दृश्यविशिष्टपिंडदर्शनोत्तरं यत्रातिदेशवाक्यार्थशाब्दबोधस्तत्रातिदेशवाक्यार्थस्मरणापेक्षाभावान्नातिदे
शवाक्यार्थ [illegible] स्मृतिर्व्यापारकं सादृश्यविशिष्टपिंडदर्शनं करणं किंतु साद
श्यज्ञानमात्रं करणं विशेषणज्ञानविधया तज्जन्यमतिदेशवाक्यार्थज्ञानं सादृश्यविशिष्टपिंडदर्शनं चोभय
व्यापार इति कस्यचिन्मतं तत्प्रत्युक्तं यत्र सादृश्यविशिष्टपिंडदर्शनोत्तरं देशवाक्यार्थशाब्दबोधस्तत्रोपमित्यनभ्यु मति=
पगमात् किंतु तदुत्तरं पुनः सादृश्यविशिष्टपिंडदर्शनं ततोतिदेशवाक्यस्मरणं तदुत्तरमेवोपमितिरितिभावः
गवयो गवयपदवाच्य इति ज्ञानं जायत इति एतेनोपमितेर्न प्रमितिभिन्नत्वं किंतु शाब्दबोधात्मिकैव गोसदृशो गवय
पदवाच्य इत्यत्र सदृशपदेनोपस्थितसादृश्यावच्छेदेन गवयपदवाच्यत्वग्रहस्य गोसदृशो गवयपदवाच्य इ
त्याकारकस्योपमितित्वे इदंपदवाच्यस्य पशुत्वं सम गवयत्वावच्छेदेन गवयपदवाच्यत्वविषयिण्या उपमितेर्गवयप दजन्यगवय
त्वविशिष्टोपस्थितिं विना शाब्दबोधस्यासंभवादिति न च गोसादृश्यस्य गवयत्वस्य च प्रत्यक्षेणोपस्थितौ ८.

स्य

वत्वे गवयत्वावच्छेदेनैव गवयपदवाच्यत्वोपमितिर्न तस्मात् सादृश्यावच्छेदेनैव वाच्यत्वोपस्थितेस्ततोऽल्पापि गवयत्वज्ञा
नापेक्षया गोसादृश्यगौरवज्ञानेन तदवच्छेदेन गवयपदवाच्यत्वोपमितेरनुदयात् गवयपदात् गवयत्वप्रकारक
शाब्दबोधानुपपत्तेश्च तत्प्रकारकशाब्दबोधे तदवच्छेदेन शक्तिग्रहस्य हेतुत्वात् न च द्रव्यत्वविशिष्टे सादृश्यज्ञा स्य
नाद्गवयत्वावच्छेदेन गवयपदवाच्यत्वोपमितेरनुदयात् द्रव्यविशिष्टे सादृश्यज्ञानेन द्रव्यावच्छेदेनोपमिति
रूपं र्गवयपदवाच्यत्वोपमितेरनुदयात् द्रव्यविशिष्टे सादृश्यज्ञानेन द्रव्यत्वावच्छेदेनोपमिति जनकं वाच्यत्वेनापू
स्थगवयत्वादिजात्यनुपस्थितिदशायां सादृश्यपरिसंख्यानात् गुरुधर्मविशिष्टे गृहीते तदवच्छेदेन गवयादिपदवाच्यत्वो
ज्ञानस्य पमितिरिति वाच्यं इष्टापत्तेरिति तस्याः भ्रमत्वेन तादृशगुरुधर्मावच्छेदेन गवयादिपदवाच्यत्वासाधकत्वादि
न्याय = ६ तिदृश्यमुपलक्षणं वैधर्म्यविशिष्टपिण्डदर्शनेन करे जलादिविधर्मगुणवती पृथिवीत्यतिदेशवाक्यार्थस्मृतिव्यापारः
पृथिवीत्वावच्छेदेन पृथिवीपदवाच्यत्वोपमितिः फलमित्यपि बोध्यं ननु प्रमानस्य प्रमाणान्तरत्वे मानाभावः न च प्रत्य
क्षादिप्रमितिविजातीयप्रमितिकरणत्वात्तस्य प्रमाणान्तरत्वमुपमितेः प्रत्यक्षादिप्रमितिविजातीयत्वाभावादिति
चेन्न चक्षुरादिव्यापारविगमेप्युपमितेरुत्पादनेन चाक्षुषादित्वासम्भवात् न चानुमानत्वेनानुमानत्वमनुव्यवसा
यादुपमिनोमीति प्रतीतेर्विषयत्वात् उपमिनुतरं साक्षात्करोमीति प्रतीतेरनुदयेन तत्र प्रत्यक्षत्वप्रमाणाभा

शां

मु॰ वाच्च प्रत्यक्षप्रमितेः साक्षात्कारे भासमानत्वव्यवसायविषयत्वांगीकारे अन्यथानुमितेरपि मानसत्वापत्तेः नाप्यनुमितिः व्या
दी॰ प्त्यादिज्ञानं विनाप्युदयात् न शाब्दं पदज्ञानाजन्यत्वात् न स्मृतिः अननुभूतार्थस्मरणायोगादिति संक्षेपः इति श्री
८१ भारद्वाजभट्टबालकृष्णात्मजमहादेवभट्टकृतौ मुक्तावलिप्रकाशे उपमाननिरूपणं समाप्तम् उपजीव्योपजीवक
भावसंगतिमभिप्रेत्याह मूले पदज्ञानेनेति एवकारार्थस्य मूलस्यानुशब्दस्य व्यवच्छेद्यं संगृह्णाति मुक्तावल्यां नतु
ज्ञायमानमिति मौनिश्लोकादौ लिप्यादिनादिनादि बोधकविजातीयहस्तचेष्टादिसंग्रहः अन्यथा पदार्थज्ञान
मात्रस्य व्यापारत्वे तत्रापि पदजन्यपदार्थोपस्थितावपि वृत्तेरघटनमपत्तेः अन्यथात्वे तस्यानुपादाने ननु वृत्तिर्यदि
शक्तिस्तथा गंगादिपदार्थोपस्थितेरभावादनेनाह वृत्तिश्चेति अन्यतरसंबंधः अन्यतरात्मकसंबंधः अत एव पदज्ञा
नपदार्थोपस्थितावेव सा चोक्तेति यद्यपीश्वरेच्छाया पूर्वमुक्तत्वात् वृत्तेः शक्तत्वात् वृत्तेर्वृत्तित्वादितीश्वरेच्छापदेपीत्यपि प्रम
गः एवं गंगापदजन्यबोधविषयत्वप्रकारकच्छायाज्ञानेऽपि सत्वाच्छक्तेरेव तीरबोधोपपत्तेर्लक्षणोच्छेदापत्तिस्तथा
पि गंगादिपदवाच्यत्वव्यवहारस्य तीरादिभिन्नेभावात् गंगादिपदजन्यबोधविषयतावच्छिन्नप्रकारतानिरूपित
विशेष्यतासंबंधेनेश्वरेच्छैव गंगादिपदानां शक्तिः तीरादिनिष्ठविशेष्यतायां गंगादिपदजन्यबोधविषयत्वप्रकार
कतानिरूपितत्वेपि तस्यास्तादृशविषयतात्वेनतादृशप्रकारतानिरूपितत्वमपि तत्र तद्विषयतात्वेनेति नाप्रसंगो ८१

नवालत्वतोऽच्छेद इति अधुनिके नाम्नि आधुनिकैः पित्रादिभिरेकादशेऽहनि संकेतितेनाम्नि ईश्वरेच्छाया इति एकाद
शाहकालीनपित्रुच्चारणानाम विषयत्वेन सामान्यरूपेणेत्यर्थः आधुनिकसंकेतितेत्वन्तु आधुनिकमात्रसंकेतिते
नदीवृक्षादावपि पदत्वसंप्रदायमतेऽस्मरसहेरि निधाय नवीनमते दूषयति नव्यास्त्विति नशान्निरिति तथा च सत्याधुनिक
संकेतितेति लाक्षणिकयादिपदानां शाब्दबोधानुत्पादादिति भावः मतद्वयेऽप्ययमंशे शाक्तमकगगार्यादिपदे शक्तिभ्रममादाय बो
धइत्यवधेयम् व्याकरणादिति भ्रमत्वाद्यात्व तेमानेलडित्यादिव्याकरणादित्यर्थः लाघवादिति कृतित्वजातेः शा(
मत्वावच्छेदकत्वेलाघवादित्यर्थः न च कर्तुरनभिधानादिति अनभिहित इत्यधिकारे कर्तृकरणयोस्तृतीयेत्यनेनान
भिहिते कर्तरि तृतीयाविधानादिति भावः न च तृतीयायां तच्चवानात् प्रयोजकत्वात् ननु कर्तृगतसंख्याभिधानए
व किंप्रयोजकमित्याशंकां न प्रयोजकं दर्शयति संख्याभिधानेति चैत्रः पचति तण्डुलमित्यत्र कर्मत्वादिलाहिणि
कप्रथमान्तपदोपस्थाप्यत्वं डुलादिव्युदासायाह कर्मत्वाद्यनवरुद्ध इति ननु चैत्र त्वमेवोगच्छतीत्यत्राख्यातेनैक
वचनत्वरूपेणोक्तायाः संख्यायाश्चैत्रेऽन्वयः स्यात् कर्मत्वाद्यनवरुद्धत्वात्प्रथमान्तपदोपस्थाप्यत्वात् किंच पक्वमन्नं
भुज्यत इत्यादावन्नादौ संख्यान्वयानुपपत्तिः पाककर्मत्वस्यान्नेऽन्वयेन कर्मत्वाद्यनवरुद्धत्वाभावादित्यत आह कर्म
त्वादीत्यस्येति तथा च कर्मत्वपदमितरपरमनवरुद्धत्वं च विशेषणतयाविवक्षितत्वात् अविशेषणत्वे प्रकारतास्र

मु॰
टी॰
८२
४१

त्यत्वेनस्य च शाब्दबोधात्पूर्वं चैत्रादावपि सत्वाच्चैत्रविशेषेण चश्वमैत्रागच्छतीत्यादौ चैत्रेपि संख्यान्वयापत्तिः न चैवं चैत्री
यस्मात्पश्यमित्यत्रोत्तरवाक्यार्थबोधस्य पूर्वं सत्वात्कथमविशेषणत्वं चैत्रस्येति वाच्यं यत्र खलेकपोतन्यायेन बोधस्त
त्रैव चैत्री येस्मात्पश्यमित्यत्रोत्तरवाक्यार्थबोधस्य पूर्वमभावात्तेनाविशेषणत्वनान्वयोविषयत्वपर्यंतानुधावनेन च
चैत्रपदवपचतीति चैत्रस्यैवत्वं पश्यतीत्यादावेवकारार्थान्वयसिक्कमेवादौ च चैत्रस्याविशेषणत्वात्कथं तत्र संख्यान्व
यइति वाच्यं विशेषणत्वमात्रेणान्वयो विषयत्वस्य विवक्षितत्वात् चैत्रमेनत्स्थले विशेषणत्वमुख्यविशेष्यत्व
भ्यां नान्वयविषयत्वात्तत्र संख्यान्वयापत्तिः यदि च चैत्रश्च मैत्रश्चेत्यादौ चैत्रादेर्येन विशेषणत्वनान्वयविषयत्वा
त्तदा चैत्रेपि संख्यान्वयापत्तिः न च शाब्दबोधतात्पर्यज्ञानस्य हेतुत्वात्सत्वामिति वाच्यं नानार्थादिस्थले शाब्द
बोधतात्पर्यज्ञानस्य हेतुत्वेनानाभावादिसुच्यते तदाविशेषणत्वेविशेषणत्वमात्रप्रयोजकप्रथमान्तत्वत
त्पदानुपस्थाप्यत्वमात्रबोध्यमन विशेषणत्वेन तात्पर्यं न विशेषणत्वमात्रेन तात्पर्यम् तथा च तंडुलं पचती
त्यादौ यदाविशेषणत्वस्तु ख्याविशेष्यत्वाभ्यां तंडुलबोधे तात्पर्यं न तत्र तंडुले संख्यान्वयवारणाय प्रथमान्तेत्यादी
ति भावः इदमुपलक्षणम् चैत्रेणस्थयात इत्यादौ धात्वर्थस्यापादौ संख्यान्वयवारणाय प्रमाने यदि यस्या त्यत्वस्या
वश्यकात्वं हिनीयद्लस्य प्रकारांतरेणप्रयोजनं वक्तुं अन्यथा प्रथमदलार्थमाह यहेतिवि चादवीरणामिति ८२

तस्मात्कृत्येव विशेषणत्वादिति भावः द्वितीयान्तपदोपस्थाप्यत्वादिति प्रथमान्तपदोपस्थाप्यत्वाभावादित्यर्थः अत्रा
कर्तृत्वे चैत्रः पचतीत्यादौ चैत्रस्याख्यातार्थयत्नाधीनस्य धीरभिविभावनीयं इदं तत्वबोधयम् संख्यान्वयबोधे प्रतिबन्धक
तेऽत्रैव प्रथमान्तपदोपस्थाप्यत्वं हेतुः आख्यातेन भावनान्वयाहिंसंख्याबोधस्याकुत्राप्यजननात् संख्यान्वयबो
धत्वव्यापकभावनान्वयायुत्तसंभवात् न चानिरुक्तप्रथमान्तपदोपस्थाप्यत्वस्य जनकतावच्छेदकं भावनान्वयबोध
त्वे संख्यान्वयबोधत्वे वान्यत्र विनिगमनाविरहः संख्यान्वयस्य विषयीकृतमापि भावस्थितत्वया भावनान्वयबोधस्य
जनकतावच्छेदकतावच्छेदकत्वे संख्यान्वयबोधस्य तथात्वे मानाभावात् लकारसामान्यस्य व्यापारोऽर्थ इति मीमांसक
मतं दूषयति गौरवादिति जन्यत्वादिघटितस्य व्यापारत्वस्य पत्नीत्वजात्यपेक्षया गुरुत्वादिति भावः नन्वाख्यातस्य न य
त्नार्थकत्वं रथो गच्छतीत्यादौ तदभावेऽप्याख्यातपदप्रयोगादत आह रथ इति रथो गच्छतीत्यादौ गमनानुकूलव्यापा
रस्य न बोधः किन्तु गमनाश्रयत्वस्यैवेति नवीनमतमास्थितमाह आश्रयत्वे चेति लक्षणा निरूढलक्षणा क्वचित्पा
ठः चक्षुर्जानातीत्यादौ व्यापारजनकत्वे वा लक्षणास्वीकारात् जानातीत्यादावाख्यातस्याश्रयत्वे लक्षणानि
यमान्न सम्भवतीत्यत आह आद्याविति आद्येनाऽत्र गच्छतीत्यनेन तदन्यादिसंग्रहः इदमत्र बोध्यं तण्डुलं पचति चैत्र इ
त्यादौ कर्मत्वं द्वितीयार्थः न च तण्डुलस्याधेयत्वनिरूपितान्वयाकर्मत्वस्य पाके पाकस्य [illegible] इति तण्डुलकर्म

मु॰
टी॰
८२
83

कथानुकूलकृतिमांश्चैत्र इति बोधः चैत्रेण पच्यते तेतु लइत्यत्र पाकजन्यकृतिरूपोर्थः तस्याश्चाधेयतया चैत्रादेरन्वयः
तस्याश्चाधारत्वेन पाके तस्मात्तृतीयपदार्थफलेन तस्य चाश्रयतासंबंधेनान्वयः तु लइति चैत्रवृत्तिकृतिजन्यपाकजन्यफला
श्रयस्तंडुल इत्यन्वयबोधः कृतान्तकर्तृकर्मवाच्यः चैत्रः पक्वान् तंडुलान् यत्र क्वइ नामेव तयान्वयरोधान्नामार्थयोर्भेदेना
न्वयस्याव्युत्पन्नत्वादित्यत्र विस्तरः तथोक्तमिति ड्यमाननिरूपणमेव मरइति शेषः शक्तियहइति भवतीति शेषः
केशेनव्युत्पादितेति गुणेत्र शुक्लादयः पुंसि गुणिलिंगास्तु तद्वतीति शेषः केशेनव्युत्पादितेति गुणे शुक्लादयः पुंसि
गुणिलिंगास्तु तद्वतीति कोशस्योभयत्र शक्तिग्राहकत्वादिभावः लाघवादिति नीलादिमत्त्वापेक्षया नीलत्वादिना
नैलो घवतया शक्यतावच्छेदकत्वादित्यर्थः नीलत्वादीति विशिष्टेतु लक्षणेति गुणवचनानां मतुपो लुगिष्ट इति स्म
रणात् लुप्तेन मतुप्येव विशिष्टार्थबोधसंभवेः लक्षणायेत्यपि वदंति ततच्छदानयते ननु व्यवहारेणात्तु य
ल्लुप्तेनमतुप्येव विशिष्टार्थबोधसंभवेनादिनानुमिते चैत्रानयनादिधर्मिककार्यताज्ञाने पदानां कारणत्वे
लाघवाय पदत्वावच्छेदेनैव गृह्णीते एवं च सत्यानयनत्वरूपयावाच्यतानिनाविषयकशाब्दत्वावच्छिन्नं प्रतियदा
नेनकारणतेति कार्यकारणभावाय पर्यवसितः इयमेव कार्यान्वितपदानामनुभाविका शक्तिः एवं च कार
यान्वितविषयकशाब्दत्वव्यापकीभूतकार्यताविषयकशाब्दत्वव्यापकीभूतकार्यताविषयकशाब्दत्वाव ८२

च्छिन्नजनककार्यतावाचकलिङादिदाभावात् कथं कोशादितः शक्तिग्रह इति प्राभाकराद्वेष्टं तन्मतं दूषणेन दूषयि
तुं तन्मतसिद्धमर्थं दर्शयति इत्थं चेत्यादिना एतेन स्मारकशक्तिः प्रसंगेऽननुभाविकशक्तिप्रदर्शनमनुचितमित्या
शंकानिरस्तानन्नुभूतत्वेनीलोघट इत्यादितः कार्यताविषयकबोधापत्तिः तत्रतादृशपदानां सामर्थ्याद्वधार
णादिति तवैवोक्तत्वादित्यत आह कार्यताबोधं प्रति चेति सामर्थ्यात् तदभावादिति कार्यताबोधं प्रति दानां स्वजन्य
कार्यतोपस्थितिद्वारा हेतुत्वे घटादिपदानां कार्यत्वस्मारकशक्त्या कार्यतोपस्थापकलिङादिपदाभावान्न भूतले
घट इत्यादितः शाब्दबोध इति भावः लाघवेनेति कार्यान्वितघटशाब्दत्वापेक्षया घटशाब्दत्वस्य कार्यतावच्छेदकत्वला
घवेनेत्यर्थः अत एव कार्यताविषयकबोधप्रतिपदानां हेतुत्वादेव तत्कारणत्वेन सखण्डः खयोः कारणत्वेन हेतुतया
तादृशशाब्दबोधहेतुतया व्यभिचारादिति घटादिपदे कार्यताविषयकबोधाजनकत्व इति नियमे व्यभिचारादित्य
र्थः कार्यत्वाविषयबोधस्यापि चेत्र पुत्रस्ते जात इत्यादितो जननादिति भावः अध्याहार्य इति तथा च तत्रापि लोङा
दिजन्यकार्यतोपस्थितेः सत्त्वे न कार्यताविषयकबोधस्य दोषाय तत्रतादृशनियमे व्यभिचार इति भावः तदभावा
देति तत्पुत्रस्तादिकार्यतावाचकपदाध्याहारासंभवाच्चेत्यर्थः भट्टमतप्राद्वैयन्त्वमतमुपसंहरति इत्थं चेति
लाघवादिति अन्वितघटशक्तिकल्पनापेक्षया घटमात्रे तत्कल्पने लाघवादित्यर्थः पदपदेत्यस्य देहलीदीपन्या

न्यः
टी॰
८४
84

येनान्वयः न च हि तादृशाहिविषयव्यवहारेणाकं गोदीर्घस्कके वा यव पदस्य शक्तिरिति संदेहे स्पतिहि यवपदस्य इति वाक्य
शेषादीर्घस्कके शक्तिर्निर्णीयत इत्यन्वयः ननु तु यवपदस्य वाक्यशेषेणादीर्घस्कके शक्तिः कंगावपि शक्तिः सत्वेन बा
धकाभाव इत्यत आह नानाशक्तौ नीति कुत्र तर्हि हर्यादिपदे नानाशक्तिकल्पनेत्यत आह हर्यादिपदे त्वेति विनि
गमकाभावादिति विनिगमनेति न च कंगौ शक्त्याभयत्र तुल्यत्वात्स्म कंगौ च वाक्यशेष एवं विनिगमकस्तादिति भा
वः आख्यातस्य यत्नार्थकत्वमिति न च विवरणस्य कथं शक्तिग्राहकत्वं तत्र चकपदाभावादिति वाच्यं आख्यातं
यत्नत्वविशिष्टे शक्तिं करोतीति प्रतिपादितार्थप्रतिपादकत्वादित्यनुमानविधया तस्य शक्तिग्राहकत्वात् प्रसिद्ध
पदस्येति प्रसिद्धार्थकपदस्येत्यर्थः तिङर्थधर्मिणां नामार्थान्वयस्यानुत्पन्नत्वान्नेदं शक्तिग्रहस्योदाहरण
मिति तत्त्वयावः स्फुरत्स्य पचतीति ज्ञानमोनितिदित इत्यादौ तिङर्थधर्मिणोतथात्व यदर्शनेनाहं शक्तिनियमस्या
सिद्धत्वम् संगान्यं रमत निराकरणपूर्वकं स्वमते ज्ञात्यादिविशिष्टशक्तिं व्यवस्थापयितुं मीमांसकमत आह जा
तावेवेति ज्ञातिविशिष्टशक्तिस्वीकारे ज्ञातावपि शक्तिग्रहस्यावश्यकत्वात् नानागृहीताविशेषणान्यायात तथा ज्ञा
तावेव शक्तिर्लाघवादित्यत उक्तं विशेष्यं नाभिधा गच्छेत् तद्दोषाणां शक्तिर्विशेषण इति भावः यस्यां कस्यां चित्तव्यक्तौ
शक्तिः सर्वासां वेति विकल्पाये दोषमाह व्यभिचारादिति अगृहीतशक्तिकव्यक्तावपि शाब्दबोधोदयेन न त्वशक्ति ८४

त्वानाभावान्न व्यभिचार इति भावः द्वितीयेन साह ज्ञानत्वादिति व्यक्तिभेदेन शक्तिभेदात् तज्ज्ञानत्वस्यादित्यर्थः असं
भवादिति जातिभासकसामग्र्या एव व्यक्तिभासकत्वादिति भावः इदमेव कथमिति चेत् व्यक्तिविशेष्यकजाति
प्रकारकशाब्दबोधे जातिविषयकशक्तिज्ञानत्वेन हेतुत्वात् न च तादृशबोधे व्यक्तिशक्तिज्ञानत्वेन हेतुत्वम
भ्युपगम्य व्यक्तावेव शक्तिः किं नांगीक्रियत इति वाच्यं तथा सत्यनन्तत्वादिदोषप्रसंगादिति शक्तिं विनेति
पदजन्यपदार्थोपस्थितेः शाब्दबोधं प्रति हेतुत्वात् व्यक्तिशक्तिं विना तज्ज्ञानानिर्वाहादिति भावः लक्षणेति ताव
तैव तत्पदजन्यपदार्थोपस्थितेर्निर्वाहादिति भावः अन्यथेति प्रतिसंधानं विनापीति गामानयेत्यादौ गो
त्वजातेः नयनान्वयानुपपत्त्या गोपदस्य गवि लक्षणा स्यात् कारपि गौ रक्तेत्यादौ गोत्वजाते रक्तिमान्वया
नुपपत्ते लक्षणाबीजस्याभावेन लक्षणायाः स्थिकत्वे मत्वकत्वादिति भावः स्वमते सर्वत्रैव दोषमाशंकवा
रयति न चेत्यादिना एकस्या इति ईश्वरेच्छारूपाया शक्तेः स्वरूपेणकत्वादित्यर्थः न चाननुगम इति गोत्वज्ञाता
स ननु गतत्वाविषयतासंबंधेन शक्तिज्ञानकारणतावच्छेदकत्वासंभव इत्यर्थः गोत्वादेरेवेति तथ
च गोशाब्दबोधे गोत्वविशिष्टविषयकशक्तिज्ञानत्वेन हेतुत्वात् नोक्तदोष इति भावः ननु सर्वत्र पदजन्यपदा
र्थोपस्थितेर्हेतुत्वे मानाभावः ननु सर्वत्र पदजन्यपदार्थोपस्थितेर्हेतुत्वे मानाभावः कथमन्यथा शाब्दबो

स० टी०
८५
85

धेऽसंसर्गाभाने नचैवं पदानुपस्थितेः घटादेरपि भानापत्तिरिति वाच्यं गोविशेष्यकगोत्वप्रकारकशाब्दबोधं प्रति गोत्वश
क्तिज्ञानत्वेन हेतुत्वस्वीकारात् तादृशशक्तिप्रसंगविरहादित्यत आह किंचेति नितदावच्छेदको शक्तिरिति गोःशब्देति वि
शिष्टज्ञानं प्रमात्मकमेव वक्तव्यमिति अन्यथा व्याप्त्यभावात् प्रमायाश्च वस्तुसाधकत्वादिति भावः समानप्रकारत्वेनेति
ईदृशशक्तिज्ञानस्य गोत्वप्रकारकत्वाभावेन गामानयेत्यादौ गोत्वप्रकारकस्मरणशाब्दबोधयोरनुपपत्तिरित्यर्थः
नच गोपदं गोत्वे शक्तमित्याकारकशक्तिग्रहस्यैव शाब्दबोधयोरनुपपत्तिरित्यर्थः नच गोपदं गोत्वे शक्तमित्येतादृ
शशक्तिग्रहस्यैव शाब्दबोधहेतुत्वात् स्वपरशक्यांशे गोत्वप्रकारकत्वात् तत्प्रकारकशाब्दबोधानुपपत्तिरिति वा
च्यं शक्तिग्रहपदं स्वांशे गोत्वादिप्रकारकत्वं शाब्दबोधस्यापि तदंशे गोत्वादिप्रकारकत्वमित्यत्र तादृशसमानप्रकारक
त्वस्य परमते सिद्धान्तितत्वात् अतएव पूर्ववादे पूर्वं सम्पूर्वमनुपस्थितत्वात् कथं न च शक्तिग्रहस्याशक्यकार्यत्वेन घ
टादिषु शक्तिग्रहायोग्यतया शाब्दबोधे एवं भानुमित्युक्तं तैरिति ननु कार्यत्वाद्युपाधिप्रकारकशाब्दबोधस्थले
न तादृशसमानप्रकारकत्वस्य तदनुमतत्वेपि जातिप्रकारकशाब्दबोधस्थले तादृशसमानप्रकारकत्वस्य तदनुमत
त्वेपि जातिप्रकारकशाब्दबोधस्थले तादृशसमानप्रकारकत्वं न तदनुमतमत आह किंचेति शक्यतावच्छेदकवाच्या
मितिगोत्वधर्मिकशक्यत्वज्ञानस्य पदधर्मिकगोत्वादिशक्तिज्ञानस्य वा शाब्दबोधहेतुत्वे गोत्वत्वावच्छिन्नगोत्वविष

यत्तायाः निवेशस्यावश्यकः। निर्धर्मितावच्छेदकशक्तिज्ञानस्य गोत्वाद्यंशे निःप्रकारकशक्तिज्ञानस्य वा विपरीतज्ञानावि
रोधिनः शाब्दबोधाहेतुत्वात्। तथा च गोत्वत्वेन शक्यतावच्छेदकत्वावगाहितादृशप्रमाया विषयसाधकत्वात् ज्ञानत्वेन शक्यतावच्छे
दकत्वसिद्धिरिति भावः। नवेवं गौरवमिति। न च गोत्वत्वावच्छिन्नविषयकशक्तिज्ञानस्य कारणत्वेपि सम्भवमानत्वेन तस्य
विषयसाधकत्वमिति वाच्यं तथा सति प्रतीतेः कारणतावच्छेदकत्वांशेपि भ्रमत्वस्य वक्तुं शक्यतया कारणतावच्छे
दकत्वादीनां कुत्रापि सिद्धिर्न स्यात्। मास्तु वा गोत्वत्वादीनामवच्छेदकत्वं तथापि गच्छेत्तत्समवेतत्वादिघटितगोत्वत्वादे
र्धर्मितावच्छेदकतायात्मविषयतायाः शाब्दबोधकारणतावच्छेदककोटिप्रवेशप्रयुक्तगौरवं दुर्वारमेवेति स्वमतमु
पसंहरति तस्मादिति व्यक्तावेवेति। जात्याकृतिविशिष्टव्यक्तावेव अवयवसंस्थानविशेषरूपायाश्चाकृतेः शक्यत्वे
पि न जातिवत् तदवच्छेदकत्वं सामानाधिकरण्यसंबंधस्य शक्यतावच्छेदकत्वकल्पने गौरवात्। अत्र च परस्परयोरि
त्यागेन परस्परयति त्याने परस्परं वोधाभावात्त्रिष्वेकैव शक्तिरेतद्बोधनायैव सूत्रे जात्याकृतिव्यक्तयः पदार्थ इत्ये
कवचनमिति संप्रदायः। नव्यास्तु संस्थानानुपस्थितावपि गोत्वादिना गवाद्यन्वयबोधाज्जातिविशिष्टव्यक्तावेव शक्तिः
संस्थाने च पृथगेव शक्तिरिति व्युत्पत्तिवैचित्र्याच्च संस्थानव्यक्त्योरेकपदार्थयोरपि परस्परमन्वयबोधः सोऽत्र पदार्थ इ
त्येकवचनं जातिव्यक्त्योरेकशक्तिलाभार्थमेवेत्याहुः। तच्छब्दस्य वक्तृबुद्धिविषयतावच्छेदकीभूतघटत्वाद्यवच्छिन्ने

मु॰ टी॰ ८९ 86

शक्तिः अथ घटत्वादीनां तत्पदशक्यतावच्छेदकत्वे शक्यतावच्छेदकभेदाच्छक्तिभेदापत्तिः न च शक्यतावच्छेदकभेदे
पि शक्यतावच्छेदकतावच्छेदकस्य बुद्धिविषयतावच्छेदकत्वस्यैक्यान्न शक्तिभेद इति वाच्यं तस्य शक्यतावच्छेदक
त्वेन शाब्दबोधे तज्ज्ञानापेक्षेति चेन्न बुद्धिविषयतावच्छेदकत्वस्योपलक्षणतया शक्यतावच्छेदकत्वात् उपलक्षणस्य
शाब्दबोधे नादेनाभानानंगीकारात् घटत्वादेश्च शक्यतावच्छेदकत्वे चाविशेषणत्वे नैव भानं तस्य शाब्दबोधे भाने
विशेषणत्वे च तत्पदजन्यबोधविषयत्वेन शक्तिविषयत्वं उपलक्षणत्वे च तत्पदजन्यबोधविषयत्वेन शक्यविषयत्व
मिति एवमिदं पदादिविषयापि न चापीदमेतदोः प्रत्यक्षबुद्धिविषये अदसः परोक्षबुद्धिविशेषे शक्तिः अत एव तेषां विभि
न्नार्थकत्वम् एवं तदोपि इदमः प्रत्यक्षगतसमीपतरवर्ति चैतदो रूपं अधसस्तु विप्रकृष्टे तदिति परोक्षे विजानीया
दित्यपि पठंति किंपदस्य जिज्ञासाविषयत्वविशिष्टे शक्तिः सर्वपदस्य व्यापकत्वे सर्वे घटा रूपवंत इत्यादौ घटरूपव
त्त्वव्यापके रूपवत्त्वमिति बोधात् तत्पदस्य तत्कालीनसंबोध्ये चैत्रत्वादिशक्यतावच्छेदकं एवमहंपदस्य तत्का
लीनस्वतंत्रोच्चारयितृचैत्रत्वादिमाते ज्ञानं च व्याख्यातत्वयामहं वचनात्मपर्वत्यादीनमन्यदा केवर्धिश्चपात्ता वि
लुरः शक्तं पदं विभजते शक्तं पदमिति तत्र विदिति किंचिदित्यर्थः एवमग्रेऽपि मण्डलादीनां च बहुपुस्तकेषु मंडपादीनि
पाठः प्रामादिकः प्रतिबंधकत्वादिनच शुद्धज्ञानस्य योगिकार्थबुद्धेः प्रतिबंधकत्वप्रयोगेऽपि योगिकार्थस्य पंकजनिकर्तृत्व ८९

स्वबोधेन स्यादिति वाच्यं पद्मत्वावच्छिन्नविशेष्यतानिरूपितपंकजपदयोगजन्यपंकजनिकर्तृत्वावच्छिन्नविषयताशा
लिबोधप्रतिरूढिज्ञानस्य प्रतिबंधकत्वेन पद्मत्वधर्मिकयोगार्थबुद्धेः प्रतिबध्यतावच्छेदकानाक्रान्तत्वादिति विरोध
विषयकज्ञानस्य प्रतिबंधकत्वेऽजनकज्ञानविघटकत्वेनैवेतियममेगाहत्वरसं प्रांचा इत्यनेनेन सूचयन्मणिकारमत
माह वस्तुतस्त्विति सान्निध्यादिति निरूढार्थस्य सन्निहितोपस्थितिकत्वादित्यर्थः व्यक्तिवचनानां सन्निहितोपस्थितिक
त्वादित्यर्थः व्यक्तिवचनानां सन्निहितोपस्थितिकत्वादित्यर्थः व्यक्तिवचनानां सन्निहितविशेषपरत्वनियमादिति भा
वः व्यक्तिवचनानां किंचिद्व्यक्तितात्पर्यकारणं सन्निहितविशेषपरत्वमुपस्थितविशेषपरत्वमित्यर्थः तथाचप
द्मे तात्पर्यसत्त्वेन रूढ्यर्थयोगार्थयोः परस्परान्वयबोधजनकसामग्रीतरसत्त्वेन च रूढार्थपद्मयोगार्थान्वयेन
कुमुदादाविति निरूढिज्ञानस्य योगार्थबुद्धौ प्रतिबंधकत्वे एवं च रूढार्थयोः परस्परान्वयबोधसामग्रीस्थले
वन कुमुदादेः पंकजपदाद्बोधः यत्र तु तयोः परस्परमन्वयबोधसामग्रीविरहस्तत्र कुमुदादेर्बोधो भवत्येव परं तु
कुमुदत्वेन रूपेण कुमुदत्वविशिष्टपंकजनिकर्तृत्वेन वा लक्षणयाप्युक्तपंकजनिकर्तृत्वेन तद्बोधे वेत्याह यत्र तु
वार्थत्वादिना प्रतिसंधीयत इत्युत्तरं कुमुदत्वेन बोधे च तात्पर्यमित्यपि परिशेषेण लक्षणयेति पंकजनिकर्तृकुमु
दत्वेन बोधो लक्षणयेत्यर्थः रूढ्यर्थयोगार्थयोः परस्परसामग्रीविरहो पलक्षकमेतत् तेन रूढ्यर्थबाधप्रति

मु. टी.
८
८१

संधानामत्वेपि पत्रसामग्र्यंतरविरहसत्त्वापि लक्षणयाकुमुदेबोधो भवत्येव अवयवशक्तिमात्रेणेति मात्रपदेन ल
क्षणानादरः सूचितः निर्वाहः पंकजनिकर्तृत्वेन कुमुदशाब्दबोधनिर्वाहस्यापत्तेः पद्मत्वेनैवबोधः लक्षणयैवेति
न्नर्थतावच्छेदकरूपस्य ज्ञानेसत्त्वाभावेन तच्छाब्दबोधनासंभवादिति भावः लक्षणा हि द्विविधा जहत्स्वार्था
जहत्स्वार्था च तत्राद्यां प्रदर्शयति गंगायामिति वक्ष्यमाणस्वरसदाहतात्पर्यानुपपत्तिर्वेति सा च लक्षणा च द्वि
तीयां प्रदर्शयति एवं चकाकेभ्य इति दध्युपघातके काके बिडालादिसाधारणदध्युपघातकत्वविशिष्टे एकसा
र्थवाहित्वे एकसार्थवाहित्वविशिष्टे छत्रिपदलक्षणावादिमताभिप्रायेण न्यायमते तु छत्रपदं एकसार्थ
वाहित्वे लक्षणा अन्यथाऽस्वसंबंधितया चैकसार्थत्वेनागच्छत्रितान्वयः एकसार्थवाहित्वे चैकसार्थत्वेनानेक
सार्थगतत्वम् नैरकांत्येनायातीत्यस्यानन्वयापत्तेः न चाजहत्स्वार्थेलोक्तिविरुद्धेति वाच्यं वाक्यलक्षणावा
दिमतेनैवतदभिमानादिति क्वचिद्गंगापदस्य तीरेतात्पर्यग्रहस्थले चिद्घोषपदस्य मत्स्यादौ तात्पर्यग्रहस्थले
तेनैव रूपेणेति न च गंगायामित्यादौ गंगातीरत्वेन बोधे जहत्स्वार्थत्वहानिरिति वाच्यं तीरत्वेन लक्षणाया
मेव जहत्स्वार्थत्वस्य सर्वसंमतत्वात् गंगातीरत्वेन भावेन त्वजहत्स्वार्थैव लक्षणेति एवं पूर्वोक्तस्थले यष्टीः
प्रवेशय मंचाः क्रोशंतीत्यादावपि यष्टिधरत्वमंचस्थत्वादिना बोधेऽजहत्स्वार्था यथा कस्थले यष्टीः प्रवेशय म ८

धाः क्रोशेतीत्यादावुपि पाष्टिघ्रत्वसंबन्धत्वादिना बाधेन हि तन्मात्रार्थं वलक्षणेति ध्येयं अत एवेति नह्मर्मविशि ष्टलक्षणाग्रहस्थलेन न्वयेणोपस्थितिशाब्दबोधोऽस्तीति हेतुत्वादेव एवं च पदानुपस्थाप्यस्यापि लक्ष्यतावच्छे दकस्य शाब्दे भानं स्तुकरमतिप्रसंगस्य तद्धर्मविशिष्टत्वादिनैव वारणादिति भावः इदमुपलक्षणं गंगापद दशक्यप्रवाहसंयोगस्य तीरवृत्त्व बाधादिनापि द्रष्टव्यं लक्षनुलक्षणायाश्चादिश्यमाशंक्यनिरहन्नाथा यस्तत् भीवमाह यत्रेतिनिपरंपरासंबंधवृत्येति स्ववाच्यरेफयुक्तघटितपदवाच्यत्वादिरूपा न च द्वौ रेफौ यत्रेति व्यु त्पत्त्या द्विरेफपदेन स्वशक्यरेफद्वयसंबंधिभ्रमरपदे लक्षणोतेभ्रमरपदेन च शक्यत्वाम्भ्रमरपदे लक्षणेन भ्रमरपदे न च शक्यत्वाम्भ्रमरउपस्थाप्यते इत्येतावतैव सामंजस्ये लक्षद्विरेफपदस्य भ्रमरे परंपरासंबंधवृत्त्युपलक्षणया एवं चलक्षितेनलक्षणं ज्ञापनमिति लक्षितलक्षणा शब्दबोधोपयोगीति वाच्यं तथा च सति द्विरेफमानयेत्यादि तः कर्मत्वादेर्भ्रमरान्वयानुपपत्तेः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वादिति ननु तच्छाब्दबोधेन स्व कपदज्ञानेन न हेतुत्वाल्लाक्षणिकार्थशाब्दबोधः कथं स्यादित्यत आह किं त्विति पदं तरे समभिव्याहृत नशक्ते पदे शक्तिलक्षणेति अन्यतरसंबंधेन यद्धर्मान्तरपदार्थस्त दवच्छिन्नविषयतापर्याप्त इत्यर्थः कुमतिरिप्ष्वित्यादिस वे लाक्षणिकस्थले शाब्दबोधस्यानुभवसिद्धतया लाक्षणिकस्याप्यानुभवकत्वमिति न न्याप्याः ननु शक्या

मु.टी.
८८
88

संबंधो न लक्षणा न द्यामतिवाक्यस्य शक्याप्रसिद्ध्या न च लक्षणा न स्यादिति मीमांसकाद्युपमिष्याख्यानेन तत्कुरु
ते वाक्ये विति ननु गभीरायां नद्यां घोष इत्यादौ नदीपदस्य नदीतीरे लक्षणा स्वीकार्ये गभीरपदार्थस्यैकदेशा
न्वयस्यापरलक्षणाया अस्वीकारे गभीरतीरे न वा काल लक्षणा व कल्पनीयं तत्राह यत्र गभीरेति क्वचिदिति चैत्रस्य गुरुकु
कुमित्यादावित्यर्थः स्वीकृतत्वादिति पदभेदे न व्युत्पत्तिरकल्पनादिति भावः नदीपदस्येति न च विनिगम
नाविरहे न गभीरपदस्य लक्षणा नदीपदं तात्पर्यग्राहकमित्यस्यापि वक्तुं शक्यत्वात् कथं नदीपदमात्रेल
क्षणाभिधानमिति वाच्यं प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेरुत्तरपदस्यैव लक्षणाया उचितत्वात् अत्र
मीमांसकमनुवादिनः वाक्यलक्षणायैवोपपत्तौ गभीरपदस्य तात्पर्यग्राहकत्वकल्पनमयुक्तं न च शक्या
शक्यभावात् शक्यसंबन्धरूपलक्षणापि संभवतीति वाच्यं स्वबोध्यसंबन्धस्यैव लक्षणापदार्थत्वात् ग
गायां घोष इत्यादौ गंगापदबोध्यस्य प्रवाहस्य संबन्धस्तीर इति न च लक्षणा गभीरायां नद्यामिति वाक्यस्य
बोध्या गभीराभिन्ना नदी तत्संबन्धस्तीर इति वाक्येपि लक्षणा एवं समानाम्नोऽपि चित्रगुरिति वाक्येपि चित्रगुपदस्या
वयवशक्त्या चित्राभिन्ना गौः स्वबोध्यास्तु जन्यबोधविषयत्वस्य स्वबोध्यत्वात् न संबन्धस्य स्वाश्रितत्वादि
त्याहुः न तु स्वबोध्यत्वे हि न स्वजन्यबोधविषयत्वं गंगायां घोष इत्यादौ गंगायाभिन्नस्यालाक्षणिकत्वा

८८

पतेरन्वयित्वेन बोधकत्वं वाच्यं न वा नानयापि निर्वाहः अयमेव शक्यापि लाक्षणिकतापतेरन्वयितावच्छिन्नायाश्च
क्यावच्छिन्नबोधकतामेव निवेश्येत्तथा च वाक्यस्य कथं लक्षणात्वं वस्तुतस्तु स्वबोध्यत्वे यद्विशिष्टजन्यशाब्दबोधवि
षयत्वे यद्विशिष्टजन्यशाब्दबोधविषयत्वं तदा गंगायां घोष इत्यादौ गंगापदे लक्षणानुपपत्तिर्गंगापदेन तत्प्रवा
हशाब्दबोधाजनने प्रवाहस्य गंगापदबोध्यत्वाभावात् किंतु शक्यस्य जन्यज्ञानविषयत्वं तद्वाच्यं न च तत्राप्यधिकं
समवाये घटपदस्मारितगगनस्यापि स्वबोध्यत्वापत्त्या तत्संबंधज्ञानात् घटपदेन पटादिशाब्दबोधप्रसंगा
त् एवं च शक्यसंबंधायेत्तया शक्यास्वबोध्यसंबंधस्य गुरुत्वात्तन्न तस्य लक्षणत्वमिति किंच गंभीरायां नद्यामि
ति समासे तस्य गंभीरनदीतीरलक्षकत्वे घोषेणाद्य शाब्दीराधेयत्ववोधानुपपत्तेः आधेयताबोधकपदाभावान्ना
मार्थयोर्भेदसंबंधेनान्वयस्याव्युत्पन्नत्वात् आधेयतासंबंधेनापि तीरस्य घोषादावन्वयासंभवात् गंभीरा
यां नद्यामिति समासाप्रयुक्तसमस्ततीरलक्षकत्वे समासस्यार्थाधेयतादो नाद्यशाब्दीरादेरन्वयानुपपत्तिः अन्यथा नाप्र
कृत्यार्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः गंभीरायां नदीति भाष्यस्य समासस्य प्रकृत्ववात् न च गंभीरायां नद्या
मिति समासे तस्य गंभीरनदीतीरलक्षणात्वे वैतल्लक्षणात्विति शक्यं नाद्यशाब्दत्वविशिष्टघोषादावन्वयानुपपत्तेः
नामार्थयोर्भेदसंबंधेनान्वयस्याव्युत्पन्नत्वात् समासेन भा[illegible]नाद्यशाब्दीरस्येत्तो लक्षणामुपगम्यतस्याभे

मु॰टी॰
८९

देनचोषादावन्वयः इत्यपि नञ्भेदेनान्वयबोधे समानविभक्तिकत्वस्य तन्त्रत्वादित्याशंक्य विस्तरयवं अवयवलक्षणे
वनत्वाकालक्षणेत्यर्थः गोपदस्येति प्रत्ययार्थान्वयानुरोधेनोत्तरपदलक्षणाया युक्तत्वादिति भावः गोमत्ति
गोत्वात्मितिन लक्षीक्रियत इति गोधर्मिकान्वयबोधे गोधे गोधर्मकत्वप्रतिज्ञानस्य हेतुताया आवश्यकत्वादन्यथा
चित्रगुर्न्नोत्वात्मिनादावपितत्पदार्थस्य गोस्थाने तत्पस्यैकदेशे गविचित्रान्वयस्यासंगतत् यद्यपि चतुष्टस्यन्यमि
मादावेकदेशान्वयोपदृश्यते तथापि तादात्म्येनान्यान्वयानन्तोक्रियते इति हृदयम् निपातात्पतिरिक्तेति नि
पातपदमव्ययस्याप्युपलक्षकं तेन च द्रवेत्यादाविवार्थस्य चंद्रस्य प्रतियोगितयान्वयोपपत्तिः अन्य
था अव्ययानिपातातिरिक्तनामार्थेयत्यिभेदेनान्वयबोधस्य स्वीकारे नञ्ञान्वयबोध इति भेदेनान्वयबोधः स्या
दित्यर्थः साक्षादेव निपातानमत्वारीक्रात्मेव भूतलेघट इत्यादावबोधयितास्ते समर्थगणापि घटभूतलयोरन्व
यात् साक्षादित्यस्यापि व्युत्पत्तौ निवेशादिति भावः नञः नञर्थान्योन्याभावस्य स्वरूपकल्पमिति तथा
चात्रापि प्रत्ययार्थो द्वारैव राजपुरुषयोरन्वयान्नोक्तव्युत्पत्तिविरोध इति भावः परन्तु राजपुरुष इत्यादिवि
त्पुरुषे णलक्षणाव्युत्पत्तिवैचित्र्येणास्वत्वादिसमर्गणेव राजः पुरुषादावन्वयस्वीकारात् अन्यथादेशेन
राजमानंगायस्यैव राजमानंगायस्यैवतेनुपेगमा इत्यादौ तत्त्वहेन राजः परामर्शीनस्यात् तस्यैकदेशत्वादि ८९

न्नाकूः द्वंद्वे तु इत्यनेन स्वद्वंद्वेन धवखदिरावित्यत्र धवत्वं खदिरत्वं च प्रत्येकं नोद्देश्यतावच्छेदकत्वं समुदायमुद्दे
श्यतावच्छेदकव्याप्यसंख्याबोधकत्वस्याकाङ्क्षावित्त्वयादिवाक्यप्रामाण्यापत्तिभिया लक्षणेन धवत्वद्वय
स्य खदिरत्वद्वयस्य च बोधापत्तेः परंतु खदिरपदस्य धवखदिरसाहित्याश्रये लक्षणा उपगमेन एवं चो
द्देश्यतावच्छेदकीभूततादृशसाहित्यव्याप्यत्वेन धवत्वद्वयवृत्तिद्वित्वस्य न वा खदिरत्वद्वयवृत्तिद्वित्वस्य
अपि तु धवखदिरोभयवृत्तिद्वित्वस्येति न धवद्वयादिबोध इति मीमांसकमतं शंकते न च साहित्यमिति
साहित्याश्रयत्वमर्थः सहवृत्तित्वरूपं साहित्यं लक्षणमुक्तैकक्रियान्वयित्वमिति विकल्प्याद्यं दूषयति
साहित्येत्यस्य न्यायोरप्रीति द्वितीयं शंकते न चैकेति अननुभवाच्चेति वस्तुगत्या एकक्रियान्वयित्वस्य
धवखदिरयोः सत्त्वेप्येकक्रियान्वयित्वस्य शाब्दबोधाभावादित्यर्थः इदमुपलक्षणम् चैत्रमैत्रौ गच्छे
तइत्यादौ चैत्राद्यपदस्य यदि साहित्यविशिष्टे लक्षणा नदा साहित्यस्य व्यासज्यवृत्तितया वच्छेदकता
व्यासज्यवृत्तेर्गमनकर्तृत्वस्यान्वयासंभव इत्यापि बोध्यं ननु यदि द्वंद्वे न लक्षणा नदा कर्मधारयप्राप्ते द्वंद्व
स्य को विशेष इत्यत आह किंत्विति चार्थे द्वंद्व इत्यनुशासनेन तत्र चार्थाः समुच्चयान्वाचयेतरेतर
समाहारभेदात् तत्र समुच्चयान्वाचययोः सामर्थ्याभावान्न समास इतरेतरसमाहारयोः सामर्थ्यात्स

मु॰टी॰
२॰
५०

नानञ्समासः नञ्चार्थस्य भेदस्याख्यातानाक्षेदे द्वन्द्व इत्याशयः इत्यादाविन्यादिपदेन प्रमाणप्रमेयेत्यादिसमस्तपदविग्र
हः कथमिति यदि समासघटकपदार्थयोर्यत्र भेदस्तत्रैव द्वन्द्वस्तदानीलघटयोर्यत्र भेदस्तत्रैव द्वन्द्वस्तदानी
लघटयोर्भेदाभावात्कथं द्वन्द्वः एवं प्रमाणप्रमेयेत्यादिसूत्रे आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्य
भावफलदुःखापवर्गास्तु प्रमेयमिति सूत्रोपात्तद्वादशविधप्रमेयान्तर्गतमनोबुद्धीन्द्रियाणां प्रमाणप्रमेययोर्भे
दाभावात्कथं द्वन्द्व इत्यर्थः लक्षणेति तथा च तयोर्भेदसत्त्वात् द्वन्द्व इति भावः अनु अभेद इत्यस्य गतं नीलघ म
घटयोरभेदाभावादित्यत आह अभेद इत्यस्येति केचित्तु पदार्थत्वपदजन्यप्रतीतिविषयत्वं तथा च क्वचित्प
दार्थभेदात् क्वचित्पदार्थतावच्छेदकभेदात् द्वन्द्वः प्रकृते च नीलघटयोः पदार्थतावच्छेदकयोर्भेदाद् द्वन्द्वः
अस्तु वा पदार्थतावच्छेदकभेद एव द्वन्द्वः न चैवं घटादिस्पादौ द्वन्द्वस्याप्रसक्तत्वेन तदपवादकः सरूपाणामेक
६ शेषानस्यादिति वाच्यं अप्राप्तेः न च घटपदोपस्थापितघटत्वान्वयादेव द्रुघटबोधसंभवात्सकृ
दुच्चरितेत्यादिश्रुत्यतो मानाभावात् सरूपैकशेषविधेर्घटौ इत्यादावेव सार्थकत्वात् अस्तु वा सकृदिति
व्युत्पत्तिः परं तु सकृदित्यर्थः पदार्थैकदेशवृत्तेर्विशेषणे वस्तुतो बोधविशेषणमेव तदिति न दोष इत्या
हुः समाहार इति अहिनकुलमित्यादावहिनकुलयोः समाहार इति प्रतीतेरनुभवसिद्धत्वादित्यर्थः ५॰

वस्तुतस्तत्राहिनकुलमात्रप्रतीतेस्तोर्नोत्तरपदे समाहारलक्षणा न वा शक्तिरित्यभिप्रेत्योक्तं यदीति पूर्वप
दमिति प्रत्ययानामितिसुप्त्वेर्विनिगमकत्वादिति भावः कथमिति कथं समाहारबोध इत्यर्थः तत्र हेतु
माह समाहार इति वादनाङ्गभावादिति अभिघाताख्यसंयोगावच्छिन्नाक्रियाया एव वादनपदार्थत
याधानरूपेणावच्छेदकीभूततादृशाभिघाताख्यसंयोगस्य समाहारे संभवेन वादनकर्मताभावादित्यर्थः
परंपरासंबंधेन स्वाश्रयवृत्तित्वरूपेण तदन्वयात् वादनकर्मत्वान्वयात् एवमिति उत्तरपदे समाहारल
क्षणेत्यर्थः नन्वमत आह परेत्विति बुध्यत इत्यस्यानन्तु समाहारोपीति शेषः ननु यदि समाहारो न बुध्यते
तदैकवत्त्वसूत्रविषयः समाहारे यमाशायोरेकत्वाभावादत आह प्रत्येकमिति तत्रैकवचनं साधुत्वार्थ
मित्यपि वदंति ननु पाणिपादमित्यादेः समुदायस्य समाहारबोधकत्वाभावे कथं तत्र समाहारसंज्ञेत्यत
आह समाहारसंज्ञा चेति तत्रैवेति तथा च पारिभाषिकत्वेव सामान्यं घटितत्वात्रातिप्रसंगादिति भावः ननु
तादृशसंज्ञायां किं प्रयोजनमत आह अन्यत्रेति समाहारात् परिक्रुद्धद्वंद्व इत्यर्थः तथा च तत्स्वैकवचनत्वक्ली
बलिंगत्वादिप्रदर्शनाय तत्प्रयोजनं तत्र संवेद्यमिति भावः पितरौ श्वशुरावित्यादाविति चेत्पितरावि
त्यादिरूपैकशेषस्थल इत्यर्थः लक्षणेति एकस्य वृत्त्यादेः पितृत्वबोधसंभवेन तत्रैवैकरूपैकशेषविना

म·दी·
९२
१

गत्यभावादिति भावः विद्वद्वैपेक्ष्येऽप्युक्तेऽपि तद्वल्लक्ष्यमात्रादिशब्दस्मरणेनैव शास्त्रबोधानलक्षणोक्तमेवमन्या
यपीति पुमान्स्त्रियेत्यनेनैकशेषस्तत्र दंपती इत्याप्रकारेणोक्ता लक्षणा वानयेत्या दोषा इति वेन मस्तु यो
दित्यादाभ्रातरौ पुत्रौ वित्यत्रापि प्रमाणान्तरेण स्त्रीपरत्वज्ञानेभ्रातृपुत्रौ स्वसृदुहितृभ्यामिति विद्वद्वैक
शेषात् भ्रातृपदे भ्रातृस्वस्रोः पुत्रपदे भ्रातृस्वस्रोः पुत्रपदे च पुत्रदुहित्रोर्लक्षणेत्यर्थः लक्षणेति व
हुत्वानुपयोगमपाने कोपपस्थितेः [illegible]क्तेन एव सम्भवादिति भावः ननु गृहपत इति स्त्रीक्रियत इत्यतिशेषः
वेदानधिकारादिति स्त्रीशूद्रेनाधी[illegible]यातामित्यनेन निषेधादिति भावः यजनासम्भव इति अध्ययनविधि
सिद्धज्ञानसंभवादिति भावः न एवेति श्रुतिबोधितयाजनानुपपत्तेरित्यर्थः ननु स्त्रीशूद्रौ नाधीया
तामिति श्रुते स्त्रीमात्रस्यापति भिपालाय व म किंचिकरं ते शूद्रपदस्य निषादेतरशूद्रपरत्वे निषाद
स्य वेदाध्ययनप्रसंगः अध्ययनपदस्य यागोपयुक्ताध्ययनेतराध्ययनपरत्वे च शूद्रेतरस्यापि यागो
पयुक्ताध्ययनप्रसंग इति चेन्न विशेषतः प्राप्ताध्ययनेतराध्ययनपरत्वादध्ययनपदस्य तेन निषादस्य
यागोपयुक्ताध्ययनेतराध्ययनानिषेधः शूद्रेतरस्य तदध्ययनमात्रनिषेधः सिध्यतीति अदोषत्वादिति व
त्सलक्षणाकल्पनेपि न दोषः शक्यसंबंधरूपलक्षणायाः क्लृप्तत्वात् न च शाब्दबोधं प्रति लक्षणा ९२

ज्ञानस्येहैतन्नकल्पनमधिकमिति वाच्यं निषादानां स्थपतिरिति श्रुत्या निषादसंबंधाभिन्नस्थपत्यनुभ
वस्य लौकिकवाक्येऽदृष्टत्वात् तदनुरोधेन लक्षणाज्ञानहेतुत्वस्य सर्वसिद्धत्वेन वेदाधिकस्याकल्पनादि
ति चेन्न शक्यसंबंधरूपलक्षणाया ज्ञानस्य शक्तिज्ञानं विनासंभवेन शक्तिज्ञानस्यात्रोभयसिद्धत
याभवन्मते वैदिकवाक्यजन्यशाब्दबोधार्थं लक्षणाज्ञानव्याप्तिकल्पनगौरवस्य वज्रकलेपनादि
ति उपकुंभमर्द्धपिप्पलीत्यादावपीति अत्र च कुंभस्य समीपमित्यस्वपदविग्रहः अव्ययीभावस्यानि
त्यसमासत्वात्पूर्वपदार्थप्रधानत्वेनयेति कुंभपदलाक्षणिकत्वेन सा कुंभसंबंधिन उपपदार्थे समीपेऽभेदेना
न्वयात् कुंभसंबंधाभिन्नं समीपमित्युपपदार्थविशेषकोऽन्वयबोध इत्यर्थः केचित्तु उपपदार्थः सामी
प्येन तु समीपं समीपे उपपदलक्षणा स्वीकार्या तु पदद्वयलक्षणापेक्षया उपकुंभपदस्यैव कुंभसमीप
लक्षणा उपपदेन तात्पर्यग्राहकं कुंभसमीपमिति चान्वयबोध इत्याहुः अत्र च यथा प्यर्द्धपिप्पलीति
तत्पुरुषे शक्तिनिराकरणं पुनरुक्तं एवं तत्पुरुषे तन्निरासात् तथापि सर्वत्रोत्तरपदार्थप्रधानराजपुरु
षादौ तन्निराकरणे पूर्वपदलक्षणाया इह च पूर्वपदप्रधानेऽर्धपिप्पल्यादितत्पुरुषे उत्तरपदलक्षणा
या निराकरणमिति भेदाद्यो न रुक्तमिति ध्येयं वैयाकरणमतं दूषयति इत्थं चेति तदशक्तेरिति

मु॰दी॰
९२
९४

समासघटकीभूतपदशक्तिलक्षणान्यामित्यर्थः आसत्तियोग्यताकांक्षेतिमूलादासत्तेःस्वरूपसत्त्वाएव का
रणत्वलाभस्तेन तु योग्यताज्ञानादिवदासत्तिज्ञानस्य ज्ञानपदस्य समासाघटकासत्तिपदार्थज्ञानत्वघात
स्वरूपसत्या आसत्तेः कारणत्वं न संभवति गिरिर्भुक्तमित्यादौ गिरिपदाग्निमत्पदयोरव्यवधानभ्रमेण
शाब्दबोधोदयेन व्यभिचारादतो मूलस्य मासत्तिपदं ज्ञानपरतया व्याचष्टे आसत्तिज्ञानमिति आ
सत्तियोग्यतेति विसर्गापूर्णपाठस्तु अज्ञत्वेव न न सन्निधानं तु पदस्यासत्तिरुच्यत इति मूलोक्तस्या
सत्तिलक्षणस्य गिरिर्भुक्तमित्यत्रागतिव्याप्तिस्तत्रापि गिरिपदभुक्तपदयोरव्यवधानसत्त्वादतो व्या
चष्टे यत्पदार्थेति अयेत्तितस्तात्पर्यविषयः तयोरिति तयोः पदयोरित्यर्थः तादृशपदयोरित्यर्थः
तादृशपदयोरव्यवधानमासत्तिरूपडपस्थितिकारणमित्यर्थः तथा च गिरिपदार्थभुक्तपदार्थयो
रन्वयानतात्पर्यविषयोऽपि तु गिरिपदार्थाग्निमत्पदार्थयोरेवेति तयोरव्यवधानाभावान्नातिव्या
प्तिरिति भावः तेन यत्ताद्रूप्यतत्पदगर्भासत्तिनिर्वचनेन ननु नीलो घटोऽद्रव्यं पटइत्यत्र नील
पदार्थपटपदार्थयोर्योग्यत्वाबोधावतात्पर्यविषयोनतु नीलपदार्थयोस्तत्र नीलपदघटपदयो
रासत्तिर्नस्यात्तदर्थान्वयस्य तात्पर्याविषयत्वाभावादतस्तत्रेष्टापत्तिमाह नीलो घट इत्यादिना नहि ९२

न च कथं नीलो घट इति शाब्दबोध इत्यत आह भ्रमात्मकशाब्दबोध इति तथा च भ्रमात्मकशाब्दबोधमात्रं न तु तत्रा
सत्तिरिति भावः ननु तत्र पदासत्तिभ्रमसत्त्वदा शाब्दबोधोपि भ्रमात्मकस्यात् न चेष्टापत्तिः घटे नीलत्वेन
विषयबाधाभावादासत्तिभ्रमात् शाब्दप्रमांगीकारेणासत्तिभ्रमाच्छाब्दभ्रम इति प्राचीनग्रन्थविरो
ध इत्यत आह आसत्तिभ्रमात् शाब्दप्रमांगीकारेणासत्तिभ्रमेनेति न हानिरिति आसत्तिभ्रमाच्छा
ब्दभ्रम इति प्राचीनग्रन्थविरोध इत्यत आह आसत्तिभ्रमेनेति न हानिरिति आसत्तिभ्रमस्य न शा
ब्दभ्रमप्रयोजकत्वं किन्तु योग्यताभ्रमस्य आसत्तिभ्रमाच्छाब्दभ्रम इति प्राचीनग्रन्थात्तु नि यु
क्तिकत्वादश्रयोक्तिभावः क्वचित्पुस्तके न शाब्दबोध इत्यनन्तरं नीलो घट इत्यतः एवं तात्प
र्यगमासत्तिरित्याह स च यत इत्यादिग्रन्थेन यत्तत्पदान्वयगर्भितान्यर्थविषयीभूता न यद्वा
धकपदान्वयस्त्रुपात् एवं विहक्ता आसत्तिरतो न शाब्दबोध इत्यर्थः कतयाप्यायः पाठान्तरं का
लानिकमिति न चोक्ता या आसत्तेः श्लोके भावाद्विशेषदर्शनेपदाव्यवधानभ्रमस्यापि तत्राभावात् शाब्द
बोधो न स्यादिति वाच्यं श्लोकादौ योजनावाक्यादेवान्वयबोधोपगमात् नव्यास्तु उक्तासत्तिर्माविश्लोके
न संभवति तत्र पदाभावेन पदाव्यवधानासंभवात् उक्तासत्तिज्ञानविलम्बेन शाब्दबोधविलम्बाभावाच्च

मु·टी·
९२
93

किंतुव्यवधानेनहृत्वायदजन्यशाब्दार्थोपस्थितिरामतिलत्राग्रव्यवधानांशेपामनिव शयनेशम्रहृतेबोधप्र
तिपदजन्यपदार्थोपस्थितेः कारणतयाव्यवधानेनैवतत्संभवात् तस्मात् हृत्वायदजन्यपदार्थोपस्थि
तिरामतिरितिप्राग्रमाहुः ननुव्यवधानेनपदोपस्थितिः शाब्दबोधेकारणमित्ययुक्तं अनेकपद
घटितवाक्यस्थले व्यवधानेनपदोपस्थित्यसंभवादित्याशंकते ननुइति अव्यवधानेनोपस्थितिरि
ति अभेदव्याव्यवधानसंभवादितिभावः ननुतर्हि शाब्दिकत्वं तत्प्रकारकस्मृतिं प्रति तर्हिशेषाक
तत्प्रकारकसंस्कारत्वेनजनकतावाक्येप्रत्येकपदसंस्कारैर्नानापदविशेष्यकस्मरणाभिन्नविष
यकत्वात्तत्राह नानासन्निकर्षैरिति संभवादिति यथाचक्षुः संयोगस्यपदप्रत्यक्षत्वंशेषकार
णत्वाभावेपिचक्षुःसंयोगापरचक्षुःसंयोगाभ्यामेकंप्रत्यक्षंतथातत्पदगोचरसंस्कारस्या
भिन्नविषयकत्वांशे जनकत्वेनतत्संस्कारजन्यस्मरणमेकमेवजायतेबाधकाभावादितिभावः
अन्यथानानासंस्काराणामेकस्मरणजनकत्वाभावे नानावर्णैरिति नानावर्णानांप्रत्येक
संस्कारैरित्यर्थः एकस्मरणंनानावर्णगोचरमेकंस्मरणं यदस्मरणावदाभ्युनरवि नाशीनाक्र
मिकानांपदजन्यपदार्थोपस्थितीनामपिलनासंभवात्सर्वत्रशाब्दबोधेपदजन्यपदार्थोपस्थितिः ९२

सम्भूयालंबनात्मिकैव कारणं एवं चरमवर्णत्रयगयदेसकलपदार्थानां विशेषणमिति न्यायेनैव शाब्दबोधो
ननु विशिष्टस्यैव शिष्टमिति निरीन्यान जनकविशेषणानावच्छेदकप्रकारनिर्णायसापूर्वमभावादिति प्रा
चीनानं प्रदर्शयति यद्वेत्यादिना एकदेवेति ननु घटमानयेत्यादौ प्रथमं घटीयाकर्मतेत्यपूर्वबोधस्ततदनं
तरंच घटकर्मकानयनमित्यादिबोध इत्यादिक्रमेणेत्यर्थः वृद्धयुवान इत्यस्य तदाहृ विन्यादिः अत्र वृद्ध
युवाशिशुभिः कपोतैरिव स्तरमाणैर्निहितकालोक्तानां पदार्थानां साम्यबोधं केचिदिच्छनेन स्मृतिनमे
स्वरसंप्रकाशनमनोन्तरमाह यद्वेतिति यद्यपिति निसार्थाकांक्षितं स्वार्थयोग्य यत्सान्निधाने प्रपयते सा
र्थोपस्थितिविषयो भवति तेनतेनैवान्वितः स्वार्थैः पदैः प्रथममनुभाव्यते नंतरं च महावाक्यार्थबोध
इत्यर्थः एवं च पूर्वोक्तसम्भूयालंबनात्मकं पदार्थस्मरणं विनापि निर्वाह इति भावः न च घटमानये
त्यादौ चरमपदार्थस्मृतिकाले घटादिपदार्थस्मृतेर्नाशान्न सम्भूयालंबनस्मृतिराव एपकोतिवाच्यं त
त्र घटस्मरणनाशेपि घटीयाकर्मतेत्याकारकान्तरशाब्दबोधस्यैव पदजन्यपदार्थोपस्थितित्वेन
तेनैव घटकर्मकानयनेत्यादिमहावाक्यार्थबोधनिर्वाहात नहि पदजन्यपदार्थस्मृतित्वेन शाब्दबोध
हेतुत्वमपितु शाब्दबोधहेतुत्वमपितु शाब्दबोधसाधारणहेतुत्वमस्थित्वेनैवेति एवं चैतन्मते खंडवा

म॰टी॰ क्यार्थबोधपूर्वक एव महावाक्यार्थबोधः अत एव सर्वत्र खण्डवाक्यार्थबोधत्वस्य विशेषणतावच्छेदकप्रका
९४ रवैशिष्ट्यविशिष्टवैशिष्ट्यबोधसामग्री तत्र विशेषणामिति रीत्यैव बोधः यत्र तत्सामग्री तत्र विकविशेषणा
निश्चयस्य पूर्वं सत्वाद्विशिष्टस्य वैशिष्ट्यमिति रीत्यैव महावाक्यार्थबोध उत्पद्यत इति यत्र खण्डवाक्यार्थसमानाका
९५ रस्मरणं कल्पयित्वा विशिष्टवैशिष्ट्यनिर्वाह इत्याहुः अन्ये तु बोधं यत्र खण्डवाक्यार्थबाधानन्तरं चरमपद
स्मृतिस्तद्वन्तरं तदर्थस्मृतिस्तत्र खण्डवाक्यार्थानुभवस्य नाशात् समूहालम्बनस्मरणाभावप्रयुक्त एव च
यत्र नाविशिष्टवैशिष्ट्यबोधसामग्री तत्र विशेष्ये विशेषणमिति रीत्यैव बोधः यत्र तत्सामग्री तत्र विशिष्टस्य
वैशिष्ट्यमिति रीत्येत्यन्यत्र विस्तरः अवान्तरवाक्यार्थबोधपूर्वक महावाक्यार्थबोधे वान्तर वान्तरवाक्या
र्थस्मरणमेव कारणं न तु समूहालम्बनस्मृतिर्न हि शाब्दबोधे यदजन्यपदार्थोपस्थितिः कारणं लाघ
वेन पदार्थोपस्थितेरेव हेतुत्वात् अत एव मित्यादौ नापि धेहीति पदाध्याहारः किं त्वर्थाध्याहार एवेति प्राभा
करमतं दूषयति इदं तु बोधमित्यादिना यदजन्येति यदर्थोपस्थितिमात्रस्य हेतुत्वे प्रत्यक्षादिना उपस्थित
स्यापि शाब्दबोधापत्तिरिति भावः ननु प्रत्यक्षोपस्थितकपालदेः शाब्दबोधाभावस्तात्पर्याभावात्स्वेङ्गि
ष्टापत्तिरलाह किं चेति तेनैव सन्निहितिद्वारकर्मकपिधाने कान्तिरिति वाक्यार्थे द्वारकर्मकपिधानकृति ९४

रिति वाक्यार्थे द्वारकर्मपिधानान्वयबोधानुदयाद् द्वारं पिधेहीत्यानुपूर्वीज्ञप्याकांक्षाज्ञानहेतुत्वस्यावश्यक
च्यतया तादृशाकांक्षाज्ञानार्थं पिधेहीति पदाध्याहारस्यावश्यक इति भावः ननु द्वारकर्मकपिधानानु
कूलकृतिबोधे आनुपूर्व्या विशेषणस्य द्वारपदोत्तरामपदस्य पिधेहीत्याकारकस्य वा ज्ञानं कारणमतो न
द्वारत्वं कर्मत्वं पिधानं कृतिरिति तस्माच्छाब्दबोधापत्तिः तथा च द्वारमित्युक्ते पिधेहीति पदस्य नाध्या
हारः न च तादृशानुपूर्व्याः परस्परं व्यभिचारः अव्यवहितोत्तरत्वस्य कार्यतावच्छेदके निवेशान्न च
यत्र द्वारं पिधानं कृतिरिति द्वारं कर्मत्वं पिधेहीति चोक्ते तत्र द्वारकर्मकपिधानानुकूलकर्मकृतेः शाब्द
बोधापत्तिरिति वाच्यं इष्टापत्तेः प्रत्यक्षानुमानादिना उपस्थितस्यैव निराकांक्षत्वपदेनोपस्थितस्यापि बोधे
बोधकाभावादत आह तथा पुष्पेभ्य इति स्पृहयतीत्यादिना क्रुधद्रुहेर्ष्यासूयत्यादिपरिग्रहः
चतुर्थ्यनुपपत्तेरिति कर्मत्वार्थकचतुर्थ्याः स्पृहयतियोग एवानुशासनेन बोधनादिति भावः अत्रेदं
चिन्त्यं अहन्त्वं रीत्या क्वचित्पदाध्याहाराभावे तावतापि तज्जन्योपस्थितिं विनैव शाब्दबोधहेतुत्वं लाघवेन पदा
र्थोपस्थितित्वस्यैव जनकतावच्छेदकत्वात् तथा च द्वारमित्यादौ कथंचिदुपस्थितस्य पिधानादेर्बोधे
धकाभावादर्थाध्याहार एवोचित इति मूले पदार्थेति तत्रतद्दत्तेनापने न तत्पदार्थे तत्पदार्थे वतेयाग्य

मु.टी. तेनोक्तं तच्चायुक्तमनुपयुक्तं च तस्मिन्नाधिकारणताभावात् ज्ञानस्य शाब्दबोधाहेतुत्वाच्चेत्यतः प्रथमे
९५ कपदार्थपरत्वे द्वितीयं च तत्पदमपरपदार्थपरमित्यभिप्रायेण व्याचष्टे एकपदार्थापरमित्यभिप्रायेण
95 व्याचष्टे एकपदार्थ इति योग्यताज्ञानस्य शाब्दबोधहेतुत्वे मानमाह तज्ज्ञानाभावाच्चेति अपूर्वतादि
तिसर्वत्र शाब्दबोधात्पूर्वमनिश्चितत्वादित्यर्थः क्वचित्संशयेति संशयनिश्चयसाधारणयोग्यता
ज्ञानत्वेन हेतुत्वादिति भावः अतएव निश्चयमपि दर्शयति क्वचिदिति भ्रमत्वेऽपि च इति प्रामाण्यादिकवि
णयोत्तरभाविनि शाब्दबोध इत्यर्थः नव्यास्त्विति ननु अयोग्यतानिश्चयस्य प्रतिबन्धकत्वेन तदभावत्वेन
हेतुत्वं वाच्यं तदपेक्षया लाघवेन योग्यताज्ञानहेतुत्वस्यैवोचितत्वादत आह तदभावनिश्चयस्येति बाध
निश्चयकालेऽपि लौकिकसन्निकर्षजन्यताद्विष्टबुद्धेरुपादानाह लौकिकसन्निकर्षाजन्येति शंखो
न पीत इति निश्चयेऽपि पित्तादिदोषवशात्पीतः शंख इति प्रत्यक्षोदयाद्दोषविशेषाजन्येत्युक्तं युक्तौ नेदं
रजतमिति ज्ञानोत्तरं दोषजन्यस्येदं रजतमिति भ्रमस्य वारणाय विशेषेति पित्तमेदकवसाञ्जना
दिदोषेत्यर्थः तज्ज्ञानमात्रे तद्विशिष्टबुद्धिमात्रे सिद्धमिति तथा चायोग्यताज्ञानस्य शाब्दबोधे प्र
तिबन्धकत्वस्यावश्यकत्वात्तेनैव निर्वाहे योग्यताज्ञानस्यातिरिक्तप्रतिबन्धकत्वाकल्पनमिति भावः ९५

ननु यत्र नायोग्यताज्ञानं न वा योग्यताज्ञानं तत्र शाब्दबोधापत्तिरत आह योग्यताज्ञानविलंबे तेन तथा चेष्टापत्ति
विभावः आहुर्विलम्बस्वरसः तद्बीजन्तु यद्विषयकमनुमित्यादिकं न जाते शाब्दबोध एव जनतः तद्विशिष्टबुद्धावयो
ग्यताज्ञानाभाववत्तापेतया लाघवेन योग्यताज्ञानत्वेनैव हेतुतासिद्धिः एवं च यद्विशेषयोरिति व्याप्तिबला
त् शाब्दबोधस्य समान्ये योग्यताज्ञानत्वेन हेतुतासिद्धिर्दुर्वारेति एवमिच्छाद्धेशायां उत्तेजकतानुरोधेनायो
ग्यताज्ञानप्रतिबन्धकत्वस्य विशेषपर्यवसानात् लघुमप्रतिबध्यतावच्छेदकस्यानुमितित्वादेः शाब्दबो
धसाधारण्याभावात् शाब्दबोधत्वयोग्यतानिश्चयस्यातिरिक्तप्रतिबोधकताकल्पने गौरवात्
घवेन योग्यताज्ञानस्यैव हेतुत्वं युक्तमिति न च योग्यताज्ञानस्य हेतुत्वं युक्तमिति न च योग्यताज्ञा
नस्य हेतुत्वे प्रामाण्यनिश्चयाभावात्तत्र विशेषणे तदयोग्यताप्रामाण्यज्ञानाभाववैशिष्ट्याद्योग्य
तानिश्चयाभावहेतुत्वे तदभाववत्तितत्प्रकारकमित्येकविधाप्रामाण्याभावनिवेशेन लाघवाद
योग्यतानिश्चयस्य प्रतिबंधकत्वे तत्तदभाववत्त्वितदाभावप्रकारकं तद्धतितदभावप्रकारमितिद्वि
विधाप्रामाण्यग्रहाभावनिवेशेन प्रतियोगितासंबंधावच्छिन्नप्रतियोग्यताकत्वाभाववत्त्वाभावे
प्रतियोगितासंबंधेन तत्प्रकारकमित्यप्रामाण्यग्रहाभावनिवेशेन च गौरवहानिश्चयस्यैव

मु॰टी॰ ९६

तदभावव्याप्यतदभावावच्छेदकनिश्चययोः प्रतिबंधकत्वेनातिगौरवाच्चेति एवं योग्यताज्ञानस्य शाब्दबोधान
कत्वे शाब्दसामग्रीकाले योग्यताज्ञानाभावविशिष्टात्ममानसवारणाय तत्र शाब्दसामग्र्याः प्रतिबंधकत्वंक
ल्पनीयमिति गौरवं योग्यताज्ञानस्य शाब्दबोधजनकत्वे तु तत्र योग्यताज्ञानाभावरूपविषयाभावात्स्वेन
तादृशमानसमिति न तत्र शाब्दबोधसामग्र्याः प्रतिबंधकत्वेन कल्प्यत इति लाघवमित्याशयः एवं तेन पदेन
सहेतस्येति तत्पदविशिष्टस्येत्यर्थः यदभावेनेत्यत्र घटपदं विना अमृपदस्यान्वयाननुभावकत्वात् घट
विशिष्टत्वमं पदस्य आकांक्षा घटः कर्मत्वमित्यादौ कर्मत्वपदे घटपदवत्त्वेनाकांक्षा कर्मत्वपदे द्वितीयाकर्मत्वे विशाब्दबोधाननुभावकत्वस्य घटपदविरहाप्रयुक्तत्वात् अत्र चाननुभावकत्वं तादृशपद
परिचायकं न त्वाकांक्षास्वरूपांतर्गतं यद्वा अननुभावकत्वमप्याकांक्षास्वरूपांतर्गतं शाब्दबोधेन सह
रूपस्तत एवोपयोगस्तेन जनितान्वयबोधकाद्वाक्यात् पुनरन्वयबोधापत्तिः एकपदेऽपरपदवत्त्वाश्र
यजातत्वे वोपयुज्यते तेन क्रियापदेन तत्कारकपदस्य अत्र चैकपदे परपदवत्त्वमपरपदाव्यवहि
तोत्तरत्वं तत्र चाव्यवधानांशस्यासत्त्वेऽलाभः आसत्तेः पदाव्यवधानरूपतायाः पूर्वमुपवर्णितत्वात्
उत्तरत्वं च क्रियाकारकपदयोर्नीयोनीतेति चैत्रः पचति चैत्र इति वाक्यद्वयादन्वयबोधादयः क्रियाकारक ९६

पदयोराकांक्षाज्ञानस्यैव किंन प्रकृतिप्रत्यययोरेव तत्राप्यव्यवधानांशस्यासत्त्वालाभात् प्रत्यये प्रकृत्युत्तरत्वरूप
कांक्षाज्ञानं कारणमित्याह वस्तुतस्त्वित्यादिना ननु यमेति पुत्रो राज्ञः इत्यादावज्ञानितान्वबोधदशायां राजपदस्य
पुत्रपदेनेव पुरुषपदेनाप्याकांक्षासत्त्वाद्राज्ञः पुरुष इत्यन्वयबोधः स्यादत आह अयमेतीति तथा च राजपदपु
रुषेण च राजपदस्य तात्पर्यज्ञाने पितृपदराजपदयोरेव यत्रैकवाक्यतानिश्चयः पुरुषपदराजपदयोरेकवा
क्यताभावनिश्चयस्तत्र पुरुषपदेन सह निरुक्ताकांक्षायाः सत्त्वाद्राज्ञः पुरुष इति बोधापत्तिरिति चेन्नय
दं विनेत्यस्य समभिव्याहृतयत्पदं विनेत्यर्थः कतयासमभिव्याहारस्याप्याकांक्षाशरीरे प्रवेशात् समभि
व्याहारश्चेदं यत्पदमेतत्पदेन सहान्वयं धयावितिपदतात्पर्यं प्रकृते च तज्ज्ञानात् इति नाकांक्षाज्ञानाभाव इ
ति समभिव्याहारस्य नाकांक्षाशरीरे प्रवेशः किंतु स्वातंत्र्येण तज्ज्ञानं शाब्दबोधे कारणमित्यपि नव्या
स्तु अर्थतात्पर्यज्ञानस्य राजपदं पुरुषविषयकराजसंसर्गकप्रतीतीच्छयोच्चरितमित्याकारकज्ञानत्वादिना
हेतुत्वादेवातिप्रसंगाभावे समभिव्याहारज्ञानहेतुत्वे मानाभावः निरुक्ततात्पर्यनिश्चये हि वैलक्ष्यसमभिव्या
हारस्य पदतात्पर्यं तत्र यस्य संशये व्यतिरेकनिश्चये च भवत्येव शाब्दबोध इत्याहुरित्यन्यत्र विस्तरः इदं तु बोध्यं
आकांक्षालक्षणे पदमयत्पदज्ञानपरं मोनि श्लोकानुरोधादत एवाध्याहृतपदेनाप्याकांक्षानिर्वाहः अ

म॰टी॰ ध्याहारश्चाक्रान्तयदा नाम नुसंधानं अत एवमवीपेत्तयाजश्चन्यत्वेन तस्य यतः स्वस्यानाश्रितस्य पुनरनुसंधानमा
९० वृत्तिः नेदीयःस्यानां न राश्रितस्यानुसंधानमनुषङ्गः दवीयःस्यानां न राश्रितस्यानुसंधानं वृत्तिः इयं चासिद्धा
97 वलोकितमंडूकप्लुतिगंगास्रोतोवन्नि विधेति निराकांक्षत्वज्ञानस्य प्रतिबंधकत्वं नूनाकांक्षाज्ञानस्य
हेतुत्वमिति तु न सत्तथा च सन्माकांक्षाभावेन व्याप्यत्वदवच्छेदकधर्मज्ञानानां प्रतिबंधकत्वे गौरवा
दित्यलं वक्तुरिच्छेतीति घटमानयेत्यादौ कर्मत्वविशेष्यकाधेयत्वासंसर्गकघटप्रकारकारकप्रतीति
च्छावक्तुस्तात्पर्यं तादृशबोधेच्छेति नमिदं वाक्यमित्याकारकात्ग्रहाकलात्पर्यज्ञानं शाब्दबोधे कारणमित्यर्थः
तत्रयुक्तिमाह सैंधवेति आदिनाश्वेतोधावतीत्यादिपरिग्रहः तत्र कदाचित्तश्वेतगुणविशिष्टस्य कदाचि
त्तकुक्कुटादेर्बोधस्य तात्पर्यज्ञाननियम्यत्वात् क्वचिल्लवणस्येति क्वचिदुभयोरित्यपि बोध्यं इति तस्यादिति
तिनियमो न स्यादित्यर्थः इदमुपलक्षणम् तात्पर्यसंशये व्यतिरेकनिश्चये वा शाब्दबोधानुदया च्छाब्दबो
धे तात्पर्यज्ञानं कारणं यत्संशय इति व्याप्तेरित्यपि बोध्यं प्रकरणेति आदिनासंयोगविप्रयोगसाहचर्या
दीनां परिग्रहः प्रकरणादीनां क्रमनियतपूर्ववृत्तितावच्छेदकत्वेनानन्यथासिद्धिमात्रकल्पने लाघवादिति भा
वः अननुगमादिति तथा च परस्परजन्यशाब्दबोधे परस्परव्यभिचारेण न हेतुत्वं संभवतीति भावः इत्थं चेति ९०

शाब्दबोधत्वावच्छिन्नं प्रति तात्पर्यज्ञानस्य हेतुत्वे चेत्यर्थः एवमग्रेपि प्रलयस्य कार्यद्रव्यानधिकरणकालाधि
करणकालविशेषात्मकत्वे प्रलयस्य आगमेष्वितितिनाहोन रात्रिर्ननभोन भूमिर्नासीत्तमोज्योतिरभून्नचा
न्यदित्यागमेनेत्यर्थः इत्थं च शुकवाक्येतिसंवादि शुकवाक्यजन्यशाब्दबोधेपि शीघ्रतयितुरेवेति इत्थं चेच्छा
या विसंवादितिभावः अन्येत्विति क्वचिदिति तस्य विवरणं नानार्थादाविति गृहीतनानार्थवृत्तिकादाविस
र्थः तेन गृहीतनानार्थशक्तिकस्य गृहीतनानार्थलक्षणकस्य च संग्रहः आदिनैकार्थगृहीतलक्ष
णकस्य संग्रहः मीमांसाद्यवज्ञानात्मकस्तर्कः परिशोधितेति सहकृतेत्यर्थः तर्कोनुमानं आहुरित्यस्य
रसोह्यावनेत ह्रीजं त गृहीतनानार्थवृत्तिकपदजन्यानुभवत्वापत्तया लाघवेन पदजन्यानुभवत्वस्यैव
तात्पर्यज्ञानजन्यतावच्छेदकत्वमुचितमित्यत्राधिकमनुसंधेयं इति श्रीमद्भारद्वाजकुलोद्भवबालकृ
ष्णभट्टतनूद्भवमहादेवभट्टकृतौ मुक्तावलीकाशे शब्दखण्डः समाप्तः अनुगमनयेति अनुगमस्याह
यमपूह्यति शक्यतयाऽरूपवादोस्तु धिज्ञासोद्याद्दिति भावः तथा चावसरसंगत्यानुभवानंत
रं स्मरणनिरूपणमिति भावः तत्र स्मरणे तस्याद्दिति अनुभवस्य नष्टत्वादितिभावः ननु नु भवस्य व्या
पारद्वारा कारणत्वे तत्र कार्याव्यवहितपूर्वक्षणवर्तित्वस्य व्यापारस्य तत्र कल्पनं तत्रानुभवनाशेपि तत्

मु.टी.
९८

नासंस्कारस्य सत्त्वान्निराबाधमत आह समानप्रकारकेति नष्टत्वादिति तथा च तादृशमपि करणत्वमनुभवे
न संभवतीति भावः तेनैव संस्कारनाशकेन समानप्रकारकस्मरणेनैव संस्कारान्तरद्वारेति स्मरणस्य तत्
तीयक्षणे नाशनेनैव सत्त्वसंपत्तेर्हेतुत्वासंभवादिति भावः फलस्य प्रत्येकविषयकक्रमिकस्मरणत्वस्य संस्कारनाश
कत्वाभावादिति भावः फलस्य प्रत्येकविषयकक्रमिकस्मरणत्वस्य संस्कारनाशकत्वाभावादिति समानप्रका
रकत्वाभावादिति भावः कालस्य रोगस्य वेति अन्यथा उक्तसमूहालंबनसंस्कारस्यानाशप्रसंगादिति भा
वः न चेष्टापत्तिः जन्यभावत्वेन विनाशित्वनियमात् ननु कालादेः कालत्वादिना नाशकत्वे संस्कारमात्र
स्य क्षणिकत्वापत्तिः नत्र तद्याकित्वेन तथात्वे वेगोरव मत आह चरमफलस्य वेति चरमफले वैजात्यं का
लयित्वं तन्नरूपेण नाशकत्वं वाच्यमिति भावः न क्रमिकेति न स्मरणोत्तरस्मरणोत्पत्तेः स्मृत्यापदार्थत्वादि
ति तथा च पुनः पुनः स्मरणात्तदृढतरसंस्कारोत्पत्तिः किं तु विद्यमानसंस्कारस्यैव पुनः पुनः स्मरणेन क
टिन्नुद्बोधसमवधानं जायते उद्बुद्धाच्च तस्मात्स्मरणान्तरमिति भावः व्यभिचारसंशयेति अनुभवत्वेन न
हेतुत्वे व्यभिचारसंशयादिति सकृदनुभूतस्य ले संस्कारनाशकस्य चरमस्य तस्य तदानीमभावेन संस्कारना
शाभावादनुभवत्वेपि न व्यभिचारसंदेह इति भावः यद्यप्यनेन संस्कारतन्नाशकल्पनागौरवसफलमु

एवंतेन दोषत्वं अन्यथाविशिष्टाज्ञानकल्पनागौरवमियानुमितिप्रतिविशेषज्ञानत्वेन हेतुनाविलयप्रसंगात्
तथापिज्ञानत्वेन हेतुत्वेऽपेक्षात्मकतत्तत्स्मृतिव्यक्तिभेदस्यकारणतावच्छेदककोटिनिवेशेन गौरवमनुभ
वत्वेन स्मृतिहेतुत्वेतु तत्स्मृतिव्यक्तिभेदानिवेशेनानुभवज्ञानत्वेनैव हेतुकत्वाद्व्यभिचारशंकाः किंचित्कारणत्व
त्वेतात्पर्ये इतिस्मरणनिरूपणे जन्यमात्रानाकारत्वादिति ईश्वरीयमात्राकारे व्यभिचारवारणाय जन्येत्यति न
नुत्पादवत्वात्वगिंद्रियस्य प्राणस्य वाकारणत्वमस्तु तत्राह एवमिति असमवायिकारणसंयोगाश्रयत्वेपेति
भावकार्यस्य सामसमवायिकारणत्वमस्तु तत्राह एवमिति असमवायिकारणसंयोगाश्रयत्वेपेति भावकार्य
स्य सामसमवायिकारणकत्वनियमादितिभावः तत्मनसो विभुत्वे चेति तदसंनिधानं मनसोविभुत्वे न संभवतीत्य
र्थः तथासतीति दृष्टसामग्रीसत्वेप्यदृष्टविलंबाकारइत्यर्थः चतुरादीनामपीति चात्त्वषतद्विरहयोरदृष्टत
द्विरहाभ्यामुपपत्तेरितिभावः भ्रांतित्वादिति अव्यवहितकालोत्पत्तिकत्वस्य दोषत्वादितिभाव उभयोरुत्पत्तिरि
तिमनसः संकोचएकेंद्रियसंबंधादेवज्ञानेविकाशेतु नानेंद्रियैर्मनसः संबंधायुगपज्ज्ञानाज्ञानानामुत्पत्तिरिति
भावः यद्यपिनानेंद्रियैर्मनःसन्निकर्षकालेचाक्षुषाद्युत्पत्तिकालेरासनाद्यनुत्पादस्य रासनादिकं प्रतिचाक्षु
षसामग्र्याः प्रतिबंधकत्वेनैवोपपत्तेर्मनसोविभुत्वेपिबाधकभावः तथापितथाप्रबंधकत्वे गौरवमित्यभिप्रायः

99

नचत्वङ्मनोयोगस्य ज्ञानमात्रहेतुत्वाच्चाक्षुषसामग्रीकाले स्पार्शनसामग्र्या नियमतः सत्वात्स्पार्शनापत्तिध
र्मिनमोणुत्वपक्षेपि दुर्वारैवेति वाच्यं अनन्यगत्यास्पार्शनप्रति चाक्षुषादिसामग्र्याः प्रतिबंधकत्वस्वीकारात्
एवमपि रासनादिप्रत्यक्षे चाक्षुषादिसामग्रीप्रतिबंधकत्वाकल्पनप्रयुक्तलाघवस्याप्यणुत्वपक्षे निष्प्रत्यूह
त्वात् यद्वा ज्ञानसामान्यं प्रति त्वङ्मनोयोगस्याहेतुत्वमित्यभिप्रायः अत एव तदसंबंधात्वगादिभिः परैस्त्वा
नेनोत्पाद्यत इत्युक्तं प्राक् यथा च त्वङ्मनोयोगस्य ज्ञानसामान्यं प्रत्यजनकत्वेपि सुषुप्तौ ज्ञानानुत्पाद इति निर्वाहस्तथा
पपादितमधस्तात् एवं मनसो विभुत्वे आत्मनः संयोगानुपपत्तेः आत्ममनसोः कर्माभावेन कर्मजन्यसंयोग
स्य विभुत्ववादिमतेऽसंभवादजनसंयोगमानासंभवात् यद्यपि भौतिका एव परमाणवो मानाभावान्नास्ति अनंत
धर्मेणानमतिरिक्तायाञ्जातेः कल्पनामपेक्ष्य क्लृप्तानामेव धर्मिणां नानारूपेण हेतुत्वस्य युक्तत्वात् नियम
स्तु दृष्टोपग्रहादिति नव्यैरुक्तं तथापि न यत्संयोगव्यतिरेकात्सुषुप्तिकाले कार्यानुत्पादस्तस्य मनसोव
श्यमंगीकरणीयत्वात् न च कालविशेषस्य प्रतिबंधकत्वादेव सुषुप्तिकाले कार्यानुत्पाद इति वाच्यं अनं
तानां कालविशेषाणां प्रतिबंधकत्वे गौरवात् न चोदासीनमनःसंयोगस्य सुषुप्तिप्राक्काले सत्वादापत्तिस्याद
वैस्थ्येनादृष्टविशेषाकृष्टमन एव ज्ञानादिहेतुत्वेन वक्तव्यं न त्वयेतयाचादृष्टविशेषाकृष्टभौतिक ९९

परमाणुत्वनामेव वृत्तेर्हेतुत्वाचितमिति वाच्यं तस्य भौतिकत्वे पृथिवीत्वं जलत्वादिकं वेत्यत्र विनिगमकाभावादुभयक
ल्पने च जातिसांकर्यात् तदेतदभिप्रेत्योक्तं संक्षेप इति । इति द्रव्यपदार्थव्याख्या । अवसरसंगतिमभिप्रेत्याह द्रव्याश्रि
त्वेति नाश्रितत्वेत्यपि नेप्रतिबंधकीभूतजिज्ञासासातिहृतेरिति भावः इति चेदिदमिति पाठः ननु रूपत्वस्पर्शत्वा
वा गुणत्वनिष्ठकारणतावच्छेदकत्वं स्यादित्याशंक्याह नहीति रूपत्वादीत्यादिना रसत्वादिपरिग्रहः यद्यपि गुणत्व
जातौ प्रत्यक्षमेव प्रमाणं चक्षुरादिसंयुक्तसमवेतसमवायेन गुणत्वप्रत्यक्षसंभवात् तथाप्यतीन्द्रियरूपादौ
तत्प्रत्यक्षासंभवेन तत्साधारणगुणत्वस्य न ग्रहस्तत इत्यनुमानं प्रदर्शितं न च रूपत्वादिना सांकर्यमपि यातीन्द्रि
यरूपादौ गुणत्वसिद्धिः गुरुत्वादौ तु धर्मिग्राहकमानेन तत्सिद्धिरित्यनुमानदर्शनं व्यर्थमिति वाच्यं रूपादा
वव्याप्यायामसाधारणगुणत्व इति प्रत्यक्षस्यासिद्धेः इदमत्रबोध्यम् सकलगुणसाधारणीयकारणताया
ह्येवेति कथं तदवच्छेदकतया गुणत्वसिद्धिः नच चतुर्विंशतिगुणेषु प्रत्येकं याः कारणतास्तासामेवएतत्
यातादृशसकलकारणतावच्छेदकतया गुणत्वजातिसिद्धिरिति वाच्यं तथासति द्रव्यकर्मद्रव्याभिन्नसामा
न्यवत्तियाकारणतासां किंचिद्धर्मावच्छिन्नेत्यनुमानरूपभिन्नयोर्विंशतिगुणसाधारणवैजात्यस्यापिसि
द्धिप्रसंगात् याविमांडिल्यस्य कार्यकारणत्वस्याप्यतिप्रसक्ततयाऽनवच्छेदकत्वाच्चेत्यन्यत्र विस्तरः कर्मादा

वत्तिव्याप्तेरिति आदिना सामान्यपरिग्रहः लक्ष्येलक्षणसत्वं प्रतियाद्यति भवति हीति द्रव्यत्वव्यापकतावच्छेदकस्य फल
माह द्रव्यत्वमिति जातिपदस्य फलमाह द्रव्यत्वत्वमिति सत्तान्यजातिमादाय द्रव्यदावृत्तिव्याप्तिवारणाय सत्ता।
भिन्नेति तथापि सामान्यवत्वे सतीति समेयत्वयोर्विशेष्यस्य च फलमाह ज्ञात्यादीनामिति तत्र तेषु गगनादावृत्ति
व्याप्तेरिति आदिना कालादिपरिग्रहः यथाश्रुते चैतत् सामान्यवत्वे सति कर्मत्वे च सति कर्मवद्वृत्तिपदार्थ
विभाजकोपाधिमत्वेतिव्याप्तेरभावात् वेगेनाव्याप्तिः स्थितिस्थापकोपलक्षणीयः इति पाठः वेगपदस्य भावनान्य
संस्कारपरत्वादिति भावः इदमुपलक्षणम् वेगोप्यत्र कारणानुकसमवायिकेन गुरुत्वस्यापि संग्रहात् ननु
मूर्त्तगुणत्वे मूर्त्तिवृत्तिगुणत्वे संख्यादावतिव्याप्तिमत आह अमूर्त्तेष्विति तथा चामूर्त्तावृत्तिगुणत्वं प्रदर्शितं मू
र्त्तगुणानां साधर्म्यमित्यर्थः न चैतदपि मूर्त्तमात्रवृत्तिसंख्यायामितिव्याप्तमितिवाच्यम् अमूर्त्तगुणवृत्तिसंख्या
त्वान्यगुणत्वव्याप्यजातिशून्यगुणत्वस्य मूर्त्तत्वव्याप्यतावच्छेदकगुणवृत्तिजातिमत्वस्य वा विवक्षितत्वात्
अत्र चाद्ये मूर्त्यादिनैन संख्यादेर्व्यावृत्तिः वेगास्थितिस्थापकोपग्रहाय संस्कारत्वामेति द्वितीये अव
च्छेदकतेन संख्यात्वादेरितिवातेन कर्मत्वादेर्व्युदासः मूले पतेमूर्त्तगुणं इत्यत्रा कारकप्रश्लेषो बोधः ननु धे
र्म्मादि मूलेनपतेसाम मूर्त्तवृत्तिगुणत्वे साधर्म्यमुक्तं नत्तु संख्यादावतिव्याप्तमत आ मूर्त्तेष्विति मूर्त्तावृत्तिग

णत्वमेतेषां साधर्म्यमित्यर्थः नच तथाप्यमूर्त्तमात्रवृत्तिसंख्यादावतिव्याप्तिरिति वाच्यं मूर्त्तगुणवृत्तिसंस्कार
वान्यगुणत्वव्याप्यजातिशून्यगुणत्वस्य मूर्त्तत्वाभाववद्व्याप्यत्वावच्छेदकपरिमाणवृत्तिजातिमत्त्वस्य वा-
विवक्षितत्वात् आद्येऽस्मात्तेन संख्यादित्रयादिव्युदासः सत्तामादायासंभववारणाय गुणत्वव्याप्येति कर्म
ण्यतिव्याप्तिवारणाय विशेषभूतगुणत्वस्येति विशेषः द्वितीये परममहत्त्वत्वजातिमादायातिव्याप्तिवारणाय प
रिमाणवृत्तीति ननूभयेषां गुणानामेतादृशेति मूलेन संख्यादिपंचानामुभयवृत्तिगुणत्वं साधर्म्यमुक्तं नच
मूर्त्तादावतिव्याप्तमत उभयपदं मूर्त्तामूर्त्तेयरतया वाच्ये मूर्त्तामूर्त्तेयरतया वाच्ये मूर्त्तामूर्त्तेति नच मू
र्त्तमात्रवृत्तिसंख्यादावव्याप्तमिति वाच्यं कालवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य द्व्यत्वसमव्यापकत्वाव
च्छेदजातिमत्त्वस्य वा विवक्षितत्वात् नच नेकाश्रितत्वं संयोगादावव्याप्तमनेकपदस्य द्वित्वविशिष्टशक्तत्वा
दत आह संयोगेति तथा चैकत्वभिन्नसंख्याविशिष्टवाचकत्वमनेकपदस्येति न तत्राव्याप्तिरिति भावः
स्वाश्रयप्रतियोगिकान्योन्याभावसमानाधिकरणगुणत्वस्य विवक्षितत्वान्नाव्याप्तिरित्यपि कश्चित् एके
कवृत्तयेति मूलस्य स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकैकत्वकत्वमित्यर्थः यद्वा स्वाश्रया
न्योन्याभावव्यापकात्यन्ताभावप्रतियोगित्वमर्थः स्वार्थिकाऽगीति विनयादिभ्यः स्वार्थे ढग्विधानात् हि

शेषशब्दस्यान्तर्गतत्वाद्विनपादेशाकृतिगणत्वादितिभावः विशेषगुणाद्यर्थ इति विशेषगुणत्वं च भावनान्योन्या
वायुवृत्तिस्पर्शावृत्तिसमवायीद्रव्यत्वे सतिगुणत्वाज्जलद्रवत्वान्यगुणत्वं अत्रजात्यादावतिव्याप्तिवारणाय विशे
ष्यम् गुरुत्वेनोमित्तिकद्रवत्वयोर्वारणाय गुरुत्वेत्यादि सांसिद्धिकद्रवत्वसंग्रहाय जलेति संयोगादिवारणा
यसत्यन्तं भावनामव्याप्तिवारणाय घमन्यांतमस्यतत्घटकसमवायिविशेषणं सत्तादिकमादायासंभव
वारणाय स्पर्शसंग्रहाय च स्पर्शावृत्तीति संख्यादिर्यस्मात्परत्वमते युक्तेति व्युत्पत्त्यापरिमाणपरत्वयोरेव
ग्रहणमिति भ्रमवारणायादिपदग्राह्यगुणान्विशिष्यदर्शयति संख्यापरिमाणेत्यादिना गुरुत्वेगग्र
विस्त्रम्मूले वेगपदं भावनातिरिक्तसंस्कारपरं तेनास्थितिस्थापकस्यापि संग्रहः मूले सामान्यगुणा इ
तितत्वं च रूपस्पर्शान्यत्वे सति द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकसंयोगविभागवेगद्रवत्वावृत्ति
जातिशून्यगुणत्वं द्रव्यविभाजकतावच्छेदके पृथिवीत्वादितद्व्याप्यतावच्छेदके च गन्धत्वादितो
रूपत्वस्य संख्यादेश्च सत्त्वाल्लक्षणसमन्वयः अत्रजलीयशुक्लत्वस्ये वायोरनुष्णाशीतस्पर्शाचपृथिव्यां
दिशुक्लरूपस्पर्शव्यावृत्तजातिविशेषमानाभावाच्छुक्लत्वयानुष्णाशीतस्पर्शयोरतिव्याप्तिवारणा
यसत्यन्तं शब्दविशेषजनकतावच्छेदकजात्यवच्छिन्नकठिनावयवद्वयविभागे तेजोवेगातिशयेनैता १०२

ग्निसंयोगनाशतावच्छेदकजात्यवच्छिन्नहेतुतादिहेतुतिइवत्वे चाव्याप्तिवारणाय कृत्यं तं जातिविशेषणं कर्मादौत
द्वारणाय विशेष्यं पृथिवीत्वादिव्याप्यतावच्छेदकतत्संख्यादिरूपत्वस्य न तत्संख्यादिरूपत्वस्य तत्संख्यायाम
भावादव्याप्तिवारणाय जातिपदं द्रव्यविभागतावच्छेदकोपाधेरव्यापकत्वेन तद्व्यक्तित्वेन विवक्षितं न तु तादृशो
पाधित्वेन अन्यथा संख्यात्वादेरपि तादृशजातित्वादसंभवापत्तेरिति संख्यादिपरत्वान्तो द्रवत्वस्नेहपदवेगस्था
प्युपलक्षकं स्थितिस्थापकस्यातीन्द्रियत्वं वक्ष्यते ननु द्वीन्द्रियग्राह्यत्वं रूपादावतिव्याप्तं तेषां मनसापि ग्रहणात् वा
ह्येन्द्रियद्वयग्राह्यत्वमपि तत्रैवातिव्याप्तं रूपादीनां चक्षुरादिना ग्रहणात् अतीन्द्रियसंख्यादावव्याप्तं च तत्रा
इन्द्रियग्राह्यत्वस्यैवाभावात् अत आह चक्षुषा च त्वचापीति चक्षुस्त्वगुभयग्रहणयोग्यत्वं तदर्थः चक्षुस्त्वगु
भयग्राह्यभावत्वाद्यन्यधर्मसमवायत्वमिति निष्कर्षः संस्कारत्वादिकमादाय भावनायामतिव्याप्तिवारण
यभावनावृत्त्येति कर्मादौ तद्वारणाय गुणत्वस्य निवेशः ननु वाह्यैकैकेन्द्रियाग्राह्यत्वं संख्यादावतिव्याप्तं
तेषामुभयग्राह्यत्वेनैकग्राह्यत्वाभावाद्व्याप्तं चातीन्द्रियरूपादौ तेषामिन्द्रियग्राह्यत्वस्यैवाभावादत आह रूपा
दीनामिति चक्षुरादीति चक्षुरादिनैवेत्यर्थः तथा चैकैकमात्रग्राह्यत्वस्यैव विवक्षितत्वात् संख्यादौ नातिव्या
प्तिः ग्राह्यत्वात् ग्रहणयोग्यत्वात् तेन नातीन्द्रियरूपादावव्याप्तिः तथा च चक्षुस्त्वगुभयाग्राह्यगुणसमवे

मु॰टी॰ ११२ 102 नजातिमत्वमेतेषां लक्षणमिति भावः नच त्रसरेणुनिष्ठापकर्षस्य चक्षुरिन्द्रियेणैवग्रहणान्न जातिव्याप्तिरिति
वाच्यं परिमाणत्वेनाप्यगुणस्य विशेषस्य विशेषेणीयत्वात् मूले गुरुत्वादृष्टभावना इत्यत्र भावनापदं वे
गाभिन्नसंस्कारपरं तेन स्थितिस्थापकस्यापि संग्रहः नचातीन्द्रियत्वमिन्द्रियजन्यप्रत्यक्षाविषयत्वं यदि तद्गु
रुत्वादावसंभवस्तेषामलौकिकप्रत्यक्षाविषयत्वात् लौकिकप्रत्यक्षाविषयत्वविवक्षणे चातीन्द्रियत्वपादा
वतिव्याप्तिरिति वाच्यम् लौकिकसाक्षात्कारविषयगुणत्वन्यूनवृत्तिसंस्कारत्वान्यधर्मसमवायत्वगुणत्वस्य
विवक्षितत्वात् स्नेहादिकमादायासंभववारणाय गुणत्वन्यूनवृत्तीति भावः नाप्यतिस्थापकयोरव्याप्तिवारणाय सं
स्कारत्वान्येति जात्यादावतिव्याप्तिवारणाय गुणायेदं मूले कारणगुणोत्पन्ना इत्यत्र न कारणे तस्य गुणा इति भ्रमनि
राकरणाय यह मुक्तावल्यां कारणगुणेनेति समवायकारणसमवेतगुणेनेत्यर्थः अत्र कारणत्वमविवक्षितं स
मवायित्वमात्रं बोध्यम् तेनादृष्टाद्यसि तथा च कारणगुणेजन्यत्वाः कारणगुणोत्पन्ना न कारणगुणोत्पन्ना
अकारणगुणोत्पन्ना इति विग्रहेण स्वाश्रयसमवायसमवेतगुणजन्यत्वं कारणगुणोत्पन्नत्वं तेनादृष्टगुण
जन्यत्वमकारणगुणपूर्वकत्वमिति भावः यद्यपीदं नित्यद्रव्ये जन्येपि च पाकजद्रव्यादौ अवयवावयविनो
र्द्वित्वद्विपृथक्त्वातिरिक्तद्वित्वद्विपृथक्त्वादौ कर्मजन्यसंयोगविभागेषु पाकजद्रव्ये चातिव्याप्तं तथाप्य १११

कारणगुणोत्पन्नमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वे विवक्षितेमित्यदोषः अकारणगुणोत्पन्नवृत्तित्वं च
निरुक्तकारणगुणोत्पन्नावृत्तित्वं रूपादिनिष्ठपाकजन्यतावच्छेदकवैजात्यसंयोगविभागनिष्ठकर्मजन्यता
वच्छेदकवैजात्यमहत्त्वपरिमाणनिष्ठवैजात्यं परममहत्त्वत्वादावपि नातिव्याप्तिर्वारणाय गुणत्वसाक्षाद्व्याप्येति
संस्कारत्वादिगुणत्वव्याप्यत्वेसति गुणत्वव्याप्यत्वेन तदर्थः अन्यथा भावनात्वस्य गुणत्वसाक्षाद्व्याप्यत्वाभावा
द्भावनायामव्याप्तिप्रसंगात् इच्छात्वमपि परत्वापरत्वयोरतिव्याप्तिरवशिष्यते सापि परत्वापरत्ववृत्तित्वेन जातेर्वि
शेषणेय त्वान्निरसनीयेति ध्येयं मलेच्छुः कारणगुणोद्भवाद्य इति कारणगुणोत्पन्नत्वं च न दृष्टं तत्स्वाश्रयसम
वायिसमवेतगुणजन्यत्वं हस्तपुस्तकसंयोगविभागादिजन्यकायपुस्तकसंयोगविभागादावतिव्याप्तिः न
च स्वाश्रयसमवायमात्रसमवेतगुणजन्यत्वं तत्तत् हस्तपुस्तकसंयोगादिस्तु न स्वाश्रयसमवायमात्रसमवे
तइति वाच्यं तथाप्यवयवावयविनोरेकत्वाभ्यां जनितेऽवयवावयविद्वित्वादावतिव्याप्तेः तथापि स्वाश्रयसमवा
यिमात्रसमवेतस्वसजातीयगुणजन्यत्वं तत्र अवयवैकत्वादेरवयवावयविद्वित्वसजातीयगुणजन्यत्वं तत्र
अवयवैकत्वादेरवयवावयविद्वित्वसजातीयत्वाभावेन तत्र नातिव्याप्त्यभावात् न च संख्यात्वेन तयोः साजात्य
मस्तीति न दोषः तादृशस्यात्र गुणत्वव्याप्यव्याप्यजात्या साजात्यस्य विवक्षितत्वात् अवयवावयविद्वित्वादौ तां

त्वादिना सांजात्यसत्वान्नासंभवः ननु तथापि स्पन्दे संख्याप्रयजन्यपरिमाणे कर्मजवेगे चाव्याप्तिरिति चेन्न
स्वाश्रयसमवायिमात्रसमवेतस्वसजातीयगुणाजन्यवृत्तिजातिमत्वस्य विवक्षितत्वात् तिम्नन्यूपादेव तादृ
शन्यूयत्वादिकमादाय लक्षणसमन्वयात् अत्र संख्यात्वपृथक्त्वातिरिक्तत्वेन भावत्वव्याप्यत्वमनेन च तादृश
जातिर्विशेषणीया तेन तादृशसंख्यात्वं तादृशपृथक्त्वं चादायद्वित्वद्विपृथक्त्वादौ नातिव्याप्तिः नचा
वयववेगजन्यावयविवेगवृत्तित्तिसत्तागुणत्वसंस्कारत्वमादाय भावनायामतिव्याप्तिः नचैवं जातिघटित
लक्षणे तादृशन्यूयत्वादिजातिमादाय पाकजरूपादावतिव्याप्तिरिति वाच्यं तादृशजातिमत्वस्य पाकजत्व
स्य विवक्षितत्वादिति सर्वं चतुरस्रं लक्षणतावच्छेदकेऽपाकजत्वविशेषणस्य प्रयोजनमाह मुक्तावल्यां पाक
जरूपादीनामिति कारणगुणपूर्वकत्वाभावात् अत्र पाकजरूपरसगंधस्पर्शपाकजद्रवत्वद्वित्वादिद्विपृथक्त्व
द्विसंयोगविभागपरत्वानां कारणपूर्वकत्वेन वाकारणगुणगुणपूर्वकत्वं साधर्म्यमिति ध्येयं एवमन्यत्रापि
ति अथ प्रादेशिक इत्यादिमूले नसंयोगादिद्वयविशेषगुणानामव्याप्यवृत्तित्वं साधर्म्यं प्रदर्शनीयं नत्रा
पि यथाश्रुते कर्मादावतिव्याप्तेरीश्वरज्ञानादावव्याप्तेश्चाव्याप्यवृत्तिगुणत्वव्याप्यजातिमत्वं बोध्यमित्यर्थः
मूले एकपृथक्त्वेहशाष्टक इत्यत्रैकत्वमेकपृथक्त्वं चेत्यर्थो बोध्यः वैशेषिको गुण इत्यत्रात्मन इत्यस्य १०३

न्वयः मुक्तावल्यां उडस्पर्श इति अवयवगतउडस्पर्श इत्यर्थः अस्य स्पर्शस्य अवयविगतउडस्पर्शस्य एवमग्रेपि का
र्य्येकार्थप्रत्यासत्त्या कार्ये कार्थप्रत्यासत्त्याच गुरुत्वस्य समवायिकारणत्वमिति प्रदर्शनाय गुरुत्वपतनयोरित्युभय
मुक्तं एवमग्रेपि संग्रहे सत्कादि संयोग विभ्रयेभेर्याकाम् संयोगोऽसमवायीति प्रमांत संयोगपद इदं चिंतः पाठः भाव
कार्यस्यासमवायिकारणजन्यत्वनियमाद्भेर्याकाशसंयोगस्य शब्द प्रत्यसमवायिकारणत्वमावश्यकमिति भा
वः यद्यपि भेरीदंडसंयोगस्य शब्दे निमित्तत्वेन नतु तत्र तस्यासमवायिकारणत्वमावश्यकमिति भावः यद्यपि भेरी
दंडसंयोगस्य शब्दे निमित्तत्वेन नतु तत्र तस्यासमवायिकारणत्वं भेर्याकाशसंयोगस्यासमवायिकारणत्वेनन्तु तत्र
स्य निमित्तत्वमित्यव्यक्तेर्न द्विविधहेतुत्वं तथापि संयोगजातीयस्य द्विविधहेतुत्वमस्त्येवेति भावः एवमग्रेपि म
लेः संयोगादिद्वयेतत्त्वेत्यत्तं नरे द्विविधेवेत्यस्य प्राक्रायपरत्वद्वित्वपृथक्त्वादिके पुनरिति पाठः क्वचित्तु तत्के प्रमा
णाया तःपरत्वादीनामकारणत्वे नद्विविधकारणत्वसत्त्वाभावात् नच परत्वादीनामपि ध्वंसं प्रत्यत्वं प्रति
हेतुत्वात्कथमकारणत्वस्य तत्त्वाभावात् नच परत्वादीनामपि ध्वंसं प्रत्यत्वे प्रतिहेतुत्वात्कथमकारण
त्वमिति वाच्यं ध्वंसप्रत्यत्तातिरिक्तं प्रत्यकारणत्वस्योक्तत्वात् विस्तरस्तत्वत्रानुसंधेयः मुक्तावल्यामवाच्यइति
रित्यस्य दैशिकेत्यादिः तेन रूपादौ नातिव्याप्तिः नीलत्वादीत्यादिनारक्तत्वादेरपि ग्रहः अन्यथा नीलादीनां

म॰टी॰ मेकव्यक्तित्वेन न तु लाघवादेव नीलादीनामव्यक्तित्वेऽङ्गीकर्तव्ये इत्यत आह लाघवं विनेति प्रत्यक्षबाधितमिति नीलो न स्फुरत्यु
२८ त्पन्न इत्यादिप्रत्यक्षबाधितमित्यर्थः अन्यथेति लाघवमात्रेण नीलरूपादीनामैक्याभ्युपगम इत्यर्थः ननूत्पन्नो घटो
104 विनष्टो घट इत्यादिप्रतीतेर्नैव घटादेरैक्यमित्यत आह इत्यादेरिति एतेन ईदृशजातिसाधकप्रमाणेन रूपादिकं रसत्वादि
कं आदिना गंधत्वादिपरिग्रहः संयोगाद्यावृत्तिव्याप्तिमाशंक्याह चक्षुर्ग्राह्यमितीति चक्षुर्ग्राह्यमित्यस्यार्थः ते
न चक्षुरिति प्राक्प्रतीकधारणेऽपि न योनरूपत्वं विशेषगुणत्वमिति विलक्षणगुणत्वमित्यर्थः वैलक्षण्यं च
क्षुर्भिन्नाग्राह्यत्वं न च तथापि प्रमाभिन्नसंयोगाद्यावृत्तिव्याप्तिरिति वाच्यं चक्षुर्मात्रग्राह्यत्वस्य चक्षुर्मात्रगृहीतत्वे
हृविशेषतिव्याप्त्याय तथा चक्षुर्मात्रग्राह्यत्वस्य जातिविशेषणत्वं स्वीकृत्य चक्षुर्मात्रग्राह्यजातिमत्त्वेन गवि
वक्षणत्वविवक्षणस्यावश्यकत्वयत्नेनैव प्रमामिति संयोगेति व्याप्तिवारणायेति प्रमात्वमादाय प्रमायाम्
त्तिव्याप्तिवारणाय गुणपदं अग्रेऽपि स्पर्शलक्षणेऽप्येषा रीतिर्बोध्येत्यर्थः अप्रत्यक्षत्वप्रसंगादिति द्रव्यचाक्षुषप्रति
समवायसंबंधेनोद्भूतरूपस्य हेतुत्वादिति भावः व्याप्यवृत्तिजातीयेति व्याप्यवृत्तिजातिमत्त्वसविषयावृत्तिर्बोध्या
तेन व्याप्यवृत्तीश्वरज्ञानजातीयस्याप्यसत्त्वादिज्ञानस्याव्याप्यवृत्तित्वेऽपि न क्षतिः ननु वृत्तानां वाकुत्रेत्यत एकंव
नमिति वत्तत्र परस्परसदायगतनमेकत्वमादायैकचित्रमित्यनुभवोपपत्तिरत आह नानेति गौरवादिति वि २८

त्रमितिप्रतीतिविषयतायाअनेकत्वकल्पनेगौरवादित्यनन्तरंचित्ररूपाधिकरणेघटादौस्वाश्रयसमवेतत्वसंबंधेन
कपालनीलादीनांकारणतासत्वात्कथंतत्रननीलाद्युत्पत्तिरित्यतआह इत्थंचेति रूपत्वावच्छेदेन चित्ररूप
सिद्धौचेत्यर्थः प्रतिबंधकत्वकल्पनादिति समवायेन नीलंप्रतिस्वसमवायसमवेतत्वसंबंधेननीलातिरिक्त
रूपत्वेनपीतत्वंप्रतिपीतातिरिक्तरूपत्वेनप्रतिबंधकत्वमित्येतादृशप्रतिबंध्यप्रतिबंधकभावकल्पनात् अ
न्यथानानाजातीयकपालारब्धेघटेनीलकपालाद्यवच्छेदेनपीतोत्पादापत्तेर्दुर्वारत्वादितिभावः अत्र नव्याः
नानाजातीयरूपवत्कपालारब्धेघटेपीतकपालावच्छेदेननीलापत्तिवारणायनपूर्वोक्तप्रतिबंधकभावः
कल्प्यतेकिंत्ववच्छेदकतासंबंधेननीलादिकंप्रतिसमवायेननीलादिकंप्रतिस्वाश्रयसमवेतत्वसंबंधेननील
त्वादिनाहेतुत्वस्यपूर्वोक्तप्रतिबध्यप्रतिबंधकभावस्यचकल्पनेगौरवमित्याहुः तन्न अवच्छेदकतासंबंधस्य
दितोक्तकार्यकारणभावांगीकारेप्यवच्छेदकतासंबंधेनकपालादौजायमानस्यनीलादेःसमवायेनघटा
दाविवगगनादावप्युत्पत्तिवारणायसमवायेननीलादिकंस्वाश्रयसमवेतत्वसंबंधेनहेतुत्वस्यतत्वाप्या
वश्यकत्वात् किंच चित्रमितिप्रतीतिविषयतायाअनेकत्वकल्पनेगौरवं एकत्वकल्पनेयावत्तामितिलाघ
वानुरोधेनातिरिक्तचित्रसिद्धौप्रतिबंधकभावकल्पनागौरवस्यनदोषत्वं फलमुखत्वादित्यन्यत्रविस्तरः

मु॰टी॰ स्पर्शो व्याख्यात इति कोमलकठिनस्पर्शवदवयवाभ्यामारब्धे च तद्दोषः स्पर्शानंगीकारे च तत्स्पार्शनापत्तिरिति
९५ चित्रस्पर्शोप्यावश्यक इति भावः अवयविनो रसत्वेपि तत्तद्रसाभावादिति न च चित्रो रस इति प्रतीतिर्न विषयतयाऽ
तिरिक्तचित्ररससिद्धिरिति वाच्यं ताहृशप्रतीतेरवयवगतनानारसैरुपपत्तेरन्यतिरिक्तचित्ररसे तत्प्रागभावध्वं
105 सादिकल्पने गौरवात् नचैवं द्व्यणुकरसस्यायोग्यतया मधुरादिरसप्रतीतिनियमकत्वासंभवेनास्तु द्व्यणुके
मधुरादिरसस्य त्वनुरत्नका यस्यावयविपर्यंतं मधुरादिरसवत्त्वे मानाभावः द्व्यणुकमधुररसे नैव मधुरादि
प्रत्ययोपपत्तेरिति वाच्यं समवायेन मधुररसं प्रति स्वसमवायसमवेतत्वसंबंधेन मधुररसत्वेन हेतुतया द्व्य
णुगतमधुररसान्यथानुपपत्त्या त्र्यणुकप्रतिष्ठाकारणबलात् त्र्यणुकादौ मधुररसोत्पत्तेर्दुर्वारत्वात्
ननु ज्वराववेद्यायां नपाकोन तु परमाणावत आह नहि रक्तो तिनसंयोगत इति कठिनसंयोग इति प्रतीतिस्तु
च्चटिनस्पर्शवद्द्रव्यप्रतियोगिकत्वमवगाहत इति भावः रूपादीनां पाक इति रूपादीनां परावृत्तिरित्यर्थः पा
कोन संभवतीति रूपादिपरावृत्तिफलकः तेजः संयोगो न संभवतीत्यर्थः रूपादिपरावृत्तिर्न संभवतीति यावत्
रूपादिनाशं प्रति स्वात्मारंभकसाधारणसर्वावयवावच्छेदेन तेजः संयोगस्य हेतुतया अवयविनाऽवष्ट
ब्धेष्ववयवेषु सत्सु अवयविनि रूपादिनाशो न संभवति तद्धेतोः सर्वावयवावच्छेदेन तेजः संयोगस्याभा ९५

वः न च विद्यमानेपि घटादौ सर्वावयवावच्छेदेन तेजःसंयोगः कुतो नोत्पद्यत इति वाच्यं तथा सति आरंभकसंयो-
गावच्छेदेनावयविनि तेजःसंयोगोत्पादकाले तदवच्छेदेवावयवेष्वपि नोदनाभिघातयोरन्यतरस्योत्पादनिय-
मेनावयवेषु विभागहेतुक्रियोत्पादेनारंभकसंयोगनाशापत्तेः न चावयवेषु तेजोभिघातानंतरं पंचमक्ष-
णएवावयविनाशसंभवेन तत्पूर्वमवयविनि रूपादिनाशावश्यंतरोत्पादयोरावश्यकत्वात्सर्वावयविनि
रूपादिपराहृतिजनकविजातीयतेजःसंयोगस्यमानाभावेनाकल्पनात् अवयविरूपनाशे आश्रयना-
शस्य हेतुत्वात्पाकजन्यतस्य कार्यतावच्छेदककोटिप्रवेशे गौरवादवयविनाशं विना पाकेनावयविरूपना-
शासंभवादवयविनीलादाविव नीलादेर्हेतुतायां व्यभिचारात् यत्पाकेनावयविनीलादेर्हेतुतायां
व्यभिचारात् यत्पाकेनावयविनीलाद्युत्पादासंभवाच्चेत्यभिमानः अवयविषु न वेशोऽपीति चेत् द्व्यारंभककपा-
लादिपरमाणुपर्यंतेषु अग्निसंयोगे न पूर्वोक्तरीत्या घटादिद्व्यणुकपर्यंतनाशसंभवादिति भावः स्वलंत्रे-
षु कार्यद्रव्याध्वंसविशिष्टेषु न तत्र संख्यानभेदादिः कथं न प्रतीयत इत्यत आह तेजसामिति व्यूहः संस्थे-
नैवैशद्यमत्वतिः प्रक्रियाद्व्यणुकनाशादिरूपाद्युत्पत्तिक्षणानि त्रयस्त्रिंशत् क्रियत इति शेषः विभागज-
न्यविभागानंगीकार इति कारणाकारणविभागात्कार्याकार्यविभागवत्कारणमात्रविभागात्कारणावि

मु॰टी॰ भागानंगीकार इत्यर्थः द्रव्यारंभकसंयोगप्रतिद्वंद्विविभागजनकक्रियायास्तदनारंभकसंयोगप्रतिद्वंद्विविभा
९६ गाजनकत्वनियमे मानाभावादिति भावः अत्र विभागग्रंथे वक्ष्यमाणविकसत्कमलभंगप्रसंगभियाऽत्र
106 नियमांगीकार आवश्यकः एवं च द्व्यणुकारंभकपरमाणुक्रियया यत्र द्व्यणुकारंभकसंयोगप्रतिद्वंद्विवि
भागो जनितस्तत्र तया परमाणुक्रियया तत्परमाण्वाकाशादिसंयोगप्रतिद्वंद्विविभागो जनितस्तत्र त
यापरमाक्रियया तत्परमाण्वाकाशादिसंयोगप्रतिद्वंद्विविभागोत्पत्ति न संभवति न च मास्तु परमाण्वा
काशविभागः का क्षतिरिति वाच्यं तथा सति नाशकविभागाभावेन परमाण्वाकाशसंयोगस्य नित्यत्वाप-
त्तेः एवं च परमाण्वाकाशसंयोगस्य पूर्वदेशसंयोगस्य प्रतिबंधकस्य सत्त्वात्परमाणावुत्तरदेशसंयो
गानुत्पत्त्या परमाणुगतक्रियानाशानुत्पत्तेश्चास्तादृशपरमाण्वाकाशविभागजनकः परमाण्वोर्विभागो
वाच्य इत्यभिप्रायवानाह तदंगीकारे त्विति अनयोः पदयोः प्रथमपद्यस्यैव सम्यक् यदेवच्छेदेन कमला
रंभकसंयोगस्तदवच्छेदेनाक्रियानुत्पत्त्या च न विकसत्कमलभंग इति ध्येयं तत्र विभागजनकत्वेन कर्मत्वे
कर्मलक्षणस्यातिव्याप्तिः संयोगविभागयोरनपेक्षकारणं कर्मेति सूत्रस्य संयोगस्य विभागस्य चानपेक्ष
कारणं कर्मेति लक्षणद्वये तात्पर्यमित्यभिमानेन द्वितीयलक्षणस्य तत्रातिव्याप्त्याभिधानमिदं च वस्तुतस्तु ९६

संयोगविभागयोरनपेक्षकारणं कर्मेति लक्षणं तत्र संयोगस्यानपेक्षकारणमित्युक्तौ कारणकारणसंयोगे ति-
व्याप्तिः तस्य कार्यकार्यसंयोगे किंचिदनपेक्ष्यकारणत्वात् एवं विभागस्यानपेक्ष्यामित्युक्तौ कारणाविभागे
तिव्याप्तिरत उक्तं संयोगविभागयोरिति अनपेक्षत्वं च स्वोत्तरोत्पन्नभावानपेक्षत्वं अन्यथा कर्मणोपि संयो-
गजनने द्रव्यस्य पूर्वसंयोगनाशस्य चापेक्षणात् असंभवापत्तेः विभागासमवायिकारणत्वेसति संयोग
हेतुत्वं वा तत्र एवं देशविभागस्तु नोत्तरदेशसंयोगे कारणं व्यवहाराभावेनान्यथासिद्धेः संयोगस्य वि-
भागं प्रति कारणत्वाभावादेव नासमवायिकारणत्वमिति न तत्राव्याप्तिः इत्थं च कारणमात्रविभागस्य पूर्व-
संयोगनाशे द्रव्यनाशे वाऽनपेक्षकारणकारणविभागजनकत्वेपि नातिव्याप्तिः तस्य विभागजनक-
त्वेपि संयोगविभागोभयजनकत्वाभावादिति ध्येयं द्रव्यारंभकसंयोगनाशविशिष्टकालमपेक्ष्येति
द्रव्यारंभकसंयोगनाशोन्यद्यधिकरणलक्षणे तल्लक्षण इत्यर्थः कारणतानु द्रव्यारंभकसंयोग
नाशत्वेनैव लाघवादिति ध्येयं एवमग्रेपि नवदशैकादशलक्षणाः प्रक्रियाः क्रमेणोपपादयन्ति तथा
हि न्यायादिना परमाणौ कर्म द्व्यणुकारंभकपरमाण्वोर्मध्ये एकस्मिन्परमाण्वावेमध्ये एकस्मिन्परमा-
णौ कर्म परमाण्वन्तरेण आरंभकेति द्व्यणुकारंभकेत्यर्थः ततः परमाणोः श्यामादिनाश इति परमा

मु.टी.
१०८
107

णुगतश्यामनाशं प्रति द्व्यणुकात्मकद्रव्यस्य प्रतिबंधकतया ततः पूर्वं श्यामासंभवादिति भावः द्रव्यारंभकेति
द्व्यणुकारंभकेत्यर्थः तद्विनाशमंतरेणेति द्व्यणुकनाशोत्पत्तिक्षणोत्पत्तिकोत्तरसंयोगेन श्यामनाश
क्षणएव पूर्वक्रियानाश इति भावः परमाणौ क्रियांतराभावादिति तस्मिन्परमाणौ क्रियांतराभावा
दित्यर्थः अत्र हेतुमाह कथमितीति गुणोत्पत्तिमंतरेण कर्मानुत्पत्तौ हेतुमाह निर्गुणेति कारणमा
त्रविभागस्य कारणाकारणविभागजनकत्वाभावयत्तएव ग्रंथांतरे एतत्क्षणप्रक्रियोक्तासा च नि
र्गुणे द्रव्यारंभानुगुणक्रियोत्पत्तौ बाधकाभावेन रक्तोत्पत्तिक्षणएव द्रव्यारंभानुगुणक्रियोत्पत्तिः संभ
वतीत्यभिप्रायेण समर्थनीया विभागेन विभागजननमिति कारणमात्रविभागेन कारणाकारण
विभागजनने सतीत्यर्थः विभागजविभागाविति आरंभकसंयोगनाशस्य तृतीयक्षणएवोत्पन्नत
याचतुर्थक्षणे परमाण्वाकाशविभागः संभवतीति भावः ततः श्यामनाशपूर्वसंयोगनाशाविति
परमाणुश्यामनाशपरमाण्वाकाशसंयोगनाशावित्यर्थः परमाणुश्यामनाशं प्रति द्व्यणुकनाश
स्य हेतुत्वात्तत्पूर्वं परमाणुश्यामनाशासंभवादिति भावः रक्तोत्पत्त्युत्तरसंयोगाविति उत्तरसंयोग
विनाशपूर्वकर्मणो नाशासंभवेन द्रव्यारंभानुगुणक्रियानुत्पत्तेरिति भावः एवमग्रेपि अत्रयथवाग्नि १०८

संयोगो द्व्यणुकनाशकः मध्यवश्यामनाशो रक्तोत्पादे च हेतुरिति केषांचिन्मतं तत्पुनरग्न्यन्तरसंयोगादिति भाष्य
विरुद्धं नादरणीयमित्यभिप्रेत्याह मध्यमशब्दं वदिति एकस्मादिति द्व्यणुकनाशकादेकस्मादित्यर्थः य
था मध्यमशब्दात्सर्वशब्दनाशोत्तरशब्दोत्पादौ भवतः तथैकस्माद्द्व्यणुकनाशकादेकस्मादित्यर्थः यथै
मध्यमशब्दात्सर्वशब्दनाशोत्तरशब्दोत्पादौ भवतः तथैकस्माद्द्व्यणुकनाशकादग्निसंयोगात् श्यामना
शरक्तोत्पादौ न भवत इति व्यतिरेके दृष्टान्तः तावत्कालमिति श्यामनाशोत्पत्त्यव्यवहितपूर्वक्षणपर्य
न्तमित्यर्थः अग्नेः द्व्यणुकनाशकाग्निसंयोगस्यैव मतेऽपि आस्थिरत्वादिति यद्वा परमाणावग्निसंयोगा
त् द्व्यणुकासमवायिकारणसंयोगविनाशके परमाणौ कर्म तदेव नोदनाभिघातान्यतरात्मकस्या
ग्निपरमाणुसंयोगस्य जनकं यग्निकर्म तस्य विनाशः कर्मणः स्वजन्यसंयोगविनाश्यत्वात् तदुत्तरक्षण
पुनरग्नौ कर्मकारणीभूतवेगाभिघातादेः समानाधिकरणकर्मध्वंससहकारित्वात् ततो विभा
गः ततो द्व्यणुकनाशसमकालमग्निपरमाणुसंयोगस्य नाशेन श्यामरूपनाशोत्पत्त्यव्यवहितपूर्वक्षण
पर्यन्तस्थास्थिरत्वादिभावः ननु मास्तु द्व्यणुकनाशकाग्निसंयोगस्य परमाणुश्यामनाशकत्वं रक्तोत्पा
दकत्वं च परं तु द्व्यणुकनाशसमकालोत्पन्नाग्न्यन्तरसंयोगस्य परमाणुश्यामनाशकत्वं रक्तोत्पादकत्वं चा

म॰टी
१०८
108

स्तुनच श्यामनाशकतावच्छेदकरक्तोत्पादकजात्योःसांकार्यापत्तिरिति वाच्यं उत्पादकतावच्छेदकजातेर्नाशा
कतावच्छेदकजातिव्याप्यत्वोपगमादत आह किंचेदिति नाशकस्यैव यद्युत्पादक इति एवकारेण नाशक
तावच्छेदकवह्निनाशत्वव्याप्तिरुत्पादकतावच्छेदके लभ्यते तथा च यदुत्पादकतावच्छेदकं नाशक
तावच्छेदकव्याप्यं तदेत्यर्थः नष्टरूपादेरूपरपराणां नष्टानां अग्निनाशे चरमाग्निसंयोगनाशे परमाणौ
पाकेनरूपोत्पत्तिस्थले प्रथमाग्निसंयोगाधीना रूपोत्पत्तिस्तेनैव नाशः पुनरग्निसंयोगान्तरं पुना रूपो
त्पत्तिसंभवेपि चरमाग्निसंयोगोत्तरं तेन रूपोत्पादे तद्रूपस्य तेनैवाग्निसंयोगेन नाशः संयोगस्यापि नाशे
रूपान्तरोत्पादासंभवेन नीरूपश्चिरं परमाणुः स्यादित्यर्थः न च चरमाग्निसंयोगेन विनश्यद्वस्थेनैव रूपो
त्पत्तिः तदुत्तरक्षणे च न तद्रूपनाशः स्वोत्तरक्षणेऽग्निसंयोगाभावादिति वाच्यं असमवायिकारणस्य कार्य
सहभावेनैव हेतुतायां न्यायवैशेषिकमताभिप्रायेण न्यायनये पूर्वोक्तरीत्या यदादेरपि नीरूपत्वप्रसंगो बाधः
ननु रक्तोत्पादकतावच्छेदकवैजात्यं श्यामनाशकतावच्छेदकवैजात्यव्याप्यमिति न ब्रूमः परं तु वैजात्य
योरभेदेन न सांकार्यमत आह उत्पादकस्यैवेदिति चेच्छ्यामनाशकतावच्छेदकवैजात्यव्याप्यमिति न ब्रूमः
परं तु वैजात्ययोरभेदेन न सांकर्यमत आह उत्पादकस्यैवेदिति चेन्नाशक उत्पादक इति योजना नाशकता १०८

वच्छेदकमेव यद्युत्पादकतावच्छेदकं तदा कार्यतावच्छेदकमपि स्यान्मान्यतः पृथिवीपरमाणौ न स्यात् कार्य
वैचित्र्यस्य कारणतावच्छेदकभेदाधीनत्वादिति भावः इदं च पूर्वरूपनाशकाग्निसंयोगमात्रस्योत्तररूपहेतु
त्वमित्यभिप्रायेण पुनरन्यस्मादग्निसंयोगादिति भाष्यानुरोधेन चोक्तं वस्तुतो रक्ततारतम्यस्य पूर्वविशे
षध्वंसकृततनानात्वाभावास्य द्व्यणुकनाशकाग्निसंयोगापेक्षयाऽन्यपरत्वादुत्पादविनाशकयोरग्निसंयोग
योरेकत्वानेकत्वे अनियम इति ध्येयं परमाण्वंतरेऽपि द्व्यणुकनाशककर्मवत्परमाणुभिन्नद्व्यणुका
न्तरंभकपरमाणुवित्यर्थः कर्मचिंतनादिति द्व्यणुकारंभकसंयोगनाशाद्युत्पत्त्यादिक्षणे द्व्यणुका
न्तरारंभककर्मचिंतनादित्यर्थः पंचमादीत्यत्रादिना षष्ठसप्तमाष्टमक्षणानां परिग्रहः इत्यष्टक्षणा
इति ननु यत्रैकस्मिन्परमाणावग्निसंयोगसमकालं परमाण्वन्तरे कर्मोत्पत्तिस्तत्र तत्क्षणे शुक्लकर्मणैकु
त्रक्रिया विभागपूर्वसंयोगनाशद्व्यणुकनाशाः अपरत्र विभागपूर्वसंयोगनाशोत्तरसंयोगोत्पत्ति
द्व्यणुकोत्पत्तिरूपा न्यत्र यस्त्राहिक्षणाः एवं यत्रैकस्मिन्परमाणौ कर्मोत्पत्तिसमकालं परमाण्वन्तरेक
र्मोत्पत्तिस्तत्रापि क्षणाः एवं यत्रैकस्मिन्परमाणौ विभागसमकालं परमाण्वन्तरे कर्मोत्पत्तिस्तत्र चत्व
क्षणाविसंभवति प्रक्रियेति चेन्न द्व्यणुकनाशानंतरेण परमाणौ श्यामादेर्निवृत्तिस्तदानंतरेणाचर

मु॰टी॰ १०९ 109

क्रोत्पत्तिर्न संभवतीत्युक्तप्रायं इत्थं च द्व्यणुकनाशक्षणे रक्तोत्पत्तिक्षणे वा द्व्यणुकान्तरोत्पत्तौ द्वित्रिचतुःक्ष
णप्रक्रियाव्याख्याने चैतेषु क्षणेषु द्व्यणुकान्तरोत्पत्तिः संभवति तथा सति नवमक्षणेषु परमाणौ र
क्तत्वेन नष्टारब्धद्व्यणुकस्यापि रक्तत्वप्रसंगादिति परमाणौ रक्तत्वरक्तोत्पत्तिक्षणे नव द्व्यणुकरक्तोत्पादसंभवात् क्ष
मनाशक्षणे द्व्यणुकोत्पत्तौ तु तद्विरहक्षणत्रितक्षणापि भवति रूपाद्युत्तरमुहूर्तकत्वस्यैव रूपादेः रूपाद्युत्पा
दकतागीकारे त्रिक्षणप्रक्रियाया असंभवापत्तेः क्षणसंभवेऽप्यरक्तोत्पत्तिक्षणे द्व्यणुकोत्पत्त्या
तदनन्तरक्षणे तत्र रक्तोत्पादसंभवादित्युच्छृंखलमतेनादरणीयं रूपादिमत्त्वस्य रूपादिद्रव्यारंभकत्वनि
तिसिद्धान्तविरोधात् द्विक्षणप्रक्रियानुकस्यापि मतेन संभवति इत्यवश्यं द्व्यणुकस्य प्रतिबंधकत्वया द्व्य
णुकनाशक्षणे द्व्यणुकान्तरोत्पादसंभवादिति ध्येयं अवयविन्यपि नापरमाणुपर्यन्तग्रहः तेषां नैयायि
कानामयं वक्ष्यमाणः अवष्टब्धेष्वपीति अवयविनावष्टब्धेष्वपीत्यर्थः पाकः रूपादिपरावृत्तिः न वि
रुध्यत इति साक्षात्परम्परासाधारणसकलावयवावच्छेदेन तेजःसंयोगस्य रूपादिनाशहेतुत्वे सा
नाभावेनारंभकसंयोगावच्छेदेन विजातीयतेजःसंयोगादेव रूपादिनाशसंभवेऽप्यारंभकसंयो
गावच्छेदेन तेजःसंयोगस्याभिघातादेस्तदानीमसद्भावेन पूर्वोक्तरीत्यावयविनाशस्याप्रसक्तेः स १०९

वांवयवावच्छेदेन तेजःसंयोगस्य द्रव्यादिनाशकत्वेऽपि नाशकतावच्छेदकतावैजात्यस्यानोदनाभिघातविरुद्ध
स्येवांगीकरणीयतया नोदनाभिघातभिन्नतेजःसंयोगाद्द्रव्यादिनाशेऽपि तेनावयविनाशस्यासंभवात् अस्तु वा
द्रव्यादिनाशकतावच्छेदकवैजात्यस्य नोदनाभिघातान्यतरव्याप्यत्वं तथाप्यवयवाभिघातादिकालेऽवयवाभिघा
तोत्पादनियमे मानाभावः आस्तां वा नयानियमस्तथाप्यवयवाभिघातादेर्नियमतो द्रव्यारंभकसंयोगविरो
धिविभागहेतुक्रियाजनकत्वे मानाभाव एव विभागं प्रति क्रियायास्तद्व्यक्तित्वेनैव हेतुतया तत्क्रियात्वेन क्रिया
धीनविभागं प्रति तत्तत्पूर्वदेशसंविशिष्टस्य हेतुतया च व्यक्त्यन्तरक्रियायास्तादृशविभागहेतुत्वं नास्ति हेतुरिति भावः
यद्यप्युक्तं वैपरीत्ये वैरवयविद्रव्यं प्रत्यवयवद्रव्यहेतुतायां व्यभिचारापत्त्या नावयविनि पाकेन द्रव्योत्पादस्ति
तदपि न अवयवद्रव्यादेर्विजातीयद्रव्यादिकं प्रत्येव हेतुतया व्यभिचाराप्रसक्तेः एतेनावयविद्रव्यनाशं आश्रयनाशहे
तुतायां व्यभिचारापत्त्या पाकेनावयविद्रव्यनाशासंभव इत्यपि परास्तं आश्रयनाशजन्यतावच्छेदककोटौ वैजा
त्यस्य निवेशनीयत्वादिति अवयविनि पाकानभ्युपगमे साधकाभावमुक्त्वा बाधकमप्याह अनंतेति इष्टं चावि
नाशानंगीकारे च प्रत्यभिज्ञा संगच्छत इति पूर्वावयविनाशे नूतनरोत्पन्नावयविनि पूर्वावयविनो भेदाभावेनाभेद
वगाहि प्रत्यभिज्ञा नस्यादिति भावः कालादौ वर्तिव्याप्तिमाशंक्याह साधारणमिति वस्तुतो गगनसंख्यादे

म॰टी॰ तत्प्रकारकोव्यवहारस्तत्प्रकारकं प्रमात्मकं ज्ञानं तेन तु न द्वित्वविषय इत्यर्थः। नकालादावतिव्याप्तिः तत्रापि संख्यात्वं जातिर्वे
११० वलक्षणमितरत्तु संख्यात्वजातौ प्रमाणं तेनयोक्तं एवमग्रेपीति ध्येयं द्वित्वादय इति एकत्वान्यसंख्यामात्रमपेक्षाबुद्धि
जन्यमिति कारणजन्यमित्यर्थः असमवायिकारणेन द्वित्वं प्रतिसमवायिगतया वदेकत्वमिति बोध्यं ननु योग्यद्वि
110 त्वादेरपेक्षाबुद्धेर्हेतुत्वेप्ययोग्यद्वित्वादौ तद्धेतुत्वे मानाभाव इति चेन्न योग्यद्वित्वादेरपेक्षाबुद्धिजन्यत्वेऽतीन्द्रियद्वि
त्वादावप्यनेकसंख्यात्वादिना तदनुमानात् अथापेक्षाबुद्धेर्द्वित्वहेतुत्वे कथमविलंबेन यावदपेक्षाबुद्धिसत्वं द्वि
त्वाद्युत्पत्तिरिति तत्रधारावाहिकापेक्षाबुद्धिभिः सर्वत्रधारावाहिकद्वित्वाद्युत्पत्तेर्दुर्वारत्वात् भगवदपेक्षाबुद्ध्याधा
रावाहिकद्वित्वाद्युत्पत्तेर्दुर्वारत्वाच्च तद्बुद्धेर्नित्यत्वेनोत्पत्तिसंबंधेन तद्धेतुत्वस्य दुर्वारत्वात् वस्तुतस्तु तत्तत्पुरुषी
यापेक्षाबुद्धिजन्यानेकसंख्यात्वावच्छिन्नं प्रति तत्तत्पुरुषीयापेक्षाबुद्धिजन्यानेकसंख्यादेः प्रतिबंधकत्वा
भ्युपगमात् यावदपेक्षाबुद्धिसत्वं द्वित्वाद्युत्पत्तिरिति प्रत्येकं घटादाविति तथाचानेकाश्रयपर्याप्तिमूलत्वा
संगतमिति भावः ननु एकत्वस्य नानात्वे तथा द्वित्वाधारतानवच्छेदकत्वान्न तथा प्रत्यय इत्यत आह एकोन द्वावि
तीति एकत्वावच्छेदेन द्वित्ववत्ताभावादेकत्वादेर्न तथा द्वित्ववत्ताऽनवच्छेदकत्वादिति भावः अनेकाश्रय
इति उभयाद्याश्रय इत्यर्थः तथाच तादृशप्रतीतेर्न द्वित्वनिष्ठाधारतावच्छेदकत्वमेकत्वे विषयः किंतु पर्या ११०

प्तिसंबंधेन द्वित्वं तद्भेदेवाप्रकारत्वावच्छिन्नप्रकारः इत्थं च पर्याप्तिसंबंधेन द्वित्वस्य प्रत्येकमभावादेको द्वाविति प्रत्य
यस्यैकोन द्वाविति प्रत्ययस्य चोपपत्तेरिति भावः अत्र वहवः उभयादेः प्रत्येकानतिरिक्ततया प्रत्येकमपि पर्या
प्तिसंबंधेन द्वित्वमस्त्वेवेति पर्याप्त्यंगीकारेप्येको द्वाविति प्रत्ययस्य एकोन द्वाविति प्रत्ययस्य च कथमुपपत्तिः
यदि चैकोन द्वाविति प्रतीतिबलाद्द्वित्ववद्भेदावच्छेदकत्वस्वरूपसंबंधविशेषरूपमेकत्वे स्वीक्रियते तर्हि द्वि
त्वावच्छेदकत्वमेको द्वावित्यप्रत्ययादिति भाव्यते तदा समवायपक्षेपि तुल्यमिति पर्याप्त्यंगीकारो निरर्थ
क इति च दत्त्राकुः आकाशावृत्ति वाक्यप्रामाण्यापत्त्या पर्याप्त्यंगीकार आवश्यकतः न च समवायेनैव पा-
र्याप्तिसंबंधेनापि द्वित्वस्याकाशेसत्वात् पर्याप्त्यंगीकारेपि न द्वाक्यप्रामाण्यं दुर्वारमिति वाच्यं उद्देश्यताव
च्छेदकव्याप्यत्वविशिष्टपर्याप्तेरेव द्वित्वसंबंधतोपगमात् आकाशत्वव्याप्यद्वित्वपर्याप्तेरप्रसिद्धत्वात् द्वि
त्वपर्याप्तेर्द्वित्वरूपतयानुस्यूतचैत्रमैत्रावपि सत्वात् न चोद्देश्यतावच्छेदकव्याप्यत्वविशिष्टसमवायस्य द्वित्वसं
बंधत्वं स्वीकृत्याकाशाविति प्रयोगवारणमस्त्वादले पर्याप्त्येति वाच्यं तथा सति घटाविति प्रयोगस्य प्रामाण्या
नुपपत्तेः समवायस्यैकत्वेन घटत्वव्याप्यसमवायस्याप्रसिद्धेरित्यन्यत्र विस्तरः अपेक्षाबुद्धिनाशाद्वित्वनाशा
प्ता इति मूलस्य तार्तीयक्षणोत्पन्नापेक्षाबुद्धिनाशाच्चतुर्थक्षणे द्वित्वादीनां नाश इति नार्थः परं तच्चतुर्थक्षणोत्पे

मु॰टी॰ क्षाबुद्धिनाशात्पंचमक्षणे इत्यर्थः इति ज्ञापयितुं वैशेषिकप्रक्रियां प्रदर्शयति प्रथममित्यादिना द्वित्वविशिष्टप्रत्य
१११ क्षं द्वित्वत्वविशिष्टलौकिकप्रत्यक्षं अन्यथाऽपेक्षाबुद्धेर्द्वित्वक्षणमात्रावस्थायित्वे द्वित्वस्यैव नाशः इति द्वित्वना
शापत्तेरित्यर्थः ननु तदानीं द्वित्वाभावेऽपि तत्पूर्वक्षणे द्वित्वसत्त्वान्न द्वित्वप्रत्यक्षानुपपत्तिरत आह विद्यमानस्ये
वेति संबद्धं वर्तमानं च गृह्यते चक्षुरादिनेत्यनुरोधात् लौकिकप्रत्यक्षं प्रति द्वित्वादेर्विषयस्य कार्यसहभावे
न हेतुत्वादिति भावः ननु योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरवर्तिविशेषगुणत्वेन हेतुत्वादिति भा
वः ननु योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरवर्तिविशेषगुणत्वेन हेतुतयाऽपेक्षाबुद्ध्युत्पत्तिक्षणोत्पन्नस्य
त्यासंस्कारेणैवाऽपेक्षाबुद्धिनाशः केन वारणीय इत्याशंकामुपसंहारव्याजेन परिहरति तस्मादिति
द्वित्वप्रत्यक्षादिकमिति द्वित्वादिद्वित्वत्वनिर्विकल्पमित्यर्थः आदिना त्रित्वद्विपृथक्त्वपरिग्रहः योग्यविभु
विशेषगुणत्वस्य स्वस्य चानुगतस्याभावे स्वोत्तरोत्पन्नयोग्यविभुविशेषगुणत्वस्यानुगतस्याभावात्तत्त
द्व्यक्तित्वेनैव नाश्यनाशकभावस्य वाच्यतया द्वित्वत्वविशिष्टप्रत्यक्षतद्रूपकार्यानुरोधे न द्वित्वत्वनिर्विक
ल्पकस्यैव तत्तद्व्यक्तित्वेनापेक्षाबुद्धिनाशकत्वकल्पनेन द्वितीयक्षणोत्पन्नस्मरणादेरिति भावः ननु द्वित्वत्व
विशिष्टद्वित्वप्रत्यक्षमुपनीतभानात्मकमेवास्तु अलं तदुपपत्तये त्रिक्षणावस्थायिकल्पनेनापेक्षाबुद्धेः

१११

नचवह्नित्वांशेऽनुपनीतभानसंभवेपिवह्नित्वांशोनोपनीतभानत्वमनुपनीतेचविशेषणतयैवेतिनियमादितिवा
च्यं यतोवह्नित्वविशिष्टवह्निप्रत्यक्षेहिजायमानेद्रव्यांशेवह्निप्रकारकमेवभवतिह्रद्रव्यमित्याकारकंनिर्वि
कल्पकोत्तरक्षणेह्रद्रव्यमित्याकारकं तं वह्नित्वविशिष्टवह्निप्रकारकंप्रत्यक्षंनसंभवति नन्वेवंविशेषणता
वच्छेदकवह्नित्वप्रकारकवह्निज्ञानासंभवादितितु नविशेष्येविशेषणमितिरीत्यैवह्रद्रव्यमित्याकार
कप्रत्यक्षसंभवादितिचेन्न निर्विकल्पकस्यप्रत्यासत्तितयाह्रद्रव्येऽनुपनीतभानासंभवात सोपनी
तभानत्वस्यचेत्तदंशेवह्नित्वसाक्षात्कारोमीमांसकव्यवसायानुपपत्तेश्चज्ञानलक्षणात्रितयावस्थायांविषयेत्वाद्वह्नेर्वि
तिविशेषकारणमाशयः नव्यास्तु उपनीतमात्रेणवह्नित्वस्यवह्नित्वसामान्यलक्षणयासर्वमस्मभवाद्वह्नितोन्य
त्रिसमयएववह्नित्वप्रकारकमनुत्पद्यमानंवह्नित्वस्मरणं तेनतदुत्तरक्षणे इदानींह्रद्रव्यंवह्निविशिष्टवैशिष्ट्या
वगाहिलौकिकप्रत्यक्षसंभवात लभ्येतावुद्धेर्विलक्षणावस्थापित्वे तु अन्यथासुखाद्युत्पादद्वितीयक्ष
णोत्पन्नेननिर्विकल्पकमतेनतत्क्षणेचसुखज्ञानापत्तेरदृष्टत्वादिति लौकिकप्रत्यक्षंतुसंभवतीतिसुखप्रत्यक्षा
देर्वपित्रिलक्षणावस्थावप्रसंगादित्याहुः नवैवंबुद्धेर्वहितोत्पादकत्वेचैत्रीयायेत्वावुद्धिजनकत्वेनापेक्षावुद्धि
सूक्ष्मत्वेनमैत्रेणग्रहणापत्तिः सन्निकर्षादित्याद्दितसामग्र्याःसत्वात्द्वारेणयद्विशेषणतासंबंधेनतत्सुख

मु॰टी॰
११२
112

त्तीयप्रमात्वेन तद्भिन्नबुद्धीयापेक्षाबुद्धिजन्याहितत्वादेहलाहात्म्ये न प्रतिबंधकत्वकल्पने च गौरवमत आह अन
थवेति पूर्वोक्तयुक्त्याऽपेक्षाबुद्धेर्द्वित्वोत्पादकत्वस्यावश्यकत्वादेव तेनैव गृह्यत इति तद्भिन्नेन न गृह्यत इति क
ल्प्यत इत्यर्थः तथा चान्यथानुपपत्त्या पूर्वोक्तप्रतिबध्यप्रतिबंधकभावकल्पनागौरवं न दोषायेति भावः न
नु काकालीनत्वे हितप्रमात्वत्वावच्छिन्ने यद्धितप्रमात्वं तस्यैवापेक्षाबुद्धेर्हेतुत्वमस्तु न तद्धितत्वप्रतीत्या शंकते न
चेति लाघवेनेति हितप्रमात्वत्वापेक्षया हितत्वस्य कार्यतावच्छेदकस्य लघुत्वादिति भावः ननु हितप्रमा
त्वनिष्ठलौकिकविषयतया हितत्वमेव कार्यतावच्छेदकमिति न गौरवं न चांतरेणाप्यपेक्षाबुद्धिं हितप्रमा
त्वापत्तिरेतादृशवारितैवेति वाच्यं हितत्वाविषयकहितप्रमात्वस्यालीकतया व्याकीर्णहितत्वावच्छिन्न
जनकसामग्रीविरहादेव तदावरणादिति चेन्न उत्पादकसामग्र्या व्यंजकत्वांगीकारेऽपि द्व्यणुकोत्पादकसामग्र्या
अपि त्र्यणुकादिव्यंजकतापत्त्या समकार्यवादापत्तेरिति नन्वपेक्षाबुद्धेर्द्वित्वाद्युत्पादकत्वं न संभवति द्व्यणुकस्या
स्मदीयप्रत्यक्षागोचरतया तत्रापेक्षाबुद्ध्यसंभवेन तत्र द्वित्वानुत्पत्त्यापत्तेः न चेष्टापत्तिः भावकार्यस्यासमवा
यिकारणजन्यत्वनियमेन द्व्यणुगतद्वित्वं विना द्व्यणुकपरिमाणानुपपत्तेः परिमाणस्य स्वसमानजाती
योत्कृष्टपरिमाणजनकत्वनियमेन द्व्यणुकपरिमाणस्य तत्रासमवायिकारणत्वासंभवादत आह अ ११२

तीन्द्रियेद्व्यणुकादौ विधि आदिनाय इमाणुपरिग्रहः सर्गादौ योगिनामभावादाह ईश्वरेति न चेश्वरीयापेक्षाबुद्धे
र्द्वित्वोत्पादकत्वेन तन्नाशाद्वित्वस्य नित्यत्वप्रसंगः ईश्वरीयापेक्षाबुद्धेर्नित्यत्वेन तन्नाशासंभवस्य तावद्द्वयापद्वित्वेन क्षणमशक्य
त्वादिति वाच्यम् तद्द्वित्वस्य ईश्वरीयापेक्षाबुद्धिसहकारिविशेषस्य क्षणविशेषस्य नाशादेव नाशोपपत्तेः क्षणवि
शेषस्येश्वरीयापेक्षाबुद्धिसहकारित्वाङ्गीकारे सर्गादिकालीनपरमाणुद्वित्वोत्पत्तेः पूर्वं तद्द्वित्वोत्पादात् ततः अपे
क्षाबुद्धिनाशाद्वित्वनाश इति मूलस्यार्थः अन्यनाशोपलक्षकत्वादीश्वरीयापेक्षाबुद्धिसहकारिविशेषोपलक्षकत्व
स्वीकाराद्द्वित्वनाशविरोधः एतेन द्व्यणुकस्याद्वितीयक्षणे भगवदपेक्षाबुद्ध्या तत्र द्वित्वादिकं जन्यताम् इति परास्त
तदानीं सहकारिक्षणविशेषस्याभावेन भगवदपेक्षाबुद्ध्या द्वित्वादेरजननात् तदानीं तत्र द्वित्वोत्पादे मा
नाभावाच्च एतद्व्यवस्थाया ब्रह्माण्डान्तरेति ध्यनतः इत्याकाशत्वात् नत्वेकत्वांशनिष्ठधर्मतावच्छेदकैकत्वज्ञाने
न द्वित्वाद्युत्पत्त्यापत्तिर्बलोव्याचष्टे अयमेक इति तत्र ज्ञातिमात्रनिष्ठैकत्वायवाच्छिन्नविशेष्यतानिरूपितैका
त्वप्रकारताशालिनी बुद्धिरपेक्षाबुद्धिपदार्थ इति नोक्तदोष इति भावः कश्चित्तु सोऽयं इदं तु बोध्यमित्याशयव
यर्थमित्यन्ततः पाठः सचैवं व्याख्याय क्षणानियतैकत्वेति एवं विशेष्यकसंख्यातत्वनियतत्रित्वादिप्रकारकज्ञान
भिन्नकालीनमनेकैकत्वज्ञानमित्यर्थः तेन विनाशादिदशायां तत्रानियतैकत्वज्ञानाभावात् सैव सहकारित्वा

मु॰टी॰
११२
113

दिति भावः उत्पन्नेऽपीति अनियतैकत्वज्ञानस्यापि त्रित्वाद्युत्पादकत्वादिति भावः दोषात् नियतानेकैकत्वज्ञानाभावा
त् अनियतानेकैकत्वज्ञानस्य त्रित्वोत्पत्तिकारणत्वेऽपि त्रित्वांशे त्रित्वत्वज्ञानस्यैव हेतुतया तं विना न त्रित्वत्वादि
प्रकारकं प्रत्यक्षमिति भावः उपपद्यत इति इतो बहुत्वे न्यूनत्वबहुत्वसजातीयनिरूपितोत्कर्षः प्रतीयते तथा
च चतुष्ट्यादिरूपे बहुत्वे त्रित्वादिरूपसजातीयनिरूपितोत्कर्षस्य सत्त्वात्तादृशप्रतीतिरुपपद्यत इति भावः
संख्यान्तरत्वे त्रित्वाद्यतिरिक्तसंख्यात्वेन तत्र तस्याभावादिति बहुत्वसजातीयोत्कर्षाभावात् तव मतेनैतस्य क
रूपत्वादभावनूत्वबहुत्वस्य त्रित्वादिरूपत्वे बहुत्वनिश्चये कथं त्रित्वात्संशय इति वाच्यं समानप्रकारकनिश्च
यस्यैव संशयविरोधितया बहुत्वप्रकारकनिश्चयस्य त्रित्वत्वादिप्रकारकसंशयाविरोधित्वात् अणुमहदि
त्यादि यद्यप्यणुत्वमेव दीर्घत्वमस्तु महत्त्वमेव दीर्घत्वमस्तु महत्त्वमेव दीर्घत्वमस्त्विति कुतस्तयोर्विध्यं तथापि त
दवधिकह्रस्वत्वाव्यवहारात्तदवधिकमहत्त्ववत्तया प्रतीयमाने तदवधिकमहत्त्ववत्तया प्रतीयमाने तद
वधिवदीर्घत्वाव्यवहाराच्च ह्रस्वत्वदीर्घत्वयोरतिरिक्तप्रमाणतया चातुर्विध्यं बोध्यम् संख्याजन्यमुदाहर
तीति संख्यामात्रजन्यमुदाहरत्यर्थः न सजातीयमित्यनेनैतरे विजातीयसंयोगद्व्यणुकप्रचयस्तु न त्र्यणुकादौ
तत्स्वेऽपि वा तस्याकिंचित्करत्वादिति हरणीयं द्वित्वसंख्याद्वित्वसंख्यामात्रे एवमग्रेऽपि परिमाणजन्यं परिमा ११२

त्र्यजन्यं कपालद्वयपरिमाणमात्रजन्यमित्यर्थः अप्रचितमहत्कपालगतद्वित्वसंख्याया महत्त्वाजनकत्वात् अन्य
थाद्व्यणुकेपि महत्त्वोत्पत्तिकल्पेः न चोक्तापत्त्या द्वित्वेन परिमाणजनकत्वेपि घटगतमहत्त्वं प्रति कपालगतमह
त्त्वस्य कपालगतद्वित्वस्य वा हेतुत्वमित्यत्र विनिगमनाविरह इति वाच्यं कपालगतमहत्त्वोत्कर्षेण घटगतमह
त्त्वोत्कर्षस्यानुभविकतया कपालमहत्त्वस्य तत्रावश्यं हेतुतायावाच्यत्वात् यत्र कपालेन प्रचयस्तत्र प्रचयस्या
पि हेतुत्वासंभवात् तत्र घटपरिमाणमात्रजन्यमिति भावः शिथिलाख्य इति किंचिदवयवावच्छेदेनावयवां
तरासंयोगिनि महत्त्वावयवे वर्त्तमानः संयोगः प्रचय इत्येके अत्र महत्त्वपदं न देयं परमाणुसंयोगस्य प्रचयत्वे
नतिविरहादित्यन्ये भूयोवयवावच्छेदेनावयवांतरासंयोगिन्यवयवे वर्त्तमानः संयोगः प्रचयस्तेन परमा
णुसंयोगो द्व्यणुकसंयोगो वा न प्रचय इत्यपरे अत्र प्रचयरहितैस्त्रिभिर्महावयवैरारब्धस्य यत्महत्त्वपरिमा
णं भयजन्यं महदवयवारब्धमहत्त्वादतिशयितत्वात् अल्पावयवारब्धमहत्त्वादतिशयितत्वाच्च प्रचिताभ्यां
महावयवाभ्यामारब्धात् त्र्यणुकमहत्त्वाधिकातिशयप्रदर्शनात् प्रचितैर्महद्भिरारब्धस्य महत्
त्वपरिमाणं संख्यापरिमाणप्रचयजन्यं प्रति च महावयवद्वयारब्धमहत्त्वादतिशयितस्योत्कृष्टत्वादिति बो
ध्यं दिङ्मात्रमस्मन्मूले प्रदर्शितमित्यादिना प्रविस्तरः केचित्तु दीर्घमिति प्रतीतेरवयवसंयोगविशेषणेनोत्पद्यते

मु.दी. दीर्घत्वं न परिमाणमन्यथापि वर्तुलचतुरस्रत्वादीनामपि परिमाणान्तरत्वापत्तेरित्याहुः अर्थादिति प्रकरणादित्यर्थः
११५ यद्वा अर्थात् विशेष्यादित्यर्थः न च परिशेषोऽसिद्धः उपादेयस्याश्रयनाशनाश्यत्वादिति वाच्यं आश्रयनाशत इ
115 ति मूलस्याश्रयनाशमात्रादित्यर्थकतया उपादेयस्याश्रयनाशमात्रनाश्यत्वाभावेन परिशेषसंभवात् न च मूल
स्य तादृशार्थकत्वे प्रयोजनाभाव इति वाच्यं क्रियाविभागादिक्रमेण यत्किंचिदवयवनाशेऽपि शरीरादिनाश
स्य मीमांसकैरनभ्युपगमात् तत्परिमाणनाशस्यानुभविकत्वाच्चाश्रयनाशमात्रनाश्यत्वस्य परिमाणे तेषां
मीकारात् तन्मतनिराकरणाय मूलस्य तादृशार्थकत्वादिति ध्येयं द्वितीयक्षणे चोत्पद्यत इत्यनेन तत्त्वाश्रयप्र
वयावयवगतैकत्वासमवायिकारणकं चेति प्रकरणीयं एकपृथक्त्वं एकसमवेतपृथक्त्वं द्वित्वादिवद्वेति तथं
वद्विपृथक्त्वादौ समानाधिकरणान्येकपृथक्त्वान्यसमवायिकारणानि इदमेकं पृथगिदमेकं पृथगिति नानैक
विषयिण्यपेक्षाबुद्धिर्निमित्तकारणं तादृशबुद्धिनाशात् क्वचिदाश्रयनाशात् क्वचिदुभयोर्नाशात् द्विपृथक्त्वं
नश्यतीति भावः अत्रोभयसमवेतपृथक्त्वं द्विपृथक्त्वमिति रीत्या बोध्यं ननु घटादौ पटात्पृथगित्यादिप्रतीते
र्घटावधिकैकपृथक्त्वद्वयादिनाप्युपपत्तेरुभयसमवेतपृथक्त्वादौ मानाभाव इति चेन्न घटे पटात्पृथ
गिति प्रतीत्योभयसमवेतपृथक्त्वे द्वित्वेनैव चेद्धः पटात्पृथगिति प्रतीत्युपपत्तेरेकपृथक्त्वे प्रमाणाभाव इत्यस्या ११५

पि वक्तुं शक्यत्वात् तस्माद्विनिगमनाविरहादुभयमंगीकार्यं पदे पदार्थसंबंधः कल्प्यत इति सामानाधिकरण्ये
न पदपदार्थसंबंधविषयकत्वमुक्तं प्रतीतेः कल्प्यमित्यर्थः इदमुपलक्षणं प्रतीतेः सामानाधिकरण्येन पदपदं
पदार्थसंबंधविषयकत्वमंगीकृत्यान्योन्याभावानंगीकारे घटत्वात्पृथगिति प्रतीत्यनुपपत्तेः एतद्रूपमेतद्रूपात्पृथ
गिति प्रतीत्यापत्तेश्च अन्योन्याभावस्यातिरिक्तस्याभ्युपगमे तु पृथक्त्वादस्यान्योन्याभावपरतया सर्वमुपपादनी
यमिति पंचमीप्रसंगादिति अन्योन्याभावार्थकपदयोगस्य पंचमीप्रयोजकस्य तत्र सत्त्वादिति भावः अत्र नव्याः
अन्योन्याभाव एव पृथक्त्वं न तु गुणांतरं न च घटान्नेति पंचम्यापत्तिरन्योन्याभावविशिष्टार्थकपदयोगस्यैवा
न्यारादितरर्ते इत्यादिसूत्रेण पंचमीविधानात् नञस्तु नान्योन्याभावविशिष्टार्थकत्वं परं त्वन्योन्याभावार्थ
कत्वमित्यस्यान्यत्र सिद्धांतितत्वात् यदि च घटाद्भेद इत्यादौ पंचम्यनुपपत्त्या भेदार्थकपदप्रयोगः पंचमीप्रयो
जनकतयान्यारादितिसूत्रेण बोध्यत इति चेत्तेनान्यत्र पंचम्यापत्तिर्दुर्वारेति विभाव्यते न ह्यापि नियातिरि
क्तान्योन्याभावार्थकपदयोगस्यैव पंचमीप्रयोजकत्वं कल्प्यते अनुशासनस्य प्रयोगानुरोधित्वादिति प्रा
हुः मूले प्राप्तयोरित्यादिना संयोगस्वरूपमुक्तं तत्र प्राप्तिः संबंधः स च समवायोपीत्यत उक्तं सप्राप्तयो
रिति लक्षणेन संयोगत्वं जातिरिति मूले आद्योन्यतरकर्मज इति ननु संयोगमात्रेन्यतरकर्मणः कार्यता

मु॰टी॰ वच्छेदकमुभयकर्मजसंयोगे संयोगजसंयोगे च व्यभिचार इति चेन्न विजातीयकर्मत्वेन विजातीयसंयोगहे
११५ तुत्वसमवायेन हेतुमद्भावात् उभयकर्मजसंयोगादौ चोक्तविशेषणाभावेन व्यभिचाराभावात् एवमुभयकर्म
णः संयोगस्यापि संयोगं प्रति हेतुत्वं बोध्यम् मूले भवेत्संयोगजोऽपर इति ननु संयोगजसंयोगे मानाभावः य
115 त्र कपालक्रियया कपालतरुसंयोगः ततः कुम्भतरुसंयोगस्तत्र कपालक्रियायामेव तरुसंयोगसतीति चेन्न
समवायेन संयोगं प्रति समवायेन क्रियाया अभावेन कुम्भतरुसंयोगानुपपत्तेः क्रियायाः सामानाधिकरण्य
संबन्धेन हेतुत्वे तत्र कल्पनापत्तेः समवायेन संयोगस्यैव हेतुत्वकल्पनौचित्यात् वस्तुतो यत्र कपालक्रियया कपा
लान्तरेण तरुणा चैककस्यैव हेतुत्वकल्पनौचित्यात् वस्तुतो यत्र कपालक्रियया कपालान्तरेण तरुणा चैक
स्मिन् क्षणे संयोगस्तदुत्तरक्षणे च घटोत्पत्तिः कपालक्रियानाशस्तत्कस्मात्तरुसंयोगस्य पूर्वमसत्त्वात् तदुत्तरं तु
णो कुम्भतरुसंयोगानुपपत्तिः एवं तत्र कपालक्रियाया नाशात् तस्मात् कपालसंयोग एव तत्र कारणमिति संयो
गसंयोगादिसिद्धिरिति राद्धान्तेव अत्र केचित् कथं संयोगस्य द्वैविध्यमन्यतरकर्मजसंयोगस्याप्रसिद्धेः यत्र पु
हृतयोः संयोगस्तत्र संयोगाधिकरणवृत्तिक्रियाविरहेण व्यभिचारादन्यतरकर्मणः संयोगं प्रति कारण
त्वस्य कल्पनमशक्यत्वादित्याहुः तन्न कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्यतावच्छेदकावच्छिन्नं यत्किंचि ११५

क्त्यनधिकरणीभूतयावद्व्यक्तिवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वमेव कारणतावच्छेदकमेवं च कार्याव्यवहि
तपूर्वक्षणावच्छेदेन कार्यतावच्छेदकावच्छिन्नयत्किंचिद्व्यक्त्यनधिकरणीभूतयावद्व्यक्तिवृत्त्यभावप्रतियोगितावच्छे
दकधर्मवत्त्वमेव कारणतावच्छेदकमेवं च कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्यतावच्छेदकावच्छिन्नयत्किंचि
द्व्यक्त्यनधिकरणयावद्व्यक्तिषु कारणाभाववत्त्वमेव व्यभिचारः प्रकृते श्येनारपिताह शवदंतर्गततया क्रियाभावा
सत्त्वादिति चेन्न नन्वेवं यत्र हस्तक्रिया तत्ताद्वितीयक्षणे शरीरक्रिया तत्र चतुर्थक्षणे हस्ततरुसंयोगस्तस्मिन्ने
व क्षणे शरीरक्रियाजन्यशरीरपूर्वदेशसंयोगनाशस्तदुत्तरक्षणे शरीरतरुसंयोगो जायते तस्य च हस्ततरुसंयो
गजन्यत्वे शरीरक्रियाजन्यत्वे वा तत्र विनिगमनाविरहः न चोभयमेव तत्र हेतुर्जातिसंकरप्रसंगादिति चेन्न
तत्र संयोगद्वयस्यैवोपगमात् द्वित्वाग्रहस्तु सादृश्यदोषादित्येके तत्र चित्रसंयोग एवोत्पद्यते कारणत्वं तत्र संयो
गकर्मोभयत्वेनेति चित्रसंयोगो विजातीय एवेति न सांकर्यमित्यपरे इत्यन्यत्र विस्तरः एवंवादिति संयोगव
द्वित्यर्थः तेनैव कपालविभागेनैवेत्यर्थः एवं कारणाकर्मणो व्युदासः कपालस्याकाशविभागो जन्यत इति
अन्यथा कपालाकाशसंयोगस्य नाशकाभावे नित्यत्वापत्तिः एवं कपालाकाशसंयोगस्य प्रतिबंधकस्य
सत्वेनोत्तरसंयोगानुत्पत्त्या कर्मणोऽपि नित्यत्वापत्तिः उत्तरसंयोगस्यैव स्वजनककर्मनिवर्त्तकत्वादिभावः

अमुमर्थं हृदि निधायोक्तं ततउत्तरदेशसंयोगस्ततःकर्मनाश इतितेन कर्मणैवेति कपालद्वयविभा
गजनककर्मणैवेत्यर्थः देशांतरविभागः कपालाकाशादिविभागः आरंभकेत्यादि आरंभकसंयोगः
कपालद्वयसंयोगः कपालद्वयसंयोगादिस्तत्प्रतिद्वंद्वीतद्विरोधीतन्नाशक इति यावत् एवमग्रेपि अ
नारंभकसंयोगःकपालाकाशसंयोगादिः अन्यथेति आरंभकसंयोगप्रतिद्वंद्विविभागजनककर्म
णः नारंभकसंयोगप्रतिद्वंद्विविभागजनककर्मणश्चैक्यापत्तेः विकर्षादिति तत्राग्रावच्छेदेनाना
रंभकसंयोगप्रतिद्वंद्विविभागजनककर्मणः सत्वात्तेन कर्मणा मूलावच्छिन्नारंभकसंयोगविरोधि
विभागोत्पत्तिः तेन चारंभकसंयोगनाशस्तेन मनाशःस्यादिति भावः कारणविभागेनेवाकार
णमात्रविभागेनैव कपालद्वयविभागादिनेतियावत् पूर्वं घटाद्यारंभकद्रव्यनाशपूर्वं तथाच पूर्वो
क्ततनतो घटनाशस्ततःकपालाकाशविभागोजन्यत इत्यसंगतमिति भावः सतिद्रव्ये द्रव्यनाशविन
देशांतरविभागासंभवादिति अन्यथाकारणमात्रविभागकर्मलक्षणस्यतत्र नातिव्याप्तिःतस्यका
रस्तुपाकजप्रक्रियायांसप्रपंचंप्रदर्शितोस्माभिः द्वितीय इति कारणाकारणविभागजन्य इत्यर्थः याव
द्द्रव्यवकर्मनियतत्वादिति क्रियायाव्याप्यवृत्तित्वनियमादिति भावः अतएव वर्तमानायुक्तेरेव शरी ११८

रे विभक्तप्रत्ययो न स्यादिति यत्र हस्तक्रियया हस्ततरुविभागस्तत्र शरीरे विभागप्रत्ययः सर्वानु
भवसिद्धः स च विभागं विना नोपपद्यते न च शरीरतरुसंयोगनाशे योगनाशयवाद्दिष्य इति
वाच्यं विभागानङ्गीकारे शरीरतरुसंयोगनाशस्य वासंभवात् नहि तत्र हस्तक्रियातरुसंयोगना
शिकाः व्यधिकरणत्वात् तत्र हस्ततरुविभागेन शरीरतरुविभागो जन्यते तेन च शरीरतरुसंयो
गनाशो जन्यत इत्यनुपपत्तेरिति विभागसिद्धिः ननु हस्ततरुसंयोगनाश एव न शरीरसंयोग
नाशकोऽस्तु तयोरुभयस्यासामानाधिकरण्यसत्त्वात् मास्तु विभागो हस्ततरुविभागस्तु कर्मज
न्यशरीरतरुसंयोगनाशकतया सिद्धमित्यर्थवत्त्वापात्त हस्ततरुसंयोगनाशेनैव तदुपप
ते किंच हस्तक्रियैवस्वसमवायिसमवेतत्वसंबंधेन शरीरनिष्ठशरीरतरुसंयोगनाशे हेतुरस्तु
वैयधिकरण्याभावादिति चेन्न आश्रयनाशाजन्यगुणनाशस्य विरोधिगुणाजन्यत्वनियम
न शरीरतरुसंयोगं प्रति हस्ततरुसंयोगस्याकारणत्वेन च शरीरतरुसंयोगनाशे हस्ततरुसंयोगना
शस्याजनकत्वात् यद्वा तत्कर्तृक्रियैवस्वसमवायिसमवेतत्वसंबंधेन नत्र कारणत्वमिति न तदपिसा
धात्संबंधेन जनकत्वनियमस्यासति बाधके संकोचकल्पनानुपपत्तेर्वस्तुतस्तु संयोगाभावो विभा

गोविभागाभावो वा विभाग इत्यत्र विनिगमनाविरहेणोभयोरप्यतिरिक्तत्वं अत एव वचव्दादात्पदो विभक्त इति
प्रत्यय उपपद्यते संयोगनाशात्मकत्वे नाशस्य सावधिकत्वाभावेन तथाप्रत्ययानुपपत्तेरिति तदितम
मित्रेणोक्तं मनःसंयोग इत्यादि मूले मूर्त्तएवत्तु दैशिकमिति विप्रकृष्टत्वविप्रकृष्टदेशमात्रवृत्तित्वसंनिकृ
ष्टदेशमात्रवृत्तित्वबुद्धेर्निमित्तकारणस्य दिक्संयोगस्यासमवायिभावादिति भावः दैशिकपरत्वस्य
निमित्तकारणमाह बहुतरेति बहुतरसंयोगान्तरितत्वं तदेव विप्रकृष्टत्वं तद्विषयिण्यपेक्षाबुद्धिर्दै
शिकपरत्वप्रति निमित्तकारणमित्यर्थः तदल्पीयस्त्वेति अल्पसंयोगान्तरितत्वरूपसन्निकृष्टत्वविष
यिण्यपेक्षाबुद्धिर्दैशिकापरत्वं प्रति निमित्तकारणमित्यर्थः कालिकपरत्वापरत्वे जन्य एव यत्र जन्या-
पेक्षया मन्यते नित्ये तत्सत्वे त्वमत्र ज्येष्ठत्वबुद्धेः तदनन्तरोत्पन्नत्वरूपकनिष्ठत्वबुद्धेर्निमित्तकारण
स्य कालसंयोगरूपासमवायिकारणस्य चाभावादिति भावः मूले अपेक्षाबुद्धिनाशेनेति स्वनि
मित्तकारणविप्रकृष्टत्वादिबुद्धिनाशेनेत्यर्थः तुल्याः पुनर्बहुतरसंयोगान्तरितत्वरूपविप्रकृष्ट
त्वाल्पतरसंयोगान्तरितत्वरूपसन्निकृष्टत्वाभ्यां दैशिकपरत्वादिव्यवहारस्य बहुतरस्पन्दान्तरित
जन्यत्वरूपकनिष्ठत्वाभ्यां कालिकपरत्वादिव्यवहारस्योपपत्तेर्नतयोर्गुणान्तरत्वं यत्रचयकालेज्ये

ष्टत्वबुद्धिरूप्यत्वेनेतत्कालमात्रायसंदस्मनाद्यिकतावसेया अतो नैकतिष्ठेधिकजीविनिपरत्वव्यवहारापय
त्तिरिवदेति तदभाववतीति इदं च प्रमायामतिव्याप्तिवारणाय यत्तदभाववद्विशेष्यकत्वे तदभावप्रकारकप्रमा
यामतिव्याप्तिवारणाय तत्प्रकारकमिति इच्छायामतिव्याप्तिवारणाय ज्ञानमिति तदभावाप्रकारकमि
ति संशयेऽव्याप्तिवारणाय अत्र च तद्विशेष्यकतावच्छिन्नतदभावप्रकारकत्वाभावस्तद्विशेष्यकताव
च्छिन्नतत्प्रकारकत्ववज्ज्ञानत्वेन च तन्निश्चयत्वमवसेयं ननु यथा पर्वतो महानसं वह्निमत् न वा पर्वतो व
ह्निमान् निर्महानसपर्वतो वह्निरिति संशयत्वानापत्तेः ज्ञानपदं चेच्छायामतिव्याप्तिवारणाय एकधर्मिकेति
हृदपर्वतो वह्नितदभाववान्वेति ज्ञानेऽतिव्याप्तिवारणायैकधर्मिकेति एकधर्मिताच्छेदकविशिष्ट
विशेष्यकतावच्छिन्नेत्यर्थः तेन पर्वतो वह्निमान्न वा वह्न्यभाववानिति ज्ञानस्य संग्रहः हृदत्वादियोगवा
न्तदभाववांश्चेति समुच्चयवारणाय विरुद्धेति विरोधावगाहित्वं तदर्थः घटो द्रव्यं पृथिवी चेति ज्ञान
वारणाय विरुद्धेति विरोधावगाहित्वं तदर्थः घटो द्रव्यं पृथिवी चेति ज्ञानवारणाय भावाभावेति इच्छाबु
हासार्थे विशेष्यभागः वस्तुतस्तु एकधर्मावच्छिन्नविशेषकत्वनिवेशे विभिन्नद्वये नैकधर्मेताव
च्छेदकज्ञानस्य संशयत्वापत्तिः एकधर्मावच्छिन्नविशेष्यतावच्छेदकताकत्वनिवेशे च निरवच्छिन्न

मुक्ती॰ ११८ 118

विशेष्यतावच्छेदकताकसंशयास्वेग्रहप्रसंगः विभिन्नरूपेणाधर्मितावच्छेदकतावच्छेदकावगाहिज्ञान
स्य संशयत्वप्रसंगश्चेति स्वीयैककोटिप्रकारकतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेद
कीभूतापरकोटिप्रकारताशालिज्ञानत्वं संशयत्वमिति ध्येयं यत्तु संशयत्वं जातिविशेष इति तन्न चा
क्षुषत्वादिना सङ्करप्रसंगात् संदिग्ध इति क्रियायां संदेहत्वान्मवतीत्यर्थः एवमग्रेऽपि समानानेकधर्मो
पपत्तेर्विप्रतिपत्तेरित्यादिसूत्रेऽपि विप्रतिपत्तिवाक्यजन्यशाब्दसंशयस्योक्तत्वात् साधारणधर्मज्ञानजन्य
संशयवद्विप्रतिपत्तिवाक्यजन्यस्तृतीयोऽपि संशय इति मतनिरासाय आह विप्रतिपत्तिरिति व्याप्तिज्ञाना
दीनामित्यादिनाऽतिदेशवाक्यार्थज्ञानपरिग्रहः ननु तर्हि सूत्रमस्य पंचम्यनुपपत्तिरित्यत आह किं
त्विति तथाच सूत्रस्य पंचमीप्रयोजकतायामिति भावः एवं ज्ञानप्रामाण्यसंशयाद्विशयसंशय इ
त्वत्र प्रामाण्यं यदमप्रामाण्यं स्यात् युक्तं तेन प्रामाण्यसंशयस्याप्रामाण्यसंशयस्य च विषयसं
देहे स्वातन्त्र्येणाहेतुत्वमिति भावः एवं व्याप्येति अथ व्याप्यसंशयस्य व्यापकसंशयहेतुत्वे किं मानं
कोटिस्मरणादिनैव तत्सम्भवात् क्वचिदनुविधानस्य तु व्याप्यतदभावयोर्व्यापकतदभावस्मारकत्वेन च
घसंग्रहीतत्वेन तत्स्मरणायैवायत्तीणानादग्रहहेतुव्याप्यसंशयव्यापकसंशयस्याप्यभावादिति चेदत्राह: ११८

महानसे हुताशनो न जलह्रदे इति स्मरणात् एवं नादिकमपि विपक्षपतितो धूमादि संशय भावाभावयोर्हुताशनेन संश
यभावाभावदर्शनात् तस्यापि तद्धेतुत्वं अत एवोक्तं द्विकोटिव्याप्यसंशय भावाभावदर्शनात् तस्यापि तद्धेतुत्वं
अत एवोक्तं द्विकोटिकव्याप्यसंशयाद्व्यापकस्याप्युक्तद्विकोटिकः संशयः कारणोत्कर्षे सैव कार्योत्कर्षा
त् न चैतद्भगवत्सूत्रकृदनभिमतमिति वाच्यं सूत्रस्थचकारस्योक्तसमुच्चयकत्वात् तथा हि समाना
नेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय इति सूत्रं तत्रा
चार्यमाकृतं भाष्यकृन्मुखोः समानधर्मः कोटिद्वयसहचरितधर्मः अनेकस्मात् सपक्षविपक्षाद्व्यावृत्तो
धर्मः अनेकधर्मः तयोरुपपत्तिर्ज्ञानं तस्माद्विप्रतिपत्तिर्विरुद्धकोटिप्रतिपादकं वाक्यं तस्मात् इत्यत्र पंचम्याः
प्रयोजकत्वमर्थो न हेतुत्वं उपलब्धेः प्रामाण्य अनुपलब्धेः प्रामाण्यविरोधिभ्रमत्वं तयोरव्यवस्था संश
यः एवं च प्रामाण्यसंशयजन्यो भ्रमत्वसंशयजन्यश्च विषयसंशयश्चकारो व्याप्यसंदेहाद्धि जन्यव्याप
कसंदेहादेः संग्रहकः विशेषापेक्षो विमर्शः इति तु लक्षणं एकधर्मिकभावाभावप्रकारकत्वरूपवि
शेषवान् विमर्शो ज्ञानमिति तदर्थः इत्याहुः किं त्वित्यादिना साधनाव्यापकव्याप्यत्वसंदेहाद्धि साधना
व्यापकत्वसंदेहो बोध्यः साधारणज्ञानादेः कार्यत्वावच्छेदके चाव्यवहितोत्तरत्वं देयं तेन परासार

मु·टी·
११९
119

नव्यभिचारः ननु साधारणज्ञानादेरिव धर्मिज्ञानस्यापि संशयहेतुत्वान्न्यूनता संशयविभागः कथं
न प्रदर्शित इत्यत आह संशये धर्मिज्ञानमिति संशये संशयमात्रे तथा च धर्मिज्ञानजन्यतावच्छेदक
स्य संशयत्वस्य समव्याप्तत्वान्न तद्विभाजकतावच्छेदकमिति भावः ननु धर्मिज्ञानस्य संदेहहेतुत्वमात्र
भावः न च धर्मिज्ञानमन्तरेण संशयः स्यादिति वाच्यं सति धर्मीन्द्रियसन्निकर्षे द्रष्टत्वादित्यत आह धर्मी
न्द्रियेति पित्तादीनां पित्तादीनामादिना मण्डूकवसाञ्जनादेः परिग्रहः अनुमानसिद्धत्वमेव दर्शयति यद्ये
ति भगवज्ज्ञाने व्यभिचारवारणाय हेतौ जन्येति अर्थान्तरं निराकुरुते न चेति ननु पित्तात्मकदोष
भावः स्वत्वप्रमायामेककारणं न शंखत्वप्रमायामत आह विनिगमनाविरहादिति प्रमायां दो
षाभावः कारणं गुणो वा कारणमित्यत्र विनिगमनाविरहादिति भावः वस्तुतो गुणहेतुतायामे
वलाघवं विनिगमकमस्तीत्याह अनन्तेति न्यायत्वादिति अनुगतगुणस्याग्रे वक्ष्यमाणत्वानन्तहेतु
त्वमतोऽयं दोष इति भावः तथा च दोषाभावानां हेतुत्वस्यावश्यकत्वे च गुणस्यापीति न तथा च पित्ता
दोषाभावसत्त्वेऽपि विशेषणवद्विशेष्यसन्निकर्षरूपगुणाभावान्न शंखे पीतप्रमेति दोषाभावेन न
गुणस्यान्यथासिद्धिरिति भावः एवं एवं सति अन्वयव्यतिरेकसत्त्वेऽपि यदन्यथासिद्धत्वं तदेस्पष्टः गुण

भावः गुणाभाव एव ननु दोषः कारणं स्यादिति भावः एवमग्रेपीति ध्येयमित्याशंकामाह यत्र ज्ञानं शाब्दबो
धे योग्यताया स्तात्पर्यस्य वा प्रमैव गुण इति भावः ननु नैवं रंगरजतयोरिमे रजतरंगे इति ज्ञानेतिव्याप्ति
रत आह तद्विशेष्यकत्वेसतीति तद्धर्मविशेष्यकत्वावच्छिन्नतत्प्रकारकत्ववज्ज्ञानमित्यर्थः सति सप्त
म्याश्रवाच्छिन्नार्थकत्वात् तत्प्रकारकेप्यंशे निव्याप्तेस्तद्विशेष्यकेति रजतत्ववद्व्याप्तिमितिज्ञाने र-
जतत्वप्रमात्वापत्तिरतस्तत्प्रकारकेति ज्ञानपदं च तथाविधेच्छायामतिव्याप्तिवारणाय एवं सति
तत्प्रकारकत्वस्य प्रमात्वघटकत्वेसति भ्रमः प्रमा न स्यादिति लक्षणद्वयस्य तत्र सत्वादिति भा
वः नन्वेवं लक्षणाननुगमश्चेत्यत आह लक्षस्येति अथ पाकरक्ते घटे श्यामरूपवत्ताप्रतीतेः प्रमा
त्वं स्यादिति चेदिष्टमेवैतत् घटस्य कदाचिच्छ्यामत्वाद्धर्ममात्रस्य प्रमाताघटकत्वात् अत्र यद्यपि
स्मृत्यन्यज्ञानत्वरूपानुभवत्वस्य निवेशो वैयर्थ्यात् ज्ञानत्वघटितमेव प्रमात्वं स्ववचं तथापि तस्य
स्मृतिसाधारणतया तत्कारणस्य प्रमाकारणत्वतापत्त्या शाब्दे प्रमाणव्यवहारोपि किं रूपमनु
भवत्वघटितमेवानुमन्यते तांत्रिकाः वस्तुतस्तु विशिष्टवैशिष्ट्यानुभवे विशेषणतावच्छेद
कप्रकारकनिर्णयस्य कारणतया तज्जन्यतावच्छेदककोटिप्रविष्टतयाऽनुभवत्वस्य जातिविशेष

मु॰टी॰
११६
120

नेष्टिंद्वज्ञानत्वस्यानभ्यवत्वघटत्वाज्ञानुभवत्वस्यैववैयर्थ्यमितिकृतं पल्लवितेन प्रामाण्यं न स्वतोग्रा
ह्यमिति मूलेन स्वतोग्राह्यत्वं निषिध्यते तत्र स्वतस्त्ववादिनः कइत्याकांक्षायामाह मीमांसकाहि
ति स्वप्रकाशकत्वादिति स्वविषयकत्वादित्यर्थः तेनैव गृह्यत इति ज्ञानेगृह्यमाणे तन्निष्ठज्ञानत्वा
दिधर्मवत्तन्निष्ठप्रामाण्यस्यापि ग्रहे बाधकाभावात्तस्मात्सर्वं ज्ञानमयं घटोघटमहंजानामी
त्याद्याकारकमिति भावः तथाचेति अयमत्रानुमानप्रकारः इयंज्ञानतात्वात् यायद्वृतिर्य
त्प्रकारिकज्ञानतासमानाद्विष्यकत्वप्रकारकज्ञानसाध्यायथाच घटेघटत्वप्रकारिकाज्ञानते अनु
व्यवसायेनेति ननु ज्ञानस्य विषयाविषयकत्वात्कथं विषयघटितं प्रामाण्यं तस्य विषयइत्यतो
ज्ञानं ज्ञानस्य विषयविषयकत्वेप्रमाणमाह विषयनिरूप्यमिति विषयाविषयकप्रत्यक्षाविषय
इत्यर्थः ज्ञानवित्तिवेद्योविषयइति विषयविषयकतानियतस्वविषयकतानियतस्वविषयक
ताकप्रत्यक्षत्वकंज्ञानमित्यर्थः अतःसाध्यहेत्वोर्नवैयधिकरण्यं तथाचज्ञानेविषयतानियतस्व
विषयकताकप्रत्यक्षत्वकं विषयाविषयककप्रत्यक्षाविषयत्वेसतिप्रत्यक्षविषयत्वादित्यनुमाने
ज्ञानप्रत्यक्षस्य विषयकत्वेप्रमाणमितिभावः भट्टमतेच प्रत्यक्षस्यानाभिषिक्ताज्ञाततालिंग ११६

कानुमितिरेववोध्येत्यन्यत्रविस्तरः अनभ्यासदशापन्नेति अनवधृतप्रामाण्यकसजातीयेत्यर्थः जा
तमेव निश्चितमेव गंधवतीति व्यापिवति व्यापकप्रकारकत्वव्यापकवति व्यापकप्रकारकत्व
व्याप्यत्वादितिभावः ननुकथंतर्हि प्रामाण्यस्यानुमेयता गंधवति पृथिवीत्वप्रकारकत्वकत्व
स्येव पृथिवीत्ववति पृथिवीत्वप्रकारकत्वादेरपि प्रत्यक्षत्वसंभवात् तत्राह तत्प्रकारकत्वेति संशया
नुरोधादिति यद्यपिज्ञाने प्रमाण्य निश्चयो धर्मितावच्छेदकसामानाधिकरण्येन प्रामाण्याभावा
वगाहीधर्मितावच्छेदकावच्छेदेन प्रामाण्यावगाही तत्कथं संशयानुपपत्तिः तथापि प्रवृत्त्युपयु
क्तस्यधर्मितावच्छेदकावच्छेदेन प्रामाण्यग्रहस्य स्वतस्त्वे संशयानुपपत्तिरीक्षणामितिध्येनचप्र
माण्यग्राहकसामग्रीसत्वात्कथमग्रिमसंशयानुरोधेन प्रामाण्याग्रहइतिवाच्यं तत्राग्रिमसं
शयानुरोधेन संशयजनकदोषस्य प्रामाण्यनिश्चयप्रतिबंधकत्वकल्पनादित्याशयात् ननु
यदि प्रामाण्यमनुमेयं तदा प्रामाण्यग्रहवैयर्थ्यं तथाहि अयं पुरुष इतिनिश्चये प्रामाण्यसंदेहेना
पि संदेहस्यापि पुरुषानवगाहाकारकस्योत्पत्त्या पुरुषार्थिनः प्रवृत्तिनसंभवति तत्र प्रामाण्य
निश्चये च तत्संशयाधीनो यः संदेहइति प्रामाण्यग्रहस्य प्रवृत्तावनुपयोगः प्रामाण्यग्रहस्या

मु·टी·
१२१

नुमित्यात्मकत्वे च प्रामाण्यानुमायककराद्दिमति पुरुषत्वक्रकलरणानादिरूपहेत्वग्रहे तत्तद्घटकत्व
या पुरोवर्तिनि पुरुषत्वव्याप्यकराद्दिग्रहस्याविरूपकतया नेनैवायं पुरुषो नेवतिमे देहप्रतिबंध
संभवाद्दले प्रामाण्यानुमानेनेति चेन्न कराद्दौ पुरुषत्वव्याप्यत्वग्रहं विनापि कराद्दिमति पुरुष
त्वप्रकारकत्वहेतो पुरुषत्वघटितप्रामाण्यव्याप्यत्वग्रहसंभवेन प्रामाण्यानुमानसंभवात् य
त्वन्यायमते अनुमितेरिवहितीयानुव्यवसायस्यापि प्रामाण्यग्राहकत्वमित्यन्यत्र विस्तरः। पुरुषः। प्रा
कतेनाविति वाच्यमिति अन्यथाख्यातेरभावाद्दितिभावः भ्रमजन्येति न्यायनये भ्रमजन्या प्रवृ
त्तिस्तु एवमतेन स्याद्दित्यर्थः भ्रमस्यान्यथाख्यातेः तत्र रंगगोचरविसंवादि रजतार्थि प्रवृत्तौ रंग
ते इदं रजतमिति ज्ञानकाले रजतभेदाग्रहस्य तत्राद्दि संवादिप्रवृत्यायातित्वात्कारणाय दोषाधीनत्वे
त्युक्त न्यायनये दोषाधीनरजतभ्रमस्यानाभिषिक्त रजतभेदाग्रहस्यैव तत्र नेदोषाधीनत्वा
रजते रजतभेदाग्रहस्य दोषानधीनत्वाद्दितिभावः यत्र रंगगोचरमिदं रजतवद्भूतलमिति ज्ञा
नेन तत्र विसंवादिता हृश्यप्रवृत्तिवारणाय स्वनं त्रोपस्थितेति रजतविषयेण मुख्यविशेष्यतया द
पास्थितत्वं तद्दर्थः वस्तुतो रंगगोचररजतवद्भूमिति ज्ञानादपि प्रवृत्तिरिष्टैवेति स्वतंत्रोपस्थि १२०

ननं नदैयमितिध्येयं हेतुत्वादिति न्यायनये पीदं रजतमिति भ्रमहेतुतया रजतभेदाग्रहस्य तत्रावश्य
कल्पनीयस्यैव हेतुत्वं युक्तं न तु हेतोरिति न्यादिति भावः कार्यकारणभावद्वयकल्पनापेक्षया लाघवादाह अस्तु
वेति तत्रापि सत्यरजतगोचरप्रवृत्तावपि अपि नारंगगोचरप्रवृत्तिपरिग्रहः रजतभेदाग्रहः रजतभे
दासंसर्गाग्रहाभावः यथास्थितरजतेनेदं रजतमितिग्रहेपि प्रवृत्त्यापत्तेः प्राभाकरमते तत्र जलभेद
ग्रहाभावस्य सत्त्वात् अन्यथाऽन्यथाख्यात्यापत्तेरिति यद्यपि पुरोवर्तिविशेष्यरजतभेदासंसर्ग
ग्रहस्य समवायेनाभावो विशेषणतयाऽस्मन्निष्ठः प्रतिवंधकस्तदभावः कारणमिति फलितं तत्
थाचरंगेनेदं रजतमितिग्रहेपि प्रवृत्त्यापत्तिः रंगविशेष्यकरजतभेदासंसर्गग्रहस्यान्यथाख्यात्य
नंगीकर्तृमते अप्रसिद्धत्वेन तदभावस्य प्रतिवंधकतासंभवात् तथा विषयतासंबंधेन प्रवृत्तिं प्रति
रजतभेदासंसर्गग्रहस्य विशेष्यतासंबंधावच्छिन्नतथापि विषयतासंबंधेन प्रवृत्तिं प्रति रजत
भेदासंसर्गग्रहस्य विशेष्यतासंबंधावच्छिन्नप्रतियोगिताकोऽभावः सविशेषणतासंबंधेन
प्रतिवंधक इति विषयनिष्ठतया प्रतिवध्यप्रतिवंधककनानात्वदोषः एवं च तन्निरूपणीयत्वे प्र
तिवध्यप्रतिवंधकत्वयोरवच्छेदः ककोटौ निवेशनीयमतो न उक्तरूपभेदमादाय दोषः न चैवं रंगे

मु॰टी॰ इदं रजतमिति भ्रमानन्तरं तत्र प्रवृत्तिर्न स्यात् रजतभेदासंसर्गाग्रहस्यान्यथाख्यात्यापत्त्यातत्रानुगी
१२२ कारेणानदभावस्य प्रतिबंधकस्य सत्त्वादिति वाच्यं रजतभेदो यावत्स्थिति विशिष्टस्यैव रजतभेदासंसर्गा
ग्रहस्य प्रतिबंधकत्वोपगमात् न चैवमपि रंगे इदं रजतं च दोनरजतमिति ज्ञानानंतरमप्रवृत्त्याप
122 त्तिरिति वाच्यं रजतभेदाग्रहप्रतिबंधकदोषस्योत्तेजकत्वकल्पना तत्र रंगे रजतभेदग्रहानुत्पत्त्यात
त्प्रतिबंधकदोषस्य स्वीकारणीयत्वात् न च रंगे रजतभ्रमजनकदोषस्यैवोत्तेजकोस्तु किं रजतभेद
ग्रहप्रतिबंधकदोषस्योत्तेजकत्वस्वीकारेण एवं च रजतभेदो यावत्स्थितिविशिष्टामपि प्रतिबंधके विशेष
णं न देयं रजतभेदानुयावत्स्थितिकाले रंगे इदं रजतमिति ज्ञानादप्रवृत्तिप्रसंगाभावात्तत्र रजतभेदा
संसर्गाग्रहस्य प्रतिबंधकस्य रंगे रजतभ्रमजनकदोषद्वयोत्तेजकविशिष्टत्वादिति वाच्यं रंगे इदं
रजतमिति भ्रमस्यान्यायमतासिद्धस्य तन्मते अभावेन तत्र तादृशदोषस्यानंगीकारात् संभवति
त्यनंतरं येन विसंवादिप्रवृत्तौ तद्धेतुत्वं स्यादिति परणीय सन्निकर्षस्याभावादिति ज्ञानलक्षणायाः
प्रत्यासत्त्या सत्यं तत्स्य कल्पने गौरवं दोषद्दृष्टमित्यभिमानः हेतुतायाश्च स्यानुपपत्त्यतिरेकाभ्या
मिति शेषः अन्यत्रापि रंगगोचररजतार्थिप्रवृत्त्यावपितत्कनात् विशिष्टज्ञानहेतुत्वस्य कल्पनात् १२२

नचानुमानाभाव इति वाच्यं रंगे रजतार्थिप्रवृत्तिविषयविशिष्टज्ञानसाधारणप्रवृत्तिवदितरानुमानस्यैव
मानत्वात् अत्राप्रयोजकतामाशंकते नचेति लाघवेनेति संवादिविसंवादिभेदेन कार्यकारणभा
वद्वयमपेक्ष्य प्रवृत्तिमात्रे विशिष्टज्ञानस्यैव हेतुत्वकल्पना लाघवेनेत्यर्थः तथा च लाघवज्ञान
रूपानुकूलतर्कस्य सत्त्वान्नाप्रयोजकत्वमिति भावः रजतांशे सन्निकर्षाभावान्नान्यथाख्यातिस
भवतीति ग्राभाकरोक्तं दूषणमुद्धरति इत्यं चेति प्रवृत्तिमात्रे विशिष्टबुद्धेर्हेतुत्वसिद्धौ चेत्यर्थः
फलमुखेति कार्यकारणभावग्रहात्मकफलात्पूर्वं गौरवस्यानिर्णयत्वाद्गौरवस्य संदेहस्याप्रतिबं
धकत्वादिति भावः ननु संवादिविवादिप्रवृत्तिसाधारणप्रवृत्तित्वावच्छिन्नं प्रत्येव भेदाग्रहः
कारणमिति न कार्यकारणभावद्वयकल्पनागौरवं न च विशिष्टज्ञानत्वापेक्षया इष्टभेदग्रहा
भावत्वस्य कारणतावच्छेदकत्वे गौरवं न च विशिष्टज्ञानत्वापेक्षया इष्टभेदग्रहाभावत्वस्य कार
णतावच्छेदकत्वे गौरवमिति वाच्यं रजतत्वविशिष्टानुमित्यादौ रजतत्वभेदाग्रहत्वेन कारणत्वे
तत्रैव प्रवृत्तिसाधारणरजतत्वविशिष्टविषयकत्वस्यैव कार्यतावच्छेदकत्वकल्पनेनैव निर्वा
हात् न्यायनयेतु प्रवृत्तित्वावच्छिन्नं प्रति विशिष्टज्ञानहेतुत्वेन हेतुत्वान्तरकल्पनेनैव निर्वाहात्

म॰टी॰ गौरवमिति न तदनुरोधेन कल्पनीयम्भ्रमात्मकरजतज्ञानार्थं ज्ञानलक्षणप्रत्यासत्त्यादर इति का
१२१ रणबाधाद्बाधितमेव मिथ्याज्ञानमित्याशंकां मनसि निधाय स्थूलविशेषेकारणबाधाभावा
173 दनिवार्यमेव मिथ्याज्ञानमित्याशंकां मनसि निधाय स्थूलविशेषेकारबाधाभावादनिवार्यमे
व मिथ्याज्ञानमित्याह किंचेत्यादिना यत्र रजते न रजतभेदग्रहो न वा रंगे रजतभेदग्रहस्तत्र सति
युगपदिंद्रियसन्निकर्षे रजतरंगयोरिति मे रजतं रंगे इति ज्ञानेन किमपि बाधकं रजतत्वेन सं
संसंयुक्तसमवायस्य सत्वात् तादृशं च ज्ञानं रंगांशेन प्रमात्मकं विशेषणविशेष्यसन्निकर्षा
द्यप्रमात्मासामग्र्यभावात् किंचान्यथाख्यातिरेवेति भावः ननु तत्तद्विशेष्यतत्तद्विशिष्टबुद्धिं
प्रति तत्तद्विशेषणतत्तद्विशेष्यघटितसन्निकर्षो हेतुरन्यथातिप्रसंगात् तथा च कथं रजत
घटितसंयुक्तसमवायेन रंगे रजतत्वग्रह इत्यत आह अपि चेति अन्यथाख्यातिभयादित्यनेन तु रं
गे रंगभेदाग्रहस्य रजते रजतभेदाग्रहस्येति सूचितस्य सत्वादित्यनेनान्वयः अनेन रंगे निष्टभे
दाग्रहरूपानिवृत्तिसामग्री रजते इष्टभेदाग्रहरूपानिवृत्तिसामग्री रजते इष्टभेदाग्रहरूपा
प्रवृत्तिसामग्री प्रदर्शिता रंगे रजभेदाग्रहस्येत्यादिना च रंगे इष्टभेदाग्रहरूपाप्रवृत्तिसामग्री १२१

रजतेनिष्टभेदाग्रहजन्यानिवृत्तिसामग्रीच प्रदर्शिता दोषादेवेति तन्मतेन्यायमतेभ्रमस्थानाभिषिक्तवि
क्तभेदाग्रहहेतुत्वादितिभावः इदं चेष्टभेदाग्रहप्रवृत्तिकारणमनिष्टभेदाग्रहजन्यानिवृत्तिसामग्रीचप्रद
र्शिता दोषादेवेति तन्मतेन्यायमतेभ्रमस्थानाभिषिक्तभेदाग्रहं प्रतिदोषस्यहेतुत्वादितिभावः
इदं चेष्टभेदाग्रहप्रवृत्तिकारणमनिष्टभेदाग्रहोनिवृत्तिकारणमिति यथाश्रुताभिप्रायेणेष्ट
भेदोपस्थितिविशिष्टेष्टभेदासंसर्गाग्रहः प्रतिबंधकस्तदभावः कारणमितितन्निष्कर्षस्तुरजतभे
दासंसर्गाग्रहस्यप्रतिबंधकस्यरंगेभावादितिशिन्यासामग्रीबोध्या ननुरंगेरजतभेदाग्रहप्रयोज
कदोषस्यप्रतिबंधकत्वान्नरंगेनिवृत्तिः एवंरजतभेदासंसर्गाग्रहप्रयोजकदोषस्यप्रतिबंधक
त्वान्नरजतेप्रवृत्तिरितिकथंफलप्रवृत्तिनिवृत्त्योरापादनमित्यतआह किंचेति भेदाग्रहस्यव्य
यवच्छेदाग्रहस्य अनुमितिनिरावाधेतिमतिबाधाभावेऽन्यथाख्यातिरूपानुमितिनिरावाधेत्यर्थः
आपतितमिति अन्यथाख्यातिरूपामापतितमित्यर्थः ननुग्रहहृदेवह्निव्याप्यधूमवदवच्छेदाग्रहान्न
ह्रदोवह्निमानित्यन्यथाख्यातिरूपानुमितिः परंतुगृहीतासंसर्गकज्ञानद्वयमेवोत्पद्यते नच
तत्रविशिष्टज्ञानोत्पत्तौबाधकाभावः व्याप्यवच्छेदाग्रहस्यह्रदोवह्निमानित्यन्यथाख्यातिरूपा

मु॰टी॰ नुमितिकारणस्यसत्वादितिवाच्यं अन्यथाख्यातौप्रमाणाभावेनतादृशकार्यकारणभावस्याक
१२५ ल्पनादतस्तत्रप्रमाणंदर्शयति इत्थंचेति यद्वाननुमितिंप्रतिविशिष्टज्ञानस्यैवहेतुत्वं यत्रच
नतादृशविशिष्टबोधसामग्रीतत्रलिंगांशसंसर्गाग्रहाल्लिंग्यंशसंसर्गाग्रहस्यैवपरैरुपगमान्नायः
पिंडेवस्तुत्वानुमित्यनुरोधादन्यथाख्यातिरित्यत आह इत्थंचेति चकारोप्यर्थे ननुतादृशानुम
वसायोनेदंविशेष्यकज्ञानेरजतत्वप्रकारकत्वविशिष्टरूपः परंतुरजतत्वप्रकारकत्वासंसर्गा
ग्रहरूपएवेत्यत आह सत्येपीति विद्यमानेपिभेदग्रहे आहार्यमन्यत्रोत्पादादिच्छायाउत्तेजकत्वंवाच्यं
इच्छानामुत्तेजकतानुरोधेनचानुमित्यादीनामेवकार्यतावच्छेदकत्वात् प्रवृत्तित्वावच्छिन्नंप्रति
भेदग्रहाभावत्वेनपृथक्कारणत्वेगौरवाद्यथाविशिष्टज्ञानत्वेनैवान्यत्रहेतुताकल्पनीयेतिविसंवा
दिप्रवृत्त्यनुरोधेनान्यथाख्यातिर्दुर्वारैवेतिभावः ननुप्रामाण्यमनुमानगम्यंतदाभवेद्यद्यनु
मानप्रमाणेनभवेत्तदेवनभवतीति व्याप्तिग्राहकाभावेनाज्ञानादित्यतः प्रामाण्यानुमितिप्रयोज
कत्वव्यभिचारस्याग्रहोथसहदर्शनेति मूलेनव्याप्तिग्रहोपायोदर्श्यते सचायुक्तः[illegible]कारणीभू
तव्याप्तिग्रहोदर्श्यते सचायुक्तःस्वकारणीभूतव्याप्तिस्वरूपज्ञानाभावादित्यत आह सर्वैर्व्याप्तिरु १२५

क्वेति व्यभिचारग्रहस्य व्याप्तिग्राहकतामुपपादयति व्यभिचारग्रहस्येति सहचारग्रहस्य तामुपपाद-
यति व्यभिचारग्रहस्येति सहचारग्रहस्य तामुपपादयति एवमिति भूयोदर्शनस्योपकारकत्वं खण्डयति
भूयोदर्शनेनेति व्यतिरेकव्यभिचारमाह सकृद्दर्शनेऽपीति भूयोदर्शनस्याहेतुत्वेऽपि कथंचिदुपयो-
गकतया तदादरइत्याह क्वचिदिति तर्कोपेक्षित इति शंकायां नार्थं तर्कोपेक्षित इत्यर्थः तद्दर्शयति
तथाहीत्यादिना यद्ययमिति अयंधूमवान्पर्वतः कारणं विनोति तथा च धूमो वह्निव्यभिचारी
स्याद्वह्निजन्यो न स्यादिति तर्काकारो बोध्यः यथा श्रुते वह्निमान्न स्याद्धूमवान्न स्यादिति तर्कस्य वि-
षयविशोधकस्य व्याप्तिग्रहानौपयिकतयाऽसंगतेः तत्रापि तादृशतर्ककारणीभूतकार्यकार-
णभावग्रहेऽपि आशंका भवेत् आशंकाप्रतिबंधिका भवेत् व्याख्यानमेव दर्शयति यद्धीत्या-
दिना ननु तर्कप्रमापाद्यव्याप्यापादकवत्ताज्ञानं कारणं न तु व्याप्तिज्ञानप्रतिबंधकव्यभिचार-
शंकानिवर्तकस्तर्कोपेक्षितः एवमग्रेऽपीत्यनवस्थेत्यत आह यत्रेति स्वत एव शंकासामग्रीविर-
हात् तर्कोपेक्षानन्तरमेतानानवस्थेति शेषः ननु तर्कस्य व्यभिचारशंकानिवर्तकत्वे तर्क-
कारणीभूतव्याप्तिज्ञाने नैव निवृत्तेः संभवादिति चेदत्र केचित् अनाहार्यज्ञानशंकायाः तर्का

मु॰टी॰
१२५
125

रणीभूतव्याप्तिज्ञानेन निरासंभवेप्याहार्यशंकायास्ततो निवृत्तिर्न्न संभवति आहार्यज्ञानस्य तद
प्रतिबध्यत्वात् तथाहि अनिष्टप्रसंगजनात्मकेन तर्केणापादकज्ञाने आपाद्यज्ञानरूपानिष्टसाध
नत्वज्ञानजननद्वारा आपादकज्ञाने इच्छाप्रतिबंधः क्रियते एवं चेच्छारूपकारणविरहादेवना
हार्यशंकोत्पत्तिरित्यर्थः वशसंपन्नमेव तर्कोत्तन्निवर्त्तकत्वमिति केचित्तु तर्कस्य शंकानिवर्त्तक
त्वं व्याप्तिज्ञानकारणीभूतो यो व्यभिचारशंकाविरहस्तत्संपादकत्वं एवं व्यभिचारशंकाप्रति
बंधकतया तर्कस्योत्तेजकतयाऽत्तेजकभावविशिष्टव्यभिचारसंशयविरहसंपादकत्वं तस्यैव
तर्कस्येत्याहुः परे तु तदापादकच्छापत्तिं विनाहार्यानाहार्यसाधारणतद्विशिष्टबुद्धित्वावच्छिन्नं
प्रतिबंधकतया तर्कस्य व्यभिचारशंकानिवर्त्तकत्वमित्याहुः तर्कस्याहार्यत्वेप्यविशेषः तत्वे च मा
नसत्वव्याप्योजाविशेषस्तर्कमायादयामीत्यनुभवाज्जिज्ञासाविशेषनिवर्त्तकयावास्सिद्ध इति तर्क
स्य द्विविधः विशेषपरिशोधको व्याप्तिग्राहकश्चेति तत्र विषयपरिशोधको निर्वह्निः स्यान्निर्धूमः
स्यादित्यादिः धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादित्यादिस्तु व्याप्तिग्राहकः विस्तरस्त्व
न्यत्रासंधेयः इदानीं व्याप्तिग्रहोपायनिरूपणानंतरं व्याप्तिनिश्चयाभावप्रयोजकव्यभिचारनिर्ण

यत्कारणज्ञानविषयत्वेनोपाधेः स्मरणमिति तथा च प्रसंगसंगत्योपाधिनिरूपणमिति भावः सिद्धि
विषयत्वनिरूपसाध्यत्वस्य सिद्धित्वनिरूपसाधनत्वं चासिद्धित्वनिरूपसाधनत्वस्य च संगोपाधावभावादभिमतेति
योयद्यावद्वृत्तित्वव्यापकत्वे सतीति यद्वृत्तित्वाव्यापकः स तद्वृत्तित्वसाध्यकतद्वृत्तित्वं हेतावु
पाधिरित्यर्थः यथाश्रुते भिमानस्य विशेषणत्वे यत्र न दत्ताभिमानस्तत्राव्याप्तिः स्यात् यद्वृत्ति
त्वविवक्षणाद्गुणकर्मान्यत्वविशिष्टसत्तावान् जातिमत्वादित्यादौ संयोगिगुणकर्मान्य
त्वविशिष्टसत्वादित्यादौ नाव्याप्तिर्व्याप्तिव्याप्यकत्वाव्यापकत्वे एवं प्रकारेण कसंबंधेन च वि
वक्षितेनेन द्रव्यत्वेन समवायसंबंधेन च वह्निं प्रत्यव्यापकस्य द्रव्यत्वस्य सिद्धित्वादित्वा संयोगादि
संबंधेन च धूपं प्रत्यव्यापकत्वेऽपि वह्निमान् धूमादित्यत्र द्रव्यत्वादौ नातिव्याप्तिः स च श्यामद्
ति काकश्यामो मित्रातनयत्वादित्यादावित्यर्थः तेनैव वक्ष्यमाणेनेन्धसंयोगविनाशिजन्यत्वादि
मैनुनननयोनहत्त्वं श्रमस्य साधनावच्छिन्नसाध्यव्यापकत्वादग्निमस्य साधनत्वयत्वधर्मा
वच्छिन्नसाध्यव्यापकत्वात्साध्यव्यापकत्वभावमनुयादयति श्यामत्वस्येति ननु साधना
वच्छिन्नसाध्यव्यापकत्वं विवक्षणीयमतो नोक्ताव्याप्तिरतः पक्षधर्मावच्छिन्नसाध्यव्या

मु॰टी॰ पक्षोपाधावव्याप्तिमाह एवं वायुरिति अत्र प्रत्यक्षत्वमनुद्भूतरूपस्याव्यापकत्वेन रूपसमनियतत्वमव्यापक
१२८ त्वमित्यनुद्भूतरूपद्रव्यघटितत्वाद्युपाधेः साध्याव्यापकत्वे कार्यकारणभावलक्षणानुकूलतर्कप्रदर्शना
नार्थत्वदिति ध्येयं पक्षधर्मावच्छिन्नसाध्यव्यापकत्वोक्तौ तु पूर्वोक्तशाकपाकजन्यत्वाव्याप्ति
126 रिति भावः अव्याप्तिं परिहरति मित्रातनयत्वेन्यादि वायुप्रत्यक्षः द्रव्यत्वादित्यादौ प्रत्यक्षत्वमुद्भूतरूपसाध्य
धिकरणमात्माऽनुद्भूतरूपात्मकोपाधिशून्यसाध्यव्यभिचाराधिकरणे गगने तदन्यतरत्वावच्छि
न्नसाध्यव्यापकत्वं सोऽनुद्भूतरूपे भावाङ्क्ते मुपाध्यधिकरणमिति उद्भूतरूपाधिकरणपरमा
ण्वाकाशान्यतरत्वावच्छिन्नसाध्याप्रसिद्ध्यात दोषतादवस्थ्यमतः साध्याधिकरणमात्माऽनुद्भूत
रूपात्मकोपाधिशून्यसाध्यव्यभिचाराधिकरणं गगनं तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वसो
द्भूतरूपेः भावाङ्क्ते मुपाध्यधिकरणमिति उद्भूतरूपाधिकरणपरमाण्वाकाशान्यतरत्वाव
च्छिन्नसाध्याप्रसिद्ध्यात दोषतादवस्थ्यमतः साध्याधिकरणमिति उद्भूतरूपाधिकरणयत्र
मनन्ताधिकरणं घटादिति दृत्तिद्रव्यत्वाद्यात्मकधर्मावच्छिन्नसाध्यव्यापकत्वाभावाङ्क्ते यत्र,
त्वादि तत्रापि साध्यव्यभिचाराधिकरणपरमाणुघटान्यतरत्वावच्छिन्नद्रव्यत्वात्मकसाधनत्वं

१२४

पकत्वात् उपाधिशून्यमिति नन्वेवोपाधिकरणं साध्याधिकरणं चेत्: उपाधिशून्यत्वमधिकरणमात्मा तद्
मत्त्वावच्छिन्नद्रव्यत्वात्मकसाध्यव्यापकत्वाभावात्साध्यव्यभिचाराधिकरणमिति उद्भूतरूपवत्त्वा
धिकरणं चेत्: यत्रोद्भूतरूपस्पर्शवत्त्वाभावाधिकरणं अतीन्द्रियत्रयादिनरस्पतपत्वावच्छिन्नद्रव्य
त्वरूपसाधनाव्यापकत्वस्योद्भूतरूपेऽभावात्साध्याभावाधिकरणमिति परित्यज्य साध्यव्यभिचाराधि
करणमित्युक्तं तदर्थस्तु साधननिष्ठसाध्यव्यभिचारनिरूपकाधिकरणत्वं अनन्त इति नाहशधर्मा
तिरिक्ततया स्फुटतो विरोधः नच साध्यव्यापकत्वं साध्यनिष्ठव्याप्तिनिरूपकत्वं तथाच स्तुत्वसाध्यव्याप
पके धूमादिनिष्ठव्याप्तिनिरूपकत्वमार्द्रेन्धनादीनामिति वाच्यं तद्धर्मोधिकरणीभूतसाध्याधिकरण
निष्ठाभावाप्रतियोगितद्रूपस्येव तद्धर्मावच्छिन्नसाध्यव्यापकत्वस्य लक्षणे प्रवेशः ननु यद्धर्माव
च्छिन्नसाध्यनिष्ठव्याप्तिनिरूपकत्वस्य न्याशीयात धूमवान् वह्नेरित्यादावयःपिण्डमहानसान्यत
रत्वावच्छिन्नसाध्यव्यापकत्वं जनवत्तादिके संगच्छत एवेति चेत्परं अत एव यद्धर्मावच्छिन्नत्वघटि
तनिरुक्तस्य लक्षणानात्पर्यविषयत्वादेव एतदनुसारेणानिरुक्तलक्षणत्वस्य साध्यमिति षष्ठी
तत्पुरुषभ्रमे व्यावर्तयितुमाह स्वं चेति नच्यात्स्तुपदभेदेन यद्वस्थ्यावेनवा साधनवत्तिसाध्याभा

वह्नीयते सदुपाधिर्लाघवात् अन्यथा जलत्वतेजस्त्वयोरप्युद्भूतरूपवत्त्वेन रूपेणानकं चिदुपाधित्वमित्य
र्थः न चैवमपि तदुपाधिव्यभिचारेण तद्धर्मावच्छिन्ने यदुपाध्यभावाधिकरणं तत्र हेतोर्वृत्तिरेव वा
युः प्रत्यक्षः प्रमेयत्वादित्यादौ तु प्रमेयत्वे प्रत्यक्षत्वव्यभिचारेऽपि बहिर्द्रव्यत्वोद्भूतरूपव्यभिचारित्वादित्य
दिदूषणं ननु पक्षेतरत्वेऽतिव्याप्तिः न च तस्य लक्षणत्वमेव एकाश्रये येषामिति मूले प्रदर्शित
स्य लक्षणतावच्छेदकस्य तत्राभावात् न च हेतोः पक्षेतरत्वव्यभिचारः पक्षमादायैव संभवात् साध्यव्य
भिचारस्य तमादाय संभवादत आह बाधानुन्नीतेति साध्यव्यापकत्वेऽपि स्वव्याघातकत्वादिति
उपाधिमात्रस्य दूषकत्वव्याघातकत्वादित्यर्थः पक्षेतरत्वस्योपाधित्वे सर्वत्रानुमाने पक्षेतरत्वोपा
धिसंभवादनुमानमात्रोच्छेदापत्त्या व्यभिचारानुमानाधीनस्योपाधेर्दूषकत्वस्यासंभवादिति
भावः ननु तथापि यत्र साध्यव्यापकताग्राहकं प्रमाणमस्ति तत्र पक्षेतरत्वे लक्षणातिव्याप्तिर्दुर्वारे
त्यत आह बाधोन्नीत इति बाधेन पक्षे साध्याभावनिश्चयादुन्नीतः साध्यव्यापकत्वेन निश्चित इत्यर्थः
संदिग्धोपाधिरपीति पक्षेतरत्वे संदेहेन साध्यव्यापकतासंदेहस्य [illegible] संभवादिति भावः न च स्व
व्याघातकत्वेनानुपाधित्वादेवानुज्ञानसंभवे न संप्रदायमात्रेण हेतुकथनमसंगतमिति वाच्यं य १२५

त्र साध्यव्यापकताग्राहकं न केवलान्वयित्वात्र व्यापकाव्यभिचरितं स्म समाप्यवन्तत्वस्य व्याघातसंभवात् संसृ
ष्टिपदार्थतावच्छेदकत्वेनोपाधेर्दूषकतावादिनां मतमाह किंचेति इत्यंचेति संसृष्टिपदार्थतान्यायकत्वं
दूषकत्वे चेत्यर्थः अत्र च संसृष्टिपदार्थताव्यापकत्वकल्पने च पदार्थतीति पदार्थतित्वेन पदार्थेन स्वभावेन सा
ध्याभावासाधनादिति भावः गुरुमते लौकिकः शब्दोऽनुवादको वैदिक एव प्रमाणं तन्मतनिराकरणा
याह वैदिकेति अत्र स्वर्गकामो यजेतेत्यादिपदेन प्रचलितेन विशेषणः संसर्गसिद्धिरिति द्व
वं तात्पर्यविषयतेति अत्र व्यालिङ्गेन विधेयत्वादिपदाधिकरणत्वे संसर्गतात्पर्य तदविषयत्वादि सं
सर्गेण योतरवारणाय तात्पर्यविषयत्वं संसर्गविशेषणं तात्पर्यज्ञाने इतरपदार्थत्वेनेतरपदार्थ
त्वेनेतरपदार्थस्य प्रवेशात् घटत्वादिनास्मत संसर्गतिसिद्धो इतः स्मारितेति स्मारितत्वं चाहत्याबोध
तेन वस्तु पदार्थसमवायेनाकाशत्वादिनोपस्थितेन रूपेण सिद्ध्यभावप्रतिपत्तीति हेतो वाक्यमिति पुत्रो
राज्ञः पुरुषोऽपसार्यतामित्यादौ राज्ञः पुरुष इत्यादिभागे राजपुरुषार्थयोर्योग्यपदार्थयोः संसर्गतात्प
र्यभावेन साध्याभावाद्व्यभिचार संसर्ग इत्याकाङ्क्षाविशेषणं तच्चेदं पदमनेयदेन सहान्वकसं
सर्गेणेत्यर्थाग्रहितत्वार्थबोधजनकत्वमिति पदतात्पर्यार्थकं तेन नताकाङ्क्षायाद्दशवैयर्थ्यम

मु.टी. प्रसंगः वह्निनास्तिं च नीत्यादिवाक्ये संसर्गप्रमापूर्वकत्वसाध्याभावेन व्यभिचारवारणाय हेतौ योग्यता
१२८ पदं नीलो घटो द्रव्यं पटः इत्यादौ नीलः पटः इत्यादिभागे नीलपटयोगकांक्षायोग्यताशालित्वेन हेतुसत्वाद्व्य
128 भिचारवारणाय आसक्तिपदं कदंव यदं चाकांक्षादीनां परस्परमतियोगिता लाभाय अन्यथा साध्या
श्रयस्य परस्पराश्रयघटितत्वेन व्यभिचारप्रसंगात् ननु इष्टतावच्छेदकप्रकारकप्रवृत्तिविषयविशेष्यक
ज्ञानस्य प्रवर्तकतया संसर्गज्ञानपूर्वकत्वानुमितेरनाहार्यशतया कथं प्रवर्तकत्वं अनुमितेर्व्यापक
तावच्छेदकप्रकारकत्वनियमेन प्रमापूर्वकत्वेन प्रमापूर्वकाभिद्धावपि प्रवर्तिविशेष्यकत्वाद्य
कारकज्ञानस्य तस्मादनुत्पत्तेस्तदर्थं शाब्दप्रामाण्यस्वीकार इत्यत आह यद्वेति मिथः संसर्गेति
तात्पर्यविषयपरस्परसंसर्गवत्त्वमित्यर्थः तेन नानात्पर्यविषयसंसर्गमादाय व्याघातः ननु दृष्टा
न्ते व्याप्तिसिद्ध्यभावात् कथं व्याप्तिग्रह इत्यत आह दृष्टान्तेपीति ननु सर्वत्र शब्दश्रवणानंतरमनु
मितिरूपकार्यान्यथानुपपत्त्या व्याप्तिज्ञानं कल्पनीयमित्यत आह किंचेति पदज्ञानं कल्पयितेति
पदस्मरणं कल्पयितेत्यर्थः वह्न्यादिशब्दस्येव वह्न्यादिरूपेणार्थेनापि वह्न्यादिपदस्मरणसंभवात्
वाच्यत्वादिवत् वाचकत्वादिसंबंधस्यापि स्मारकत्वादिति भावः इदमुपलक्षणं आकांक्षादिज्ञानेक १२८

त्वयि त्वेपि बोधसमानाकृतस्तु यतेव पदार्थाः परस्परं संसर्गवंतः योग्यत्वादिमत्पदोपस्थापितत्वादित्य
नुमाने योग्यतानां लिंगविशेषणतो लिंगस्य निश्चितत्वेनानिश्चायकतया योग्यता या ज्ञानं संशयेपि शा
ब्दबोधदर्शनात् ततः एषमेव शाब्दोमानमिति वदंति मिश्राः तत्र अनुमानमष्टया शाब्दस्य बाधकत्वे घट
मानयेति हेतुरूपयोग्यं घटकमेतमानेकृतिरिति स्वयायोग्यमितितिन स्यात् विषयाबाधात्वात् तस्याः
प्रयात्वे शाब्दप्रामाण्ये च स्वभावाज्ज्ञानताहृशशाब्दस्य बोधकत्वमित्याहुः परेतु घटादन्यत्वगिन्यादौ
घटावधिकत्वत्थत्वप्रकारेणानिरवच्छिन्नविशेष्यताकः तथ्यकाश्रयस्य शाब्दबोधस्य वानुभव
सिद्धः स चास्माकं ताहृशानुस्वीकारतानत्वेनताहृशशाब्दबोधं प्रति हेतुत्वाउपपद्यते वैशे
षिकाणां तु एष्यत्वं घटावधिकं घटपदसाकांक्षत्वएथकादस्मारितत्वादित्यनुमानेन तन्निर्वा
हः पुनविधयात्वयत्वस्पभानेपितदाश्रयस्याभानात् न च पदपदार्थत्वकस्पययचद्वावधिकत्वथ
कृत्वानित्यनुमित्यातन्निर्वाह इत्य वाच्यं पदादिनिष्ठविशेषतायास्तत्त्वपदत्वनावच्छेकीभूत य
त्वावच्छिन्नविशेष्यताकताहृशशाब्दबोधसमानाकारतायास्तथाप्यानिर्वाहात् इत्याहुः तत्र
तेषु मध्ये असहितत्वइति अन्यथाभावाप्रतियोग्यसाधकइत्यर्थः यथाश्रुतेसिद्धासिद्धिव्याघा

म॰दी॰
१२९
129

नान् अत्यंताभावाप्रतियोगित्वस्य च प्रमेयत्वादौ सत्वाल्लक्षणासमन्वयः न चैतन्न संभवति प्रमावि
षयत्वरूपस्य तस्य नानात्वेनाननुगमादिति वाच्यं प्रमात्वस्यैव परंपरासंबंधेनानुगतत्वात् इत्थं च
मेयत्वादेर्व्यतिरेकत्वभ्रमेऽपि केवलान्वयित्वमेवेति मन्तव्यं असम्प्रतिपत्तेः इति सिद्धं सिद्धिव्याख्या
द्वारायां गृहीतहेतुसहचारे यद्व्यतिरेकि साध्यं तत्कत्वम् अर्थो बोध्यः संपन्नेति गृहीतान्वयव्य
तिरेकि साध्यकमित्यर्थः यत्संबंधेन यदवच्छिन्नं प्रतीति यत्संबंधावच्छिन्न यद्रूपावच्छिन्नव्या
प्यतानिरूपितव्यापकताग्रस्तत्त्वमित्यर्थः इतरव्याप्येनेति इतरस्य व्याप्यत्वमित्यर्थः तादात्म्येने
तरव्यापकतेति पाठे तादात्म्यसंबंधावच्छिन्नाया इतरनिष्ठव्याप्यतानिरूपितव्यापकताया
त्यर्थः तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावः सिद्ध्यतीत्यर्थः येन संबंधेन व्याप्य
ताग्रहस्तत्त्वमित्यनुक्तौ तादात्म्येनेतरस्य व्याप्यतापत्त्या गृहीतान्तरेऽनेनात्यन्ताभावस्य सिद्धिः
स्यादिति भावः संयोगसंबंधावच्छिन्नप्रतियोगिताकवह्न्यभावेनेति सावधारणेन तेन संबं
धेन तदवच्छिन्नप्रतियोगिताकेन न सिद्धिरिति भावः अनेन च येन संबंधेन व्यापकताग्रहस्तेन
इत्यस्य फलं सूचितं प्रदर्शितरीत्या च येन रूपेण यदवच्छिन्नेत्यन्वयोऽपि प्रयोजनमस्ति तेन सा १२९

ध्यसाधनसहचारज्ञानाभावात्कथं व्यतिरेकव्याप्तिज्ञानमित्यत आह अत्र चेति तथा च व्यतिरेकस
हचारेण व्यतिरेकव्याप्तिग्रहान्नान्वयसहचारग्रहापेक्षेति भावः ननु विना साध्यप्रसिद्धिं तदभावा
ज्ञाने व्यतिरेकव्याप्तेरग्रहात्साध्यप्रसिद्धौ चासिद्धसाधनमिति चेन्न साध्यस्य घटादावेव प्रसि
द्धत्वात्पृथिवीतरभिन्नत्वस्य देशप्रतीतेरसिद्धत्वान्न साधने यत्तत्तावच्छेदकनानात्वेवांशतः
सिद्धसाधनस्यादोषत्वात् अत एवानित्ये वाङ्मनसी इत्यत्र वागितिवृद्धेरुद्देश्यतायाः सिद्धत्वेनांशा-
तः सिद्धसाधनस्यादोषत्वात् अत एवानित्ये वाङ्मनसी इत्यत्र वागितिवृद्धेरुद्देश्यतायाः सिद्धत्वे
नांशतः सिद्धसाधनस्यादोषत्वात् अत एवानित्ये वाङ्मनसी इत्यत्र वागितिवृद्धेरुद्देश्यतायाः सिद्ध
त्वेनांशतः सिद्धसाधनमिति ननु तथापि घटः कथं पक्षः साध्यस्य निश्चयेन तत्र संदेहसिसाध
यिषयोरभावादिति चेन्न यतः सर्वा पृथिवीतरभिन्ना न वेति संशयस्य तत्प्रकारकसिद्धसा
धयिषायाश्च घटविषयत्वात् घटत्वेन विशेषदर्शने सिद्धो वा तेन रूपेण संशयसिसाधयिषे न
भवतः पृथिवीत्वेन तु भवत एवेति ननु पृथिवीतरभिन्ना पृथिवी नास्ति घटवदित्यन्वयिनैव
तदभेदसिद्धेर्व्यतिरेकि वैयर्थ्यमिति चेन्न अन्वयव्याप्तेरग्रहे व्यतिरेकव्याप्तिस्फूर्तिदशायां व्य

मु॰टी॰ तिरेकानुमानप्रवृत्तेर्निष्प्रत्यूहत्वात् आचार्यमतमाह केचिदिति व्यतिरेकसहचारेण अन्वयव्याप्तिरेवेति एकारेणाव्य
२३ तिरेकव्याप्तेर्व्युदासः ननु एवं व्यतिरेकव्याप्तिज्ञानस्योपकारणाभावात् कथं व्यतिरेकानुमितिरित्यत आह नन्विति
व्यतिरेकव्याप्तिज्ञानमित्यस्यानुमित्याविंत्यादिः ननु अन्वयव्याप्तिज्ञानस्यैव हेतुत्वे कथं व्यतिरेकीति व्यवहार इत्य
130 त आह यत्रेति ननु पृथिवीइतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ साध्यस्य इतरभेदस्याप्रसिद्धत्वात् कथं व्यति
रेकसहचार इत्यत आह साध्यप्रसिद्धिस्त्विति ननु घटादौ साध्यनिश्चितेः कथं तत्रेतरभेदानुमितिरत आह
यत्त्वादिति अवच्छेदकावच्छेदेनानुमितेः सामानाधिकरण्येन साध्यसिद्धेरप्रतिबंधकत्वादिति भावः अत्रचा
न्वयव्याप्तिग्राहकतावत्पदार्थज्ञानादेवान्वयव्याप्तिज्ञानोत्पत्तेः व्यतिरेकसहचारज्ञानस्य तद्धेतुत्वे मानाभावः
न च व्यतिरेकसहचारेणान्यत्र प्रयोजकत्वं तत्तृतीयार्थः नचैवनानुपपन्नं अन्वयव्याप्तिज्ञानप्रतिबंधकव्यभि
चारशंकानिरासद्वारा व्यतिरेकसहचारज्ञानस्य तत्र प्रयोजकत्वादिति वाच्यं व्यतिरेकसहचारग्रहेप्यधिकर
णान्तरे व्यभिचारशंकनादेव स्यात् तदधिकरणीयव्यभिचारशंकानिरासद्वारा तत्र साधयोगित्वमित्यपि
न तदधिकरणे साधनाभावग्रहमात्रेणैव तदधिकरणीयव्यभिचारशंकानिवृत्तेरित्यस्वरसो वदंतीत्यनेन
सूचितः केचन मीमांसकाः तदपि अर्थापत्तेः प्रमाणान्तरत्वमपि दिवा न भुंक्ते इत्यादिनामसूत्रः पर्वतेतरस्मि

न्नस्त्वति चेन्मास्तु संग्रहः नचैतत् ज्ञायमानमपूर्वः पूर्वत्वेन स्मृतीति ज्ञानमुत्पद्यते नचैतद्व्याप्तिविकल्पः संभवति पर्वते
वह्निस्साध्यस्याप्रसिद्धौ व्यतिरेकव्याप्त्यनिरूपणादिति कथं नार्थापत्तिः प्रमाणान्तरमिति चेन्न मयूरवन्नत्वपर्व
ताधिकरणत्वेसति साधिकरणत्वात् पर्वतत्ववदित्यन्वयव्यतिरेकिणैव पर्वताधिकरणमयूरवन्नत्वज्ञानसंभ
वात् धर्मत्वेनेति इदं प्राचांमतेनोक्तं नवीनमते तु नित्यविज्ञानमानंदं ब्रह्मेति नित्यसुखे सिद्धे धर्मस्य कार्य
तावच्छेदकं जन्यसुखत्वं नेसुखत्वव्याप्यं तरजातिर्वेति बोध्यम् नन्वेतयोर्मध्ये अतएव फलज्ञानस्य फलेच्छां प्रति
हेतुत्वादेव पुरुषार्थः संभवति सुखे दुःखाभावस्य पुरुषार्थः संभवतीत्यर्थः ननु दज्ञानमित्यादिः स्वविषयक
ज्ञानजन्येच्छाविषयत्वमर्थः तथा चोपायेऽतिव्याप्तिः तस्यापि स्वविषयके इष्टसाधनताज्ञानजन्येच्छाविषय
त्वादत आह इतरेच्छेति कृतिसाध्यताज्ञानमिति ननु कृतिसाध्यताज्ञानस्य स्वातंत्र्येण चिकीर्षां प्रति हेतुत्वे
मानाभावः तद्धर्मावच्छिन्नविशेष्यके इष्टसाधनताज्ञानस्य तद्धर्मप्रकारकेच्छां प्रति हेतुतायाः क्लृप्तत्वात्कृ
तिसाध्यतावच्छिन्नविशेषके इष्टसाधनताज्ञानादेव चिकीर्षासंभवादिति चेन्न यत्र कृतिसाध्यपाकत्वेन
इष्टसाधनत्वेन गृहीतमपि तु मुद्गपाकत्वेन कृतिसाध्यत्वं मुद्गपाकत्वे न चेष्टसाधनत्वं गृहीतं तत्रापि पाक
गोचरानुभविकतया तदनुरोधेन चिकीर्षाया अवश्यकतया तन्निर्वाहाय कृतिसाध्यताज्ञानस्य स्वातं

मु॰टी॰ ज्ञेण हेतुताया आवश्यकत्वात् अथ कृतिसाध्यताज्ञानस्य प्रतिबंधकत्वादेव तृप्त्यादौ चिकीर्षानुत्पादात्कृति
२३१ साध्यताज्ञानस्याप्रतिहेतुत्वमेव मानाभाव इति चेन्न कृतिसाध्यत्वाभाववत्त्वाप्यतदवच्छेदकधर्मज्ञाना
नां प्रतिबंधकत्वकल्पनापेक्षया कृतिसाध्यताज्ञानहेतुत्वे लाघवात् इष्टसाधनताज्ञानमिति अन्यथाति
131 प्फलत्वज्ञानेपि चैत्यवंदनादौ चिकीर्षापत्तिरिति भावः अत्रेदं बोध्यं पाकविशेष्यकेष्टसाधनज्ञानस्य का
र्यतावच्छेदकं न पाकगोचरचिकीर्षात्वं कृतिसाध्यत्वनिवेशप्रयोजनहानात् पाको जायतामितीच्छाया
असंग्रहापत्तेश्च किंतु पाकत्वावच्छिन्नामुख्यविशेष्यकेच्छात्वं पाकसाध्यसुखं जायतामितीच्छायां व्यभि
चारवारणाय मुख्येति इष्टसाधनतेत्यत्रेच्छाखण्डमपि सतीविशेषणं तेन इच्छाज्ञानशून्यकालेपि चिकीर्षा
निर्वाहः अत एव कृतिसाध्यताज्ञानस्य हेतुतादेव बलवद्द्विष्टेति द्विष्टं द्वेषविषयीभूतं द्वेषश्च दुःखत्वा
द्युपायज्ञानात् सर्पादौ तत्साधनताज्ञानात् द्वेषे बलवत्त्वं च जातिविशेषः प्रतिबंधके इति ननु बलवद्द्वे
षविषयसाधनत्वज्ञानस्य प्रतिबंधकत्वे चैत्रस्यागम्यागमनजन्यनरके बलवान्द्वेषः तदा मैत्रस्य तादृ
शद्वेषमन्यस्यागम्यागमने तादृशनरकजनकत्वज्ञानवत्त्वे इच्छाप्रवृत्त्योरनुपपत्तिः एवं चैत्रस्यैवका
लांतरे तादृशद्वेषसत्वेपि न च तत्तत्कालीनतत्पुरुषीयेच्छां प्रति प्रवृत्तिं प्रति च तत्कालीनतत्पुरुषीय २३१

बलवद्द्विष्टजनकत्वज्ञानस्य प्रतिबंधकत्वं कल्प्यते यत्पुरुषस्य यदा नरकादिद्वेषः तत्कालपुरुषांतर्भावेन तता
दृशज्ञानप्रतिबंधकत्वस्याकल्पनात् तत्र तादृशप्रतिबंधकाप्रसिद्ध्या तदभावकूटस्य कारणस्याभावान्नप्रवृत्त्य
नुपपत्तिरिति वाच्यं तत्पुरुषस्य यदा गम्यागमनजन्यनरके बलवान्द्वेषस्तदा तत्पुरुषस्य तत्रेच्छानुद
याद् गम्यागमनगोचरतत्पुरुषीयतत्कालीनेच्छायाश्चाप्रसिद्ध्या तत्पुरुषतत्कालांतर्भावेन तादृशकार्य
कारणभावस्याभावेन तत्र तत्पुरुषीयागम्यागमनगोचरेच्छानुत्पादप्रयोजकस्य दुर्भिक्षापत्तेरिति
चेन्न तद्धर्मप्रकारकद्वेषविशिष्टस्य तद्धर्मावच्छिन्नजनकत्वज्ञानस्य तत्र प्रतिबंधकत्वकल्पनेनोक्तापत्त्य
भावात् तद्धर्मप्रकारकद्वेषानुत्तरतादृशद्वेषाभावः तादृशद्वेषोत्तरतद्गोचरेच्छायां बलवद्द्वेषविषयसा
धनत्वज्ञानजन्यायास्तद्गोचरो द्वेषः प्रतिबंधकः पूर्वोक्तप्रतिबंधकद्वयकल्पनापेक्षया लाघवादिति भा
वः अत्र चोक्तयुक्त्योक्ते द्विष्टजनकत्वमेकस्मिन्न भागे गृहीतं तत्र सम्प्रतिपन्नस्य लड्डुकेच्छाद्वेषयो
रनुत्पत्तेस्तत्र तत्कार्यकाले द्वेषाभावस्य सत्त्वेनेच्छोत्पादापत्तिः न च यत्र बलवद्द्वेषविषयसाधनत्वज्ञाने
न तृतीयक्षणे द्वेषोत्पत्तिस्तत्र द्वितीयक्षणे इच्छोत्पादापत्तिस्तथापीति वाच्यं तत्रेच्छोत्पादस्येष्टत्वात् क्षण
विलंबस्य शपथनिर्णेयत्वादित्यन्येनाप्यस्वरसः सूचितः बलवदनिष्टाजनकत्वज्ञानमिति अत्रापि तद्धर्म

मु॰री॰ प्रकारकद्वेषोत्तरेच्छायां तद्धर्मावच्छिन्नजनकत्वज्ञानं कारणं तादृशद्वेषानुत्तरेच्छायां तत्तद्धर्मप्रकारकद्वे
१३२ षाभावः कारणमिति निष्कर्षो बोध्यः मूलेकस्यचिन्मतमुपन्यस्यति नेनाश्रवस्य! स्त्रचितः सचबलवदनिष्टानन
नुबंधित्वज्ञानत्वस्य हेतुतावच्छेदकत्वे बलवदनिष्टजनकत्वप्रकारकतानिरूपिताभाववैशिष्ट्यताशालिता
देः तादृशनिरूपकभावघटितत्वेन गौरवात् दघटितत्वबलवदनिष्टासाधनत्वज्ञानाभावत्वेनैव हेतुत्वं युक्तं
नचाप्रामाण्यज्ञानानास्कंदितबलवदनिष्टाननुबंधित्वज्ञानत्वापेक्षयाऽप्रामाण्यनिश्चयानास्कंदितत्व
नुबंधित्वज्ञानत्वस्य प्रतिबंधकतावच्छेदकत्वे गौरवमिति वाच्यं युक्ताद्दौ बलवदनिष्टसाधनत्वसंदेहेपि
इच्छाप्रवृत्त्योरुदयाद्बलवदनिष्टाननुबंधित्वनिश्चयस्यैवेच्छाप्रतिबंधकतायास्तदननुबंधित्वसंशयस्या
पि च कारणतायाः स्वयास्वावाच्चानयाचविपरीतगौरवादिति न च बलवदनिष्टाननुबंधित्वज्ञानस्या
प्रवर्तकत्वे तद्विषयस्य विध्यर्थत्वाभावान्नकलंजं भक्षयेदित्यादिवाक्यानामप्रामाण्यापत्तिरिति वाच्य
तज्ज्ञानस्य प्रवृत्तिजनकत्वाभावेपि प्रवृत्तिप्रतिबंधकबलवनिष्टसाधनत्वज्ञानविघटकत्वेन प्रतिप्रयो
जकत्वात् प्रवृत्तिप्रयोजकज्ञानविषयस्य विध्यर्थत्वानपायात् अत्र यद्यपि यत्र प्रथमतरेण द्वेषेण
शाङ्गवत्येव चतुर्थंतरेण उपायेच्छा यत्र फलेच्छादिक्रमेणैषामुत्पत्तिस्तत्र फलेच्छादित्रयकारणभावा १३२

देवनोपायेच्छा एवमन्यत्राप्यात्मविशेषगुणानां योगपद्यानंगीकारादिति बलवदनिष्टानुबंधित्वज्ञा
नस्य द्वेषस्य वा प्रतिबंधकत्वेन युक्तं च बलवदनिष्टाननुबंधित्वज्ञानस्य हेतुत्वं तथापि द्वित्रिक्षणानंतरि-
तेपि द्वेषे इच्छाप्रवृत्त्योरनुदयस्यानुभविकतया ज्ञानयोरेव नैयोगपद्यमित्यभ्युपगमाद्वा पूर्वोक्तप्रतिबं
धकत्वस्य हेतुत्वस्य चावश्यकत्वमिति ध्येयं तेन द्वेषे बलवत्वविशेषणेन प्रवृत्तिरित्यादि प्रवृत्तित्वं च राग
जन्यतावच्छेदकतया सिद्धो जातिविशेषः निवृत्तित्वं च द्वेषजन्यताजीवनयोनियत्नत्व
चमाहृज्ञिकप्रमाणं चकसहचारविषयकयत्नत्वं ननु बलवदनिष्टानुबंधित्वज्ञानाभावस्य प्रवृत्त्यहेतुत्वे मधु
विषसंपृक्तान्नभोजने प्रवृत्त्यापत्तिरत आह मध्विति इतीच्छग्रंथः चिकीर्षाभावादिति चिकीर्षाप्रतिबल
वदनिष्टानुबंधित्वज्ञानाभावस्य हेतुत्वादिति भावः कृतिसाध्यताज्ञानादिवदिति अन्यथा कृतिसाध्यताज्ञा-
नादेरपि चिकीर्षायामेव हेतुत्वं स्यान्न प्रवृत्तौ व्यापारेण व्यापारिणो नान्यथासिद्धत्वमिति तु प्रकृतेन समानमि
ति भावः प्राभाकरमतमाह कार्यताज्ञानमिति सा च चिकीर्षा चेत द्वारा कृसाध्यत्वप्रकारके द्वारा इच्छा येवे
ति एवकारोऽप्यर्थः सविशेषणेति स्वप्रवृत्तमाणः पुरुषः तद्विशेषणकामे कामनानित्येकालशोवादित
द्भता पत्तेरलत्मेवः तस्य प्रतिसंधानं ज्ञानमित्यर्थः तस्य कार्यताज्ञाने हेतुताऽलिंगज्ञानविधया तथाहि पाको

मु.टी.

१३३

133

मत्कृतिसाध्यः मत्कृतिं विनाऽसत्त्वे सति मदिष्टसाधनत्वादित्यनुमाने अत्र यदिष्टसाधनत्वमात्रोपादाने वृष्ट्यादौ व्य-
भिचार इति सत्यंतेन मदिष्टसाधने परकृतपाकादौ व्यभिचारवारणाय मत्कृतिं विनेत्यत्र मत्पदं श्रमे व्यभिचारवारणा-
य मदिष्टसाधनत्वादिति मदीयश्रमस्य मत्कृतेरिष्टसाधनत्वात् दोषत्वादवश्यमतत्त्वापि मदिति न च स्वेच्छाधी-
नकृतिसाध्यताज्ञानमेव प्रवर्तकमन्यथा नांतरीयकश्रमे प्रवृत्त्यापत्तिः तद्योक्तानुमानान्न सिद्धमिति वाच्यं स्वेच्छा-
धीनकृतिसाध्यत्वस्यैव साध्यत्वात् एवं च हेतावपि मत्कृतिं विनेत्यत्र स्वेच्छाधीनत्वं मत्कृतिविशेषणं देयम् अ-
न्यथा स्वेच्छाधीनमत्कृतिसाध्यत्वस्यैव साध्यत्वात् एवं च हेतावपि यम् तत्कृतिं विनेत्यत्र स्वेच्छाधीनत्वं मत्कृतिवि-
शेषणं देयम् अन्यथा स्वेच्छाधीनमत्कृतिसाध्ये मदिष्टसाधने नांतरीयकजलसंयोगादौ व्यभिचारापत्तेः एवं
सति स्वेच्छाधीनमत्कृतिं विना तद्धेत्वभावादेव श्रमे व्यभिचारवारणसंभवात् इष्टविशेष्यदलप्रयोजनं यद्यपि न
संभवति तथापि नीलधूमादिवद्धेत्वंतरत्वादशेषः एवमग्रेऽपि इदानींतनकृतिसाध्यसंध्यावंदनकः द्विजाति-
त्वे सति विहितसंध्याकालीनशौचादिमान्यः तत्कालीनकृतिसाध्यसंध्यावंदनक इति सामान्यमुखव्याप्तेवि-
ति न चैवं वीतेष्टसाधनत्वहेतुमानेऽसंभवे विपक्षे स्वविशेष्यणवता प्रतिसंधानजन्यकार्यताज्ञानेन संभवति
इष्टसाधनत्वस्य यागनिष्ठत्वेन पुरुषविशेषणताभावात् इच्छायाश्च पुरुषविशेषणत्वेऽपि तस्या लिंगत्वाभा- १३३

भवात् तल्लिंगघटकत्वेपि पदेनेष्टसाधनताज्ञानानिर्वाहकत्वादिति वाच्यं कामस्य साधनताज्ञानस्यापि पदजन्ययागादौ स्वविषयसा
धनत्वरूपकामानांतरवैधज्ञानात्मकत्वान्न वस्तुतस्तु तद्धर्मज्ञानं तेनैव वैधज्ञानं तज्ज्ञानमेव ननुपदेनापि तत्प्रयुक्तं न इति काम्य
साधनताज्ञानस्यापि कामनात्मवैधज्ञानात्मकतया कामनात्मकतयानुपपत्त्याभावात् ननु स्वविशेषणवत्ताप्रतिसं
धानवत्त्वात् जन्यकार्यताज्ञानस्य प्रवर्तकत्वे इष्टसाधनज्ञानशून्यकालेपि पाके स्वविशेषणकृत्यादि घटितहेतु
तया यत्र कार्यानुमितिर्यथा पाकः स्वेच्छाधीनमत्कृतिसाध्यः श्रमादिभिन्नत्वे सति मत्कृतिव्यतिरेकप्रतियोगित्वा
त् यद्वा स्वेच्छाधीनमत्कृतिं विना मत्त्वादिति तत्रापि प्रवृत्त्यापत्तिरत आह काम्येहीति कामनायागयाकादिगोच
रकामना कचित्तथैव पाठः तथा च स्वविशेषणे तत्र विशेषणे तत्र विशिष्यतादृश कामनारूपमेव विशेषणं
वाच्यं एवं विशेषणवत्त्वमपि स्वविषयसाधनत्वं रूपं वाच्यं तेन न स्वेच्छाधीनत्वेत्यादिहितीयहेतुज्ञानजन्यका
र्यतानुमितिस्थले प्रवृत्त्यापत्तिरिति भावः ननु काम्यसाधनताज्ञानजन्यकार्यताज्ञानस्य प्रवर्तकत्वे मधुवि
षसंपृक्तान्नभोजने प्रवृत्त्यापत्तिरित्यत आह नतत्स्वबलद्वनिष्टेति तथा च स्वविशेषणवत्ताप्रतिसंधानेब
लवदनिष्टाननुबंधित्वविषयकत्वं विशेषणादेयमिति भावः ननु तृप्तस्यापि भोजने प्रवृत्त्यापत्तिस्तस्यापि प्र
तीतभोजनमनाघटितलिंगज्ञानसत्त्वादत आह तृप्तस्येति तदानीमिति कामनायास्तदानीं पुष्पविशेष

म॰टी॰ णेत्वाभावादित्यर्थः तथाच स्वविशेषणोत्पत्त्यनंतरं तदानीतनत्वं स्वविशेषणोदयमितिभावः ननुस्वेच्छाधीनमत्स्वव्य
१३४ तिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वादिलिंगज्ञानजन्यकार्यताज्ञानात्संध्यावंदने प्रवृत्त्यापत्तिः कृतेरपि स्वविशे
134 षणत्वादत आह नित्यशौचादिकमिति आदिना विहितकर्मकालस्य ग्रहः नच कालस्य कथं पुरुषविशे
षणत्वमिति वाच्यं स्वकृतिजीवनं च तत्संबंधेन तस्य पुरुषविशेषणत्वात् विहितकालजीवित्वादेर्वा पदेन
ग्रहात् तथाच नित्यगोचरप्रवृत्तिस्थले स्वविशेषणपदेन विशिष्यतत्कालीनजीवनादिरूपविशेषणमेवग्रा
ह्यमिति न सर्वदाकृत्यापत्तिप्रसंग इतिभावः नैयायिकः शंकते नन्विति तदपेक्षया बलवदनिष्टाननुबंधित्व
विशिष्टेष्टसाधनताज्ञानजन्यकृतिसाध्यताज्ञानापेक्षया लाघवेन नियमादिष्टजनकतापेक्षया
विषयत्वस्य लघुत्वादितिभावः ननु बलवदनिष्टाजनकत्वज्ञानं न हेतुः क्वचिद् दुःखाया असाध्यत्वेऽपि कर्तर
स्यापि दुःखस्याबलवत्त्वात् क्वचिदल्पदुःखस्य बलवत्त्वादनुगतस्याबलवत्त्वस्य दुर्वचत्वादित्यत आह ब
लवदनिष्टाननुबंधित्वेति इष्टोत्पत्तीति इष्टोत्पत्तिनान्तरीयकं यद्दुःखं तदपेक्षयाऽतिरिक्तं यद्दुःखं तद
जनकत्वमर्थः एतेन मधुविषसंपृक्तान्नभोजने प्रवृत्त्यापत्तिरपास्ता इष्टोत्पत्तिनान्तरीयकदुःखातिरिक्तस्य
मरणदुःखस्य तेन जननात् अत एव क्वचित् सुखमात्रजनके कर्मणि इष्टोत्पत्तिनान्तरीयदुःखसमप्रमिति १३४

तत्र प्रवृत्त्यभावप्रसंग इति तदयुक्तं कथं कमैतिन्यायेन स्वजनके कर्मणीष्टः स्वजनकत्वनियमेनाप्रसिद्ध्य-
भावात् मिथ्यास्तु इष्टोत्पत्तिनान्तरीयकनरकदुःखाजनकत्वमेतस्यार्थ इति नाप्रसिद्धिरित्याहुः नन्वेवं स-
ति नरकसाधनत्वेन प्रतीतेः परदाराभिगमनादौ रागोत्कट्यान्न प्रवर्त्तेत इष्टोत्पत्तेर्नान्तरीयकदुःखजन-
कत्वेन तस्येति स्व्यादित्यत आह बलवद्द्वेषेति द्वेषे बलवत्त्वं जातिविशेषः अत एव रागान्धस्य परदारग-
मनादिजन्यदुःखे न तादृशो द्वेषः तदा तद्धेतावपि प्रवृत्तिः साध्यत्वसाधनत्वयोर्विरोधमुपपादयति
स्वायक्षणावृत्तित्वविशिष्टस्य पाकादेरित्यर्थः सिद्धस्य नाशक्षणवृत्तित्वविशिष्टस्य कृत्यव्यवहितोत्तर-
क्षणसंबन्धित्वघटितस्य कृतिसाध्यत्वस्य पाकोत्पत्तिक्षण एव पाककृतिना कालान्तरभाव्योदनादिफलं
साधनत्वस्योदनाव्यवहितपूर्वक्षणसंबन्धित्वघटितस्य चोत्पत्तिक्षणे पाककृतिनानयोरेकक्षणावच्छे-
देनैकवृत्तित्वरूपविरोधादिति भावः यद्यपि कालान्तरभाव्योदनाव्यवहितपूर्वक्षणवृत्तिनावृत्तिना व-
च्छेदकधर्मवत्त्वमोदनत्वसाधनत्वमाद्यक्षणवृत्तित्वविशिष्टेपि पाकादौ संभवतीति कथं विरोधः।
तथापि स्वरूपयोग्यमिदं तत्फलोपधायकमिति ज्ञानात् प्रवृत्त्यनुदयेन फलोपधायकत्वरूपेष्टसा-
धनत्वज्ञानस्यैव संशयसाधारणस्य प्रवृत्तिकारणत्वं वाच्यं पूर्वोक्तफलोपधायकत्वं चाद्यक्षणाविशि-

मु॰टी॰ ष्टस्वर्गादौ न संभवतीति भवः साध्यत्वसाधनत्वयोर्विरोधं व्युत्पाद्यते यावेकज्ञानविषयत्वेन संभवतीत्यह
१३५ न चैकमेकेनेकदेति शाब्दाप्रवृत्तिर्यदार्थस्वभावच्छेदकेन वा हि ज्ञानं न संभवति मूले ष्टदः कपी
संयोगीत्येव प्रतीतेः यथा च साध्यत्वसाधनत्वयोरपि स्वभावच्छेदकासिद्धत्वविषयकमसिद्धः पाकः कृ
135 तिसाध्यः सिद्धश्च पाक इष्टसाधनमिति ज्ञाने समूहालंबनरूपं वाच्यं तच्च न संभवति सिद्धत्वासिद्धत्व
ज्ञानयोः परस्परं विरोधित्वादित्याभिः मानः तस्मात्कालभेदादिति न चेदानीमसिद्धः पाकः कृतिसाध्यः
अग्रे च सिद्धः पाक इष्टसाधनमिति ज्ञानादेव प्रवृत्तिरस्त्विति वाच्यं इदानीतनाग्रेतनकालयोरननुगमा
त् प्राणित्वस्यापि पुरुषविशेषणत्वेनाहमिदानीतन कृतिसाध्यविषभक्षणः प्राणित्वादित्यनुमिति
संभवात् विषभक्षणसाधारणांश्च विशेषणवत्ताप्रतिसंधानजन्यकार्यताज्ञानमिति बलवद
दनिष्टाननुबंधीष्टसाधनताशो वा यन्यतरलिंगप्रतिसंधानजन्यकार्यताज्ञानं प्रवर्तकं वाच्यं
न द्वेषत्तु यावलदनिष्टाननुबंधीष्टसाधनत्वप्रो चा यन्यतरलिंगप्रतिसंधानजन्यकार्यताविषय
ककार्यताज्ञानमिति लब्धमिति तदेव काम्यनित्यसाधारणकारणत्वेन कल्प्यत इत्याभिप्रायेणाप्रा
भाकरमतं दूषयति मैवमिति साध्यत्वसाधनत्वयोर्विरोधं दूषयति न चेति नहीत्यर्थः यदा कदाचि १३५

दियत्किंचित्कालीनत्वस्य साध्यत्वस्य यत्किंचित्कालीनेन साधनत्वेनाविरोधाभावादित्यर्थः तथा चैककाली
नकृतिसाध्यत्वेष्टसाधनत्वयोर्विरोधेपि न क्षतिः। तथा ज्ञानस्यास्माभिः करणत्वानंगीकारात् किंतु निर्वि
शेषपितयोः सामान्यतः कृतिसाध्यत्वेष्टसाधनत्वयोर्ज्ञानस्यैव हेतुतांगीकारादिति भावः तादृशं च
ज्ञानं संभवतीत्याह एकदेति इदं च ज्ञातान्वयिज्ञानमात्र ज्ञानसंभवात् मूलायनवगाहितेपि दृष्टः सं
योगीतिज्ञानुभविकतया अव्याप्यवृत्तेर्ज्ञानस्यावच्छेदकविषयकमेवेतिनियमाभावान्न पूर्वोक्त
दोष इति ध्येयं प्राभाकरमतमाह नव्यास्त्विति ज्ञातुमशक्यत्वादिति सामान्यलक्षणप्रत्यासत्त्यनंगीकारे
णाग्रन्यतस्यपक्षज्ञानाभावेनानुमितेरसंभवादिति भावः तदभावात् यादृशस्य पुंसः कृतिसाध्य
दृष्टांतादृशत्वज्ञानाभावात् ननु इष्टसाधनताज्ञानस्य प्रवृत्तिजनकत्वे भाविवि यौवराज्ये प्रवृत्त्यापत्तिरि
नकत्वभाविवि यौवराज्ये प्रवृत्त्यापत्तिरत आह इदं त्वबोध्यमिति इष्टसाधनत्वादीन्यत्रादिपदेन गृहीते
ह्यानीतनकृतिसाध्यत्वघटककृतौ इदानीन्तनत्वविशेषणस्य प्रयोजनमाह नेनु भावीति इष्टसाधन
त्वघटके च्छाया तद्विशेषणस्य प्रयोजनमाह एवं त्वमिति बलवदनिष्टस्य च बलवद्द्वेषेण तद्विशेषणस्य
प्रयोजनमाह प्रवर्त्तते चेति प्रवृत्तो प्रवृत्तः पूर्वं नकसाधनत्वज्ञानादिति नरकत्व पवलवदनिष्टसाधनत्वज्ञा

मु॰टी नादित्यर्थः उत्कटरागादिनेति अगम्यागमनादिजन्यसुखे उत्कटरागादिनेत्यर्थः नरकेति बलवदनिष्टेत्यर्थः
२३८ त्तिबाधानात्र अनुत्पादनात्र ताहृशसुखे उत्कटरागसत्वे गम्यागमनजन्यनरके बलवद्द्वेषानुदयादिति भा
वः प्रवृत्ति इयेति स्वेच्छाधीनकृतिसाध्यताज्ञानस्य हेतुत्वाद्विमरणोत्कल्पतेऽपि स्वेच्छाधीनत्वं कृतिविशेषणा
138 णाम् प्रवृत्तिरूपकृतिलाभायैवेतिभावः कृतिसाध्यताज्ञानमित्यत्र प्रवृत्तित्वेन प्रवेशोऽत्यर्थः इत्थं च तत्ताया
रोम्न्‌ताइच्छाप्रवृत्तिसाध्यत्वप्रकारकाबाध्याज्ञानेच्छयोः समानप्रकारकत्वेन हेतुमत्त्वाद्वादिति तेन प्रवृत्ति
त्वेन निवेशेन प्राणपंचकसंचारेण प्रवृत्तिरिति तेन च प्राणानाममतीन्द्रियतया तदुपादानप्रत्यक्षाभावेन प्रा
णोपादानकसंचारसाध्यकप्रवृत्त्यापत्तिरिति वाच्यं प्राणवहनताजन्योपादानकप्राणसंचारसाध्यकप्रवृ
त्त्यापत्तिवारणायैव प्रवृत्तिसाध्यताज्ञानहेतुतावांगीकारात्स्वयपि प्राणसंचारादावपि विशेष्यतासंबंधेन
कृतिसाध्यताज्ञानहेतुत्वांगीकारादेव तत्र प्रवृत्तिवारणं संभवति तथापि चेष्टादौ जीवनयोनियत्न
साध्यत्वस्य प्रवृत्त्यापत्तिवारणाय प्रवृत्तिसाध्यताज्ञानत्वेन हेतुत्वमावश्यकमिति ध्येयं यत्नेन प्राणसं
चारे प्रवृत्तिवारणाय प्रवृत्तिसाध्यताज्ञानस्य हेतुत्वेऽपि प्रवृत्तिसाध्यत्वस्य प्राणसंचारे प्रवृत्त्यापत्तिर्दुर्वा
रेत्यपास्तं न च प्रवृत्तिसाध्यताज्ञानस्य हेतुत्वेऽपि भोजनानन्तरीयकत्वस्य साध्यतया प्रवृत्त्यापत्तिर्दुर्वारेति वा

त्वं नातृप्तश्चाश्रमे चिकीर्षाविरहादेव प्रवृत्त्यनुपपत्तेः तत्रापि चिकीर्षाविरहः श्रमस्य दुःखस्य द्वेषतया दुःखत्वज्ञा
नस्येच्छाप्रतिबंधकतया इच्छासामान्यसामग्रीविरहादेव एतेन नांतरीयकश्रमे प्रवृत्तिवारणाय स्वेच्छाधीन
कृतिसाध्यताज्ञानस्य हेतुत्वं वा वाच्यमिति मणिकृन्मतमप्यपास्तं न च सुखे प्रवृत्तिसाध्यताज्ञानेच्छयोः सत्वात्तत्र
साध्यताख्यविषयतासंबंधेन प्रवृत्त्यापत्तिरिति वाच्यं साध्यतया प्रवृत्तिं प्रति फलत्वज्ञानस्य प्रतिबंधकत्वात्
वस्तुतस्तु तत्तद्धर्मावच्छिन्नप्रवृत्तिविषयतासंबंधेन ज्ञानं प्रति तत्तद्धर्मभेदस्य हेतुतायास्तत्र तत्र व्यवस्थापितत्वा
त्तत्र चायं तावच्छेदककोटौ ज्ञानत्वस्थाने गुणत्वमेव निवेशनीयं एवं च सुखत्वावच्छिन्नप्रवृत्तिविषयतासंबंधेन
गुणत्वस्य कृतिसाध्यताज्ञानजन्यतावच्छेदकीभूतयत्साध्यताख्यविषयतासंबंधेन प्रवृत्तित्वेन व्यापक
तया तदवच्छिन्नजनकत्वस्य सुखत्वे अभावादेव तत्र साध्यतया प्रवृत्त्यापत्तिः व्याप्यधर्मावच्छिन्नजनकसामग्र्य
फलजनने व्यापकधर्मावच्छिन्नजनकसामग्र्या अपेक्षितत्वात् अनयैव रीत्या प्राणसंचारत्वे श्रमत्वे च सा
ध्यताख्यविषयतावच्छेदकतासंबंधेन प्रवृत्तिवारणं बोध्यं एतदेव हृदि निधाय प्राणसंचारस्य प्रवृत्त्युपा
यत्वादेव न तत्र प्रवृत्तिरिति मिश्रैरभिहितमिति दिक् इत्थं चेति प्रवृत्तिं प्रति इष्टसाधनताधियो हेतुत्वे
चेत्यर्थः इष्टसाधनताधीत्वादिना बलवदनिष्टाननुबंधित्वकृतिसाध्ययोः परिग्रहः अत एव निष्फले प्रवृ

मु॰टी॰ ष्टिभावादिष्टसाधनत्वस्येष्टसाधनेपि मधुविषसंपृक्तान्नभोजने प्रवृत्तेर्बलवदनिष्टाननुबंधित्वस्य कृतिसाध
१३६ नत्वादिकं विधेयर्थ इति भावः ननु भाविवियोगवराज्यादौ प्रवृत्तेर्वारणाय इदानीं तनकृतिसाध्यत्वाज्ञानादिः प्रव
र्तकत्वं वाच्यं तच्च न विधिवाच्यात् ततः शाब्दं कृतिसाधनत्वप्रकारज्ञानस्यैवोत्पत्तेरिति कथं प्रवर्त्तकं ज्ञानं
137 विधिनेति अत्र ब्रूमः इति न विधिस्तस्मात्तात्प्रवर्तकं ज्ञानमुत्पादयति किं तु विधिवाक्यादिष्टसाधनत्वेकृ
तिसाध्यत्वे चावगते किमिष्टमित्याकांक्षायां स्वर्गकामादिपदसमभिव्याहारात्स्वर्गसाधनमिति ज्ञान
मानुमानिकमानसं वोत्पद्यते अन्यथा विशेषदर्शनेन फलज्ञानाभावात्प्रवृत्त्यनुपपत्तेरेवमिदानींतनत्वं
तन्मावेशात्कृतिसाध्यत्वादिज्ञानमानमात्मिकमिति अतएवाप्रमाणीकृतापवं विधिजन्यज्ञानजन्यज्ञानं
प्रवर्तकमिति अत्र भट्टपादाः लोके प्रवृत्तिर्द्वेधा स्वेच्छाधीना परप्रेरणाजन्या च तत्राद्यायां प्रवर्तनाया
अनुप्रयोगे द्वितीयप्रवृत्तौ प्रयोजिका आचार्यप्रेरणया इदं करोमीति व्यवहारात् प्रवर्तनाच प्र
वर्तयितुः प्रवृत्त्यनुकूलो व्यापारविशेषः स च चेतनेन स्वाभिप्रायः एव अचेतने तु शब्दे स्वाभिधीना मूकः
काञ्चिच्छब्दधर्मवेतेः तथा चाचार्याभिप्रायज्ञानवद्यथा शब्दात् प्रवर्तते तथा अभिधाज्ञानाद्विधिस्थले
प्रवृत्तिरिति सैव लिङ्गांशेनाचाते अर्थभावनाव्याख्यानत्वांशेन तदङ्गं अभिधाभावनामाहुरन्यामेव १३६

लिङादयः अर्थात्मभावना अर्थो यागादिरात्मा वा अर्थात्मकत्वं चार्थगोचरत्वमर्थाश्रयत्वं वा तथा च
यागादिगोचरा आत्माश्रिता प्रवृत्तिरर्थभावना या अर्थभावनैव भाव्या अर्थभावनाया स्वर्गफलं स्वर्गा-
दीति बोध्यं तदुक्तं लिङोभिधा सैव च शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः संबंधबोधः करणं तद
र्थमरोचना चांगतयोपयुज्यत इति अस्यार्थः लिङोभिधा व्यापारः तस्याः किं भाव्यमित्याकांक्षायामुक्तं भा
व्यं तस्या इति केन भावयेत्याकांक्षायां संबंध इति संबंधबोधः लिङादिपदशक्तिज्ञानेन तच्चालस्येन निवर्त
मानं पुरुषं प्रवृत्तिं कर्तुं जयतीति तस्याः सहकारिणीत्याह प्ररोचना चेतीति वदन्ति ननु लोके सेच्छावान प्रवृ
त्ताविष्टसाधनताज्ञानस्य हेतुत्वेन क्लृप्तत्वादन्यत्रापि प्रवृत्तौ तदेव हेतुरस्तु किमतिरिक्तप्रवर्तनाज्ञा
नस्यातिरिक्तहेतुत्वेन अत एव वेदेपि न प्रवर्तनाज्ञानं हेतुः शब्दशक्तिर्मिन्नयामभिधायामानाभावाच्च
अत एव मंडनमिश्राः पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः प्रवृत्तिहेतुं धर्मं च प्रवदंति प्रवर्त
नां इत्यादिना प्रवृत्त्यनुकूलत्वेन इष्टसाधनत्वमेव प्रवर्तनेत्युक्तवंतः ननु वाविष्टप्रजितायजेतेत्यादौ फ
लाश्रवणेनेष्टसाधनताज्ञानाभावात् प्रवृत्तिर्न स्यादत आह इष्टसाधनत्वादेर्विध्यर्थत्वे वेत्यर्थः
ननु न तेन संध्योपासनादौ फलाभावादिष्टसाधनताज्ञाने प्रवर्तकं न वा तद्विषयो विध्यर्थः इत्यभिप्रा

म॰टी॰
१३८
138

येनाशंकते नाविति नचार्थवादिकमिति मेधामुपासतेयेनुमनतेमंशितव्रताः विधूतपापास्तेयोनिधूतमलो
केस्मनातने इत्यर्थवादबोधितमित्यर्थः नित्यवद्धान्नायतेरिति नित्यवकाम्यवयोर्विरोध इत्यभिमानः न
नुतयोर्विरोधमानावः अहरहः मेधामुपासीतेत्यादि श्रुतेः मेधामुपासीत इत्यर्थः वादयोरेकवा
क्यतावलेनतत्कालजीविफलकामस्यमेवेधितनाधिकारः कल्प्यत इत्यत आह कामनाभाव इति
प्रकरणापतेरिति प्रकरणप्रत्यवायानुत्पत्त्यायतेरित्यर्थः कामनाद्व्याधिराभावादनधिकृतोक
रणस्य प्रत्यवायाजनकत्वाभावादितिभावः ननु तथापि नित्यस्य्लीयफलश्रुतेर्वैयर्थ्यमित्याशं
कार्थवादत्वया स्तुतिमात्रेतात्पर्येकल्प्यत इत्याशंक्य नकल्प्यत आह इत्थं चेति कल्पनादिति इद
मुपलक्षणं अर्थवादोपास्थितकामना अधिकारत्वेपि अकुर्वन्विहितकर्मेत्यादिनाशौचेसतिवि
हितानुष्ठानस्य प्रत्यवायजनकत्व बोधनात्कामनासंवलितस्याशुचित्वादेर्नाधिकरणं किंतु नित्यस्य
लेफलकामनाशुचित्वयोरधिकारयोः संवलने तथा च कामनाविरहेपि अशुचित्वाधिकारसत्वा
न्तदासेधाधिकरणस्य प्रत्यवायजनकत्वमेव कामनायाअधिकारत्वेनरधिकारवत्वशौचादिवि
रहिणः मेधायकरणस्य प्रत्यवायजनकत्वनकल्प्यते अशुचितकालजीविवत्व्याधिकारेकदेशव

तोप्यकरणेप्रत्यवायजनकत्वकल्पनेनसंवलिताधिकारत्वेपितत्तन्निमित्तविरहात्त्रैत्यापिष्ठ एतेनन्न
नियमेनफलकामनायाससत्वेमानाभावेनतत्तिरिति ननुनित्यगोचरप्रवृत्त्यादिष्टसाधनताज्ञानंका
रणमेवेनित्यनैनैवोपपत्तौकिमर्थंनित्यस्यापिकाम्यत्वंकल्पनीयमतआह नान्वितितत्त्वेष्टसाधनत्व
मिति अन्वयव्यतिरेकाभ्यांप्रवृत्तिनावच्छिन्नंप्रतीष्टसाधनताज्ञानस्यहेतुत्वादितिभावः अतएवकुसु
मांजलौसंध्योपासनमफलमपिक्रियतेवेदबोधितत्वादित्याशंक्यगुरुमतमेतन्नगुरोर्मतमित्यभिधा
येबोधेप्सितमाचार्यैः यच्छ्रूयतेऽपूर्वंस्वतःप्रयोजनंनित्यस्यकर्मणइतिप्राभाकरमतंतद्दूषयति
यद्यपीतिकामनाभावेपश्वादिस्वर्गवत्फलकामनाभावे रात्रिसत्रन्यायादिति तथाहिरात्रिसत्रश
ब्दशब्दवाच्यानांज्योतिर्गौरित्यादिवाक्योत्पन्नकर्मणांफलजिज्ञासायामनुक्तत्वात्स्वर्गादिकल्पने
गौरवाद्विश्वजिन्न्यायायवादेनप्रतितिष्ठन्तिहवायएतारात्रीरुपयन्तीत्यर्थवादश्रुतप्रतिष्ठैवफ
लमितिसिद्धान्तितं तथात्राप्यार्थवादिकंब्रह्मलोकएवफलंलाघवादित्यर्थः अन्यथाफलाभाव
तेनअर्थकामादिकफलकल्पनेलाघवेननत्रार्थवादिकंफलंप्रदर्शयति अनुत्पत्तिमित्यादिनाश्रुत
एवयत्नप्राप्तेः प्राप्तफलत्वादेवउत्सर्गयतीति प्रत्यवायादिफलस्यतेमात्रगततेन्तुव्यभिचाराभावात्

मु॰टी॰
२३९
139

यमेव स्यादिति भावः यदापूर्वं स्मिन्कोऽपि तत्साधनताज्ञानस्य प्रवर्तकत्वं संभवतीत्याह यदापूर्वं वी[illegible]ति
न वा तत्साधनमिति तथा चेच्छाविषयत्वाभावेन फलत्वाभावान्न तत्साधनज्ञानं प्रवर्तकमिति भावः
ननु त्वन्मते विघ्नप्रत्यवायानुत्पत्तेः कथं फलत्वमतः पुरुषार्थत्वाभावात् न वा दुःखानुत्पत्तिरूपपु
रुषार्थसाधनत्वेन तत्रेच्छाविषयत्वे दुःखानुत्पत्तेः प्रागभावरूपायास्तदजन्यत्वादित्याशंक्य परि
हरति प्रत्यवायेत्यादिना अनुत्पन्नाविघ्नदुःखप्रकत्वं सप्तम्यर्थः कथं प्रवृत्तिरिति पूर्वोक्तरीत्या प्रत्य
वायानुत्पत्तेः फलत्वाभावेन तत्साधनताज्ञानस्य प्रवृत्तिहेतुत्वात्संध्यावंदनादौ कथं प्रवृत्तिरि
त्यर्थः प्रत्यवायाभावः प्रत्यवायप्रागभावः तदभावे संध्यावंदनादिनित्याभावे तदभावः प्रत्य
वायाभावस्याभावः तदभावे प्रत्यवायाभावस्याभावे तदभावः दुःखप्रागभावो दुःखरूपः यो
गक्षेमसाधारणेति योगः अप्राप्तस्य प्राप्तिः क्षेमः सिद्धस्य संरक्षणं प्रवृत्तिं प्रतीष्टसाधनताज्ञान
स्य हेतुतायां साधनतायाः क्षेमसाधारण्या एव प्रविष्टत्वादिति भावः प्रागभावस्य प्रत्ययोगि वि
कल्पग्रासेन फलत्वासंभवात्प्रत्ययान्यनाभाव एव नित्यस्य फलत्वरूपसंबंधविशेषात्मक
क्षेमसाधारणजन्यतायाः अन्यताभावे सत्त्वादिति नव्याः एवमेव योगक्षेमसाधारणमेव २३९

ननु न कलंजमिति अत्र कलंजभक्षणाभाव इष्टसाधनमित्यन्वयबोधाभ्युपगमे बाधकाभावोत्राह
विध्यर्थे कथं नञर्थैति विध्यर्थनञर्थयोः कथमन्वयः विध्यर्थेष्टसाधनत्वाद्यन्वितेन नञर्थस्याभावस्य
कलंजभक्षणे कथमन्वय इत्यर्थः अशक्यत्वादिति कलंजभक्षणेनस्य बाधादिति भावः बलवदनि
ष्टाननुबंधित्वमात्रमिति विधेः कृतिसाध्यत्वादित्रितयशक्तिस्वीकारेण क्वचित्कस्यचिदर्थ
स्य बोधस्वीकारादिति भावः प्रवृत्तिप्रति कृतिसाध्यत्वविशिष्टबलवदनिष्टाननुबंधित्वविशिष्ट
साधनत्वज्ञानत्वेनैकमेव हेतुत्वं लाघवात् न तु कृतिसाध्यत्वादिप्रत्येकविषयकज्ञानत्वेन गौरवा
दतो विधेरपि विशिष्टमेव शक्यं वाच्यं एवं च निषेधस्थलेपि विशिष्टाभावो विधिसमभिव्याहृतनञ
जाबोध्यत्वइत्याभिप्रायवानाह अथवेति विशेषणाभावप्रयुक्तस्यानीति भावः विशिष्टस्य विध्यर्थ
त्वे श्येनेवदवदनिष्टाननुबंधित्वादिति तत्र विशेषणबाधात्कथं विशिष्टस्य बोध इत्याशंकते ननु श्येने
नेति श्येनेति कर्मनामधेयं अभिचरन् वैरिमरणं कामयन् कथमिति श्येनेनस्य बाधितत्वादितिभा
वः अथ विधिजन्यबोधविषयः वैधत्वान्न निषेध इतीति यज्ञीयपशुालंभनानुरोधेन माहिंस्यादि
ति निषेधस्य वैधहिंसापरत्वादिति भावः अभिचार इति तथा च अभिचार इति तथा च अभिचार

मु·टी· ९७· महीनेचान्द्रिभिः कृच्छ्रैर्वा योऽहन्तीति तत्र प्रायश्चित्तोपदेशवैयर्थ्यापत्त्या निषेधविधिस्तदतिरिक्तपरत्वं
न सम्भवतीति भावः नचैवं यज्ञीयपशुहिंसायाः अपि प्रत्यवायजनकतापत्तिरिति वाच्यं अनुपदि-
ष्टप्रायश्चित्तहिंसेतरहिंसापरत्वान्माहिंस्यादिति निषेधविधेः साक्षान्मरणानुकूलव्यापारत्वं हिं-
साहिंस्येन लक्ष्यते इति माहिंस्यादिति निषेधाविषयत्वादस्य च बलदेति इष्टा ननु वधित्वमित्यभिप्राये-
ण साक्षात्परंपरासाधारणमरणानुकूलव्यापारमात्रस्य हिंसात्वे दोषमाह मरणानुकूलव्यापार
मात्रं यदि हिंसा तदेति साक्षात्परंपरासाधारणः सर्वोऽपि व्यापारो यदि हिंसा तदेति साक्षात्परंपरा-
साधारणः सर्वोऽपि व्यापारो यदि हिंसा तदेत्यर्थः ननु मरणोद्देश्यकत्वं विशेष्योद्देशेन प्रवृ-
त्तानां चेन यत्र ब्राह्मणमृतिस्तत्र प्रायश्चित्तेन स्यात् तस्य हिंसात्वेन माहिंस्यादिति निषेधाविष-
यत्वादत आह अन्योद्देश्यकेति यावनिकमिति ननु माहिंस्यादिनिषेधविषयत्वेति भावः अदृष्टा-
द्वारकत्वेनेति श्येनस्यादृष्टद्वारैव वैरिमरणसाधनत्वादिति भावः ननु श्येनस्य हिंसात्वं किमदृ-
ष्टाद्वारकविशेषणेनेत आह अदृष्टाद्वारकत्वविशेषणादेवेत्यर्थः नु हिंसात्वमिति तथा च तादृ-
शाभिचारजनकहिंसात्ववारणायावश्यकेनादृष्टाद्वारकत्वविशेषणेन श्येनस्यापि हिंसात्ववारणा ९७·

मितिभावः ननु साक्षात्मरणजनकत्वविशेषणादेवतादृशशिवप्रजनश्येनादेर्वारणे किमुद्दिश्याहार्यक
त्वेन गुरुविशेषणेनेतितदर्थ्यः शंकते नच साक्षादिति अग्रहस्त्याहारकत्वविशेषणं विनैव श्येनेव
लवदतिप्रा ननु वेधितमुपपादयतां मतमाह केचिदिति हिंसाफलमिति साक्षात्मरणजन
कोव्यापारः फलमित्यर्थः तस्य खड्गादिघातादेः पापजनकत्वमिति अभिचारमहीनेचेत्यादिना
अभिचारस्य पापजनकत्वबोधनकत्वमिति अभिचारमहीनेचेत्यादिना अभिचारस्य पापजनक
त्वबोधनात्साक्षात्मरणजनकत्वव्यापारस्यैवाभिचारपदार्थत्वादिति भावः नच पूर्वं नचेत्यादिना
साक्षात्मरणजनकव्यापारस्यैव हिंसात्वमित्याशंकितं वा तेन येन रूढत्वमिति वाच्यं पूर्वं साक्षा-
त्मरणजनकस्य श्येनजन्यापूर्वस्य हिंसात्वमाशंकितमिह तथाभूतस्य खड्गाभिघातादेरितिभे
दात् नचादिपदेन श्येनजन्यापूर्वस्य तथाभूतस्य ग्रहणात्कथं भेद इति वाच्यं श्येनजन्यापूर्वस्येत
त्मते खड्गाभिघातादेरितिभेदात् नचादिपदेन श्येनजन्यापूर्वस्य तथाभूतस्य ग्रहणात्कथं भेद इति
वाच्यं श्येनजन्यापूर्वस्यैतन्मते खड्गाभिघातप्रत्येव व्यापारत्वेन तस्य मरणजनकत्वाभावात्
नच साक्षात्मरणजनकव्यापारस्य हिंसात्वे खड्गघातेन प्रत्मणे व्रणयाकपरंपरया मृते हिंसात्वा

मु.टी.

१४२

/१४|

लघ्वपत्तिस्तदवस्थैवेति वाच्यं तत्र खञ्जयातनायुतत्वमेव सन्निपातादिदोषस्तोत्पत्या मरणं प्रति तस्य व्यापा
रतया व्यापारेण व्यवधानासंभवात् कुतस्तस्यास्तिकानां श्येनप्रवृत्तिरत आह अग्निमेति तथा च
पापप्रयोजकत्वान्न तत्रास्तिकानां प्रवृत्तिरिति भावः अत्र नव्याः मास्तु श्येनस्य मा हिंस्यादिति निषेधविष
यत्वं तथाप्यभिचारतया पापजनकत्वं सर्वसंमतं अभिचारस्योपपातकमध्ये मनुना परिगणितत्वा
दिति कथं तस्य बलवदनिष्टाननुबंधित्वं यच्चोक्तं श्येनजन्यखञ्जाभिघातोद्देश्यत्वाभिचारतया पाप
जनकत्वं न श्येनस्येति तदपि न अभिचारमहीनेचेन्नत्राभिचारेण यत्र न खञ्जयातनायुतत्वमितिस्तत्र प्राय
श्चित्तं तस्मात् एवमपि श्येनस्य पापप्रयोजकतया बलवदनिष्टप्रयोजकत्वापवादतस्याशक्यत्वात् च
प्रवृत्तिं प्रति बलवदनिष्टाप्रयोजकत्वान्न सेवजनकतया तद्विषयस्यैव विध्यर्थत्वात् तथा च श्येन
स्य बलवदनिष्टाननुबंधित्वमपपाद्य विधेर्बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वविशिष्ट
कृतिसाध्यत्वे शक्तिरयुक्ता तथा च श्येनस्य बलवदनिष्टाननुबंधित्वमपपाद्य विधेर्बलवदनिष्टा
ननुबंधित्वविशिष्टेष्टसाधनत्वविशिष्टकृतिसाध्यत्वे शक्तिरयुक्ता किंत्विष्टशक्तित्रये सा कल्प्यता क्व
चित् कस्यचिदर्थस्य बाधकत्वं अंगीकरणीयं श्येनेतिन्यायादौ तत्र बलवदनिष्टाननुबंधित्वस्य बाधात्

भवत्येव परंरेतिष्टसाधनत्वकृतिसाध्यत्वयोरेवेति किंतु विशेषणविशेष्यभावे विनिगमनाविरहेण
यिविशिष्टशक्तिर्न युक्ता नच प्रत्येकं शक्तिमपि प्रत्येकत्वाचिन्तकस्य चिद्दर्शस्य वोधोपगमे नियामकाभा
वइतिवाच्यं नान्यथैसेवनियामकत्वात् प्रत्येकशक्तिपक्षे अगम्यां गच्छेदित्यादिवाक्यानामिष्टसाध
नत्वादिप्रमाजनकतया प्रामाण्यापत्तिरित्यपि न इष्टापत्तेः तत्राप्रामाण्यव्यवहारस्तु कदाचिद्बल
वदनिष्टाननुबंधित्वभ्रमजनकत्वनिबंधनः नच बलवदनिष्टाननुबंधित्वे सतीष्टसाधनत्वे सति कृ
तिसाध्यः पाकइत्येववोधान्न तु कृतिसाध्यत्वे सतीत्यादित्रयम् इति विशिष्टशक्तिपक्षेऽपि विनिगमनाविरह इति वाच्यं
तथैववोधेनान्यथैत्यस्यस्याश्रयथातिरोधायकत्वात् तस्माद्बलवदनिष्टाननुबंधित्वादिषु प्रत्येकं शक्तिरिति प्र
थमकल्प एव युक्तः न चापि बलवदनिष्टाननुबंधित्वादिषु प्रत्येकं शक्तिरिति प्रथमकल्प एव युक्तः न चापि
बलवदनिष्टाननुबंधित्वे नार्थः यागादिजन्यत्वेन नरकदुःखस्यापि यदाकदाचिद्यस्यचिद्बलवद्द्वेषवि
षयतया यजेतेत्यादीनामप्रामाण्यापत्तेः न कलंजमित्यादिनिषेधविधिवदश्वमेधेन यजेतेत्यादीनामप्रा
माण्यापत्तेः न कलंजमित्यादिनिषेधविधिवदश्वमेधेन यजेतेत्यादीनामपि प्रामाण्यापत्तेस्तु अश्वमेधादेर्य
दा यः पुरुषः प्रवर्तते तत्कालीनतत्पुरुषीयबलवद्द्वेषप्रयोजनकत्वमर्थ इति तत्समत्कालभेदेन पुरुषभे

देन च विधिशक्तिकल्पने गौरवात् कालविशेषपुरुषविशेषाणां विशिष्याज्ञातुमशक्यत्वात्तया कालवि
शेषविपुरुषविशेषान्तर्भावेणाशङ्केऽङ्ग्रहत्वाच्च नाश्वमेधेन यजेतेत्यादिनिषेधविधिवत्कलञ्जं भक्षये
दितिनिषेधविधीनामप्रामाण्यापत्तेश्च न चैवं दायः पुरुषः प्रवर्तेत न कालीनतत्पुरुषीयबलवद्द्वेष
विषयाजनकत्वस्यासत्वात् किन्तु वैदिकविधेः पापजनकत्वस्यासत्वात् किन्तु वैदिकविधेः पापजनक
त्वमर्थः तदभावपक्षे त्वत्कलञ्जं भक्षयेदित्यादौ पाकेन भुञ्जीतेत्यादिवाक्यस्याप्रामाण्यनिर्वाहाय पुरोगा
जनकत्वमर्थः एवं पुण्यपनोदहेतुकः एवं तमारोहेदित्यादावपि न तदनिष्टाजनकत्वमर्थो बोध्यः न च
शक्यानां त्वं नरकत्वरोगत्वानां द्वेषविषयतावच्छेदकत्वेनोपलक्षणीभूतेनानुगम्यत्वात्तद्वान्हि न प्रति
योगिनाकाभावकूटे एकशक्त्यनुपगमात् रोगादिजनकत्वादौ लौकिकलिङोऽलक्षणाभ्युपगमाद्धेतिव
देतिविध्यर्थास्वामाभिप्रायः स च बलवदिष्टसाधनतानुमापकः इष्टसाधनताज्ञानं च प्रवर्तकमित्युद
यनाचार्यमतमाह आचार्यास्त्विति पाकं कुर्यादित्यादिना पाकं कुर्यामित्युत्तमपुरुषपरिग्रहः आज्ञा
दीत्यादिना अध्येषणादिपरिग्रहः तथा च पाकं कुर्याः पाकं कुर्यामित्युत्तमपुरुषयोराज्ञाध्येषणाद्येप
क्षावाचित्वं लक्ष्यं तदृष्टान्तेन प्रथमपुरुषेऽपीच्छावाचित्वमनुमेयमिति भावः लाघवादिति बलवद् १५२

निष्टाननुबंधीष्टसाधनत्वाग्रयेत्तयाइष्टज्ञानेनविधिशक्तौलाघवादित्यर्थः इतिबोधः न प्रथमोनयदोषस्याप्य
स्याप्यानयदोषस्याप्यस्याप्यानार्थविशेषत्वनियमाख्यातार्थत्वानुकूलत्वविषयत्वान्यतरसंबंधेनधात्वर्थ
विशेषत्वनियमात् कथमाख्यातपदोपस्थाप्यस्यस्वर्गकामादेराख्यातार्थस्यचधात्वर्थेनयः अन्यथा चैत्रः
पचतीत्यादावपिचैत्रवृत्तिकृतिसाध्यः पाकइत्यन्वयबोधायनितिनिचेदन्यत्रनथानियमस्यत्रमुत्यनिवेचित्रादिति
गृहाण अतएवेष्टसाधनत्वपक्षेपिप्राचीनाः स्वर्गकामकृतिसाध्यस्वर्गसाधनंयागइतिबोधमङ्गीकुर्वन्तीत्य
नुमापयेति अत्रचयागोममस्वर्गकामस्यबलवदनिष्टाननुबंधीष्टसाधनंमत्कृतिसाध्यतया आप्तेनेष्यमाण
त्वात् मत्कामात्कृतिसाध्यत्वेप्यमानमज्ञोजनवदित्यनुमानमवधेयं तदभावात् आप्तेष्टत्वाभावे नतदिष्ट
ष्टसाधनत्वज्ञानाभावात् ननुवेदवक्तुरभावात्कस्येच्छालिङ्गाबोधनीयेत्यतआह यस्मिन्निति विधिरिवेतिवक्तृ
विभिन्नेच्छायाबोधनेः सामर्थ्याभावाद्विधिरिववेदवक्तरि ईश्वरेमानमितिभावः नचकर्तुस्मरणमितिकर्त
वेदकर्तुरस्मृतिभिरबाधनं तथाचवेदेपौरुषेयोऽस्मर्यमाणकर्तृत्वादित्यनुमानेबाधकमित्यर्थः कपिल
करणइति कपिलकणादगौतमादिभिस्तत्कर्तृत्वेनस्वीकारपर्यन्तमित्यर्थः कर्तृस्मरणस्यसकर्तृकत्वबोध
कत्वेतिरित्यर्थः ननुईश्वरस्यवेदवक्तुःसर्गादौकेनचिन्मात्राद्दृष्टत्वादनवमवेक्ष्मरण तदभावेऽप्यर्षीणामस्म

त्तिप्रणायनेचनसंभवति इतिचेन्नपौरुषेयत्वानुमानेनवेदकर्तारमनुभूयतन्नत्वाकस्मरणात्तत्प्रणायन।
योःसंभवात् अन्यथावेदेसकर्तृत्वानंगीकारे तद्वैवस्मृतिष्वेव वेदस्य सकर्तृकत्वस्य निप्रदर्शीयति एवमि
ति ननुवेदस्यनित्यत्वेबाधकंभारतादिवत्तस्याकर्तृकत्वे प्रमाणाभावविघ्नानीत्याशंकते सर्वथा भूरितिनित्यइत्यर्थः
एवंभगवान्नित्यपिदेवविशेषणं स्तुतिमात्रमिति तथाचसर्वज्ञे नित्यत्वोऽविरोधेनास्य भारतस्य नस्वा
र्थेनात्यर्थमपिनस्तुतिपरत्वमितिभावः भ्रमादिसंभवात् पुरुषस्य भ्रमादिदोषसंभवादित्यर्थः नित्यस
र्वज्ञत्वेनेति नित्यसर्वविषयकज्ञानवत्वेनेत्यर्थः निर्दोषत्वात् भ्रमादिप्रमत्वात् अतएवनित्यसर्वज्ञ
त्वाभावादेव ननुनित्यसर्वपुरुषप्रणीतत्वापेक्षयानित्यनिर्दोषत्वंवेदेस्वीकृत्यतदेववेदप्रामाण्यप्रयोज
कमस्तुतथाचसकर्तृकत्वानुमानेबाध इत्यतोवेदस्यनित्यत्वेबाधकमाह किंचेति नन्वेदंभेद्यस्येति ननित्या
नुपूर्वीविशेषस्येत्यर्थः आनुपूर्व्यानित्यत्वेननित्यजातित्वेन आनुपूर्व्याजातित्वापत्तेरितिभावः अत्रचा
नेकाविषयत्वस्यप्रत्येकाविषयत्वरूपस्यैकत्वलाघविनःकल्पनमन्तरेणापिसत्ताद्भलघवनिष्टाननुब
यित्वविशिष्टेष्टसाधनत्वरूपसाध्यवत्त्वाभावेनव्यभिचारात्कथंतस्यतदनुमापकत्वं बलवदनिष्टा।
ननुबन्धित्वविशिष्टेष्टसाधनत्वप्रकारकेच्छायालिङर्थत्वेचलाघवाद्बलवदनिष्टाननुबन्धीष्टसाध ५२

त्वमेव लिङर्थोऽस्तु कृतमापेक्षयेत्यस्य रसेत्याचार्याणामित्यनेन सूचितः । न त्विष्टसाधनत्वस्य न विधिना बोधः संभव
ति स्वर्गत्वावच्छिन्नसाधनत्वस्य योगाबाधात् गंगास्नानादिजन्यस्वर्गव्यभिचारात् स्वर्गनिष्ठवैजात्यावच्छिन्नसा
धनत्वस्य च योगे मतेऽपि तद्वैजात्यस्य विधिना स्वर्गसाधनत्वान्यथानुपपत्त्या कल्पनीयस्य प्रागनुपस्थित्या ने
ष्टत्वेन कारणत्वेन विधिशक्तिग्रहायोगादिति चेन्न स्वत्वप्रायाप्यवकारणतायाविध्यर्थत्वेनायवामादिमैके त्र
न्यथासिद्धिनिरूपकतानवच्छेदकनियतान्त्रवर्तितावच्छेदकधर्मवत्त्वस्वर्गकत्वमेवकारणमित्यन्येव
स्तु नस्तु स्वर्गनिष्ठधर्मावच्छिन्नं नित्यनियतपूर्ववर्तितावच्छेदकधर्मवत्त्वमेव स्वर्गकारणत्वं तत्त्वयोगा
न बाधितं स्वर्गनिष्ठवैजात्यरूपस्वर्गत्वधर्मावच्छिन्नप्रतियोगिकस्य व्यभिचाराभावात् स्वर्गपदस्य विजातीयस्वर्गे
लक्षणेति न दोषः । ननु विधेरिष्टसाधनत्वे शक्तौ पिस्वर्गसाधनत्वस्य कथं तत्त्वतो बोधः स्वर्गसाधनतादौ वि
धिशक्तिकल्पनेन तु शक्त्यानन्त्ये न च विधिप्रत्ययावास्थितः इष्टस्वर्गपदोपस्थितस्वर्गस्याभेदेनान्वयात्स
र्गमित्रेष्टसाधनत्वबोधः संभवतीति वाच्यं स्वर्गपदस्य समासांतर्गतत्वेन यान्तदर्थस्यान्यत्रान्वयासंभवादि
ति चेन्न स्वर्गसाधनतादौ विधेः शक्तिकल्पनेन तथाबोधनिर्वाहात् न चैकैकस्य बोधे विनिगमकाभावः
स्वर्गादिपदसमभिव्याहाराधीनत्वेन तद्धर्मावच्छिन्नसाधनत्वस्य पृथक्शक्त्युपगमात् न च शक्यतावच्छेदकभेदा

शक्तिभेदः इष्टतावच्छेदकत्वेन स्वर्गत्वादीनामनुगतीकृत्य तदवच्छिन्ननिरूपितसाधनत्वे एकशक्त्युपगमात् न चे-
ष्टतावच्छेदकत्वेन शाब्दबोधे स्वर्गादीनां भानेप्याननुसन्ध्यत इति वाच्यं इष्टतावच्छेदकत्वस्योपलक्षणत्वेन यागश-
क्तिविषयत्वाद्विशेषणत्वेनैव शाब्दबोधे नोपगमात् उपलक्षणत्वे च तत्पदजन्यबोधविषयत्वेन शक्त्यविषयत्वे-
न तत्पदजन्यबोधविषयत्वेन शक्तिविषयत्वमेव च विशेषणत्वमिन्यत्रेति सारः समवायिकारणस्य तत्सा-
धकप्रवृत्तिं प्रति तत्समवायिकारणतामक्त उपादानगोचरलौकिकप्रत्यक्षस्य हेतुत्वेन च शब्दसाध्यकप्र-
वृत्तिर्मृदंगादौ न स्यात् उपादानगगनस्यातीन्द्रियत्वात् एवं ध्वंससाध्यकप्रवृत्तिरपि तत्समवायिनः प्रसिद्धेरि-
ति वाच्यं इष्टापत्तेः शब्दसाक्षात्कारसाध्यकप्रवृत्तेरेव मृदंगादिगोचरतयाऽनुपगमादिति प्राचीनमतानुसा-
रेणेदं नवीनमते त्वधिष्ठानमुपादानं बोध्यं तेन यागादिहेतुः शब्दस्य मृदंगादिः प्राणसंचारादेस्तु प्रमा-
णव हननाज्यादिरुपादानमिति बोध्यं मूलेऽदृष्टादिति फलगतो हेत्वादिष्टसाधनताज्ञाने च निवृत्तिप्र-
तिकारणामित्यभिप्रायेणोक्तं प्राणसंचारो हीति अधिकमाकरादिस्थः प्राणसंचारो यत्नसाध्यः प्रयत्न-
यत्नसाध्यः प्रयत्नयत्नसाध्यतया दृष्टः धावनप्रयत्नोत्कर्षेण श्वासक्रियोत्कर्षदर्शनादिभावः इत्येतासि-
द्धावित्यर्थः सर्वेषामिति एकत्र यत्नसाध्यत्वस्यानुभविकत्वेन तत्र दृष्टान्तेन प्राणसंचारत्वावच्छेदेन भोक्तृयत्नज- २५५

त्वत्वानुमानादिभावः प्रयत्नप्राणसंचारहेतुत्वेनानुमीयमानप्रयत्नत्वात्तु जीवनयोनियत्ने मानाभावः प्राणा-
क्रियाया अदृष्टविशेषप्रयोज्यात्ममनोयोगरूपाजीवनादृष्टप्रयोजकादृष्टाद्वा संभवात् क्लृप्तानुमानस्य
चाप्रयोजकत्वादन्यथा एकप्रयत्ने ज्ञानजन्यत्वे दृष्टान्तेन जन्यप्रयत्नत्वावच्छेदेन ज्ञानजन्यत्वकल्पनायत्नत्वस्य
वृत्तेर्ज्ञानादेरप्यतीन्द्रियस्य कल्पनापत्तेरिति प्राहुः । एतन्न समवायिभिन्नत्वे सति समवायित्वं इत्यादावति
व्याप्तमतो व्याचष्टे असमवायिकारणमिति द्वितीयादिपतनस्य वेगासमवायिसमवायिकारणत्वादाह
आद्येति एवं च संयोगासमानकालीनाक्रियाणामसमवायिकारणीका क्रियातात्संयोगजन्या क्रियाद्या-
दित्यमानेन गुरुत्वसिद्धिरिति भावः । अग्निसंयोगजन्यमिति अग्निसंयोगासमवायिकारणमित्यर्थः । वह्न्यव
माराणति प्रसंगादाह स्नेहस्त्वहितमिति तच्च सांसिद्धिकमेव तथा च सांसिद्धिकद्रवत्वत्वेन हेतुत्वान्न सुवर्णादि
द्रवत्वेन संग्रह इति भावः । न चावश्यकस्नेहहेतुत्वेनौपाधिकनति प्रसंगे सांसिद्धिकद्रवत्वमात्रसंग्रहहेतुत्वे मानाना
भाव इति वाच्यं स्नेहत्वेन सांसिद्धिकद्रवत्वेन वा हेतुत्वमित्यत्र विनिगमनाविरहेणोभयस्यापि हेतुत्वात् अ-
ग्नौ तैले प्रतीयमानस्नेहः जलीयः तैलान्तर्गतजलभागनिष्ठः तथा सति तैलात् जलभागस्यैवोपदहनप्रातिकूल्य-
प्रसंगात् दहननाशप्रसंगात् दहननाशप्रतिसंगेन जलस्नेहत्वादिति भावः । वेगजन्यतदशति वेगत्वं जातिविशे

मु॰टी॰ षः अन्यत्वासिद्धः तेन चेति कर्मनाशोत्तरसंयोगस्य तदानीमभावात् वेगस्यैव कर्मनाशकत्वं कल्प्यत इति भावः तत
१४५ इति पूर्वकर्मनाशानन्तरमित्यर्थः एवमग्रेपीति उत्तरकर्मणामपि पूर्ववेगनाशस्ततो वेगान्तरोत्पत्तिरित्येवमादिरि
145 त्यर्थः तिनाचवेगमिति वेगं विना कर्मनाशो न स्यादित्यन्वयः नाशकान्तराभावादिति भावः ननु पूर्वकर्मणो
नाशाभावे कोत्पत्तिरत आह कर्मोत्पत्तिस्त्वनस्यादिति अत्र हेतुः कर्मणः प्रतिबंधकत्वादिति भावः ननु पूर्वक
र्मणो नाशाभावे कांचनतिरत आह कर्मोत्पत्तिस्त्वनस्यादिति अत्र हेतुः कर्मणः प्रतिबंधकत्वादिति अत्र केचिदुत्त
रसंयोगेनैव पूर्वकर्मनाशोत्तरकर्मणो भवतः न स्पूर्वकर्मनाशकर्मोत्पत्तिसौकार्यं प्रयोजनाभावात् दूरत्वे
गेन गच्छतीति कर्मजनकतया प्रसक्तमेव वेगं प्रमाणमित्याहुः पुनर्गमनस्येति पूर्वसंयोगजनकक्रियाया
इत्यर्थः स्थितितस्थापकसाध्यत्वादिति वेगस्यैतत्तदेशसंयोगजनकत्वमिति न वेगेनास्थितिस्थापकस्या
न्यथासिद्धिरिति भावः स्थितिस्थापकत्वजातिविशेषः क्रियाविशेषजनकतावच्छेदकतया सिद्धः स्थि
तिस्थापकस्त्व क्रियाविशेषजनकः स्वजन्यक्रियानाश्यातीन्द्रियश्चेति मूले उक्तप्रायम् इत्यत्र च उक्तप्रकारे
णापेक्षाज्ञानानुस्मृतिवारणे च वस्तुतः संस्कारप्रत्युपेक्षान्यनिश्चीयते न हेतुत्वमेव विनिगमकमस्तीत्या
ह किंचेति संस्कारकल्पनाया गुरुत्वादित्यपस्मृतिप्रसंगेवापेक्षान्यातिश्चयनेन हेतुत्व इत्यादि सिद्धत्वादित्य १४५

ग्निमस्यामस्यापिपेचमंतस्यतेम्पेनुनानयःउपेदेक्ष्यवाचकपदस्यप्रागपेदितत्वात्तथानयप्रदर्शनार्थंउदीच्या
स्याख्यस्याविनयस्यप्राग्व्यापारणमितिवाच्यंनत्रसंस्कारे अतःसंस्कारःकल्प्यइति अथानुभवस्यध्वंसस्यव्यापारोऽस्तु
प्रतियोग्यभावयोरेकत्राजनकत्वमित्यस्याप्रयोजकत्वात् नचानुभवस्यस्मृतेप्रतिबंधकत्वापत्तिरितिवाच्यं सं
सर्गाभावत्वावच्छिन्नकारणतानाश्रयीभूताभावप्रतियोगिनस्यैवप्रतिबंधकतापदार्थत्वात् नचानुभवद्वितीय
क्षणोत्पन्नसंस्कारेणान्यतायद्वातेषांस्मरणासंभवात् ध्वंसस्यव्यापारत्वेनुसंभवतिफलस्यप्राक्कालेऽनुभवध्वंसस्या
भावादितिचेन्नसंस्कारानंगीकारेकदाचिदनुभूतस्यसर्वदास्मरणापत्तेः अनुभवध्वंसात्मकव्यापारस्यसत्वदास
त्वात् नचोद्बोधकाभावादस्मरणमितिवाच्यं यत्रवस्तुविशेषज्ञानात्मकोद्बोधकेनदशपंचवार्षंचादेःस्मरणा
न्निजातानितत्रवधिकानितत्रचरादिस्मृतेन तत्रखलुज्ञानस्यैवानियतोद्बोधकतयातत्स्थलेउद्बोधकाभावस्यव
क्तुमशक्यत्वात् वस्तुतस्तुनुपदेवक्ष्यमाणपूर्वसाधकयुक्त्यासंस्कारसिद्धिर्निराबाधेतिध्येयं स्वस्वव्यापारान
न्तराभावेकार्यात्पत्तव्याघातत्वेएवंक्षणोऽस्यस्वव्यापारान्तराभावे कारणत्वासंभवादितिनकार्यायवहि
तत्प्राक्क्षणवृत्तिस्वस्वव्यापारान्यतरकत्वस्यैवकारणतापदार्थत्वादितिभावः अप्रयोजकत्वादिति संस्कारजन्य
त्वस्यस्मृतित्वेप्रयोजनकत्वाभावादित्यर्थः मणिकृन्मतंप्रदर्शयति परेत्विति तन्मतेनतराकल्पनीयस्मृति

अप्रकाउत्तुहुसंस्कारस्यहेतुत्वकल्पने मन्त्रेनेतुप्रत्यभिज्ञायां न हेतुत्वकल्पनेप्रत्यभिज्ञायां न हेतुकल्पनं चेतवा-
धिकं गौरवमित्याह स्विन्यमेनाहमसःसूचितः स्वर्गादीत्यत्र स्वर्गपदेन सुखमात्रस्यापि पदेन शरीरेन्द्रियादेः परिग्र-
ह इति प्रदर्शयति स्वर्गादि सकालेत्यादिना अग्रेनरकादीत्यमित्यत्रापेवं तत्र धर्मे योगादीति आदिना होमदा-
नत परिग्रहः यागत्वं चदेवतोद्देश्यक स्वत्वत्यागत्व द्रव्यविशेषकेच्छात्वं देवतोद्देश्यकत्वं देवतास्वत्वबहिर्भावका-
त्वं शह्मयी देवतेति पत्ते तु न स्वेदमित्याकारोपज्ञानविषयत्वमुद्देश्यत्वं होमत्वं चाग्निसंयोगानुकूलक्रियानु-
कूल च्यूताद्दिशतिनोदनाद्दिव्यापारत्वं दानत्वं च स्वत्वग्रहणं विना स्वस्वत्वध्वंसपरस्वत्वजनकत्यागत्वमिति वि-
प्रदायः यागत्वहोमत्वादयो मानसप्रत्यक्षगम्या जातिविशेषा इत्यन्ये आहुस्तापि अपेक्षायायागत्वेनवाह-
णापेक्षया दानत्वेन तत्र सोकार्याभेहेयुक्तमित्यपरे अन्यथाधर्माभावे चिरविनष्टस्याप्यनुभवस्य स्मृति-
जनकत्वाद्दाह निर्व्यापारत्वेति चिरध्वस्तमिति चिरकालेन एकमातिशयं मसर्वं विनाफलाय फलजन-
नायनसमर्थमित्यर्थः तथा तेवं सप्रतियोगितो कुत्र जनकत्वाभावे यकमेवाएवं कल्प्यत इति वस्तुतस्तु
यागस्यापि ध्वंसो न व्यापारः तथात्वे कीर्तितयागान्तस्वर्गोत्पादवारणाय स्वर्गजनकतावच्छेदककोटौ की-
र्तितभेदोनिवेशनीयस्तत्र च कीर्तितत्वस्यैकस्याभावेन कीर्तितत्वावच्छिन्नप्रतियोगिताकभेदनिवेशनम

शमतः कीर्तितव्यक्तीनां तन्नाशोक्तिर्नावाच्छिन्नप्रति योगिताकएव भेदो निवेशनीयः एवं च दशाकीर्तितयागस्य
लेपरस्परं तत्तद्व्यक्तिभेदसत्वेन स्वर्गोत्पादवारणाय भेदकूटस्यैव कारणताच्छेदमुपगन्तव्यं तत्र च विशेषणवि
शेष्यभावे विनिगमनाविरहेण कार्यकारणभावानन्त्यमपूर्वस्वीकारे तु तृणादिकतत्याग नामेलनासंभवेन द
नामकत्वनिवेशप्रयोजनाभावः याद्दशाकीर्तितयागादपूर्वमायादनीयं तत्र देशावाच्छिन्नयागव्यक्तेस्तदानी
मभावात् न वा स्वर्षसंबंधेन कीर्तितयागव्यक्तीनां मेलनसंभवत्येवेति स्वर्गजनकतावच्छेदककोटौ कीर्ति
तभेदानामेकत्वनिवेशप्रमावश्यकमितिवाच्यं अपूर्वानुत्पत्त्यैव स्वर्गसंभवे स्वर्गजनकतावच्छेदककोटौ
कीर्तितभेदानामनिवेशात् कीर्तितभेदानामनिवेशात् कीर्तितयागानध्वंसोत्पादेन ध्वंसजनकतावच्छेदकको
टौ कीर्तितभेदनिवेशप्यासंभवादित्यत्र परिशीलितः पंथाः कारत इति सहकत्वं समर्थः एवमग्रेपि कार्यकाल
वृत्तित्वमिवेति यथा समवायिकारणस्य कारणते कालवृत्तित्वघटकतत्त्व समवायिकारणस्यकारणत्वेन त
सार्थः तेन कर्मनाशाजलस्पर्शादिनातस्य यागादेः ध्वंसे कर्मनाशाजलस्पर्शादितः पूर्व वृत्तत्वादितिद्वयत्रत्वाद्वि
नष्टत्वात्त्वेत्यर्थः योग्यविभुविशेषगुणानां स्वानंतरोत्पन्नगुणनाश्यत्वादिक्षणिकयागस्यतत्तीयक्षणएवनष्ट
त्वादिति भावः एवमग्रेपि धर्मे त्वरतीत्यस्य धर्मो यागादिस्तिरति फलभाग्भवतीत्यर्थः कर्त याकर्मनाशाजलस्प

मु.टी.
१५०
147

शादेः स्वधं संबंधेन स्वर्गादिफलं प्रति प्रतिबंधकमेवयुक्तमिति नन्वत एकाश्वमेधानेन रमेश्वमेधः कृत इति कीर्तने
नडतत्पुन रश्वमेधकरणेपि स्वर्गानुत्पत्तेः न च तदश्वमेधजन्यस्वर्गत्वावच्छिन्नं प्रति तत्कीर्तनत्वेन प्रतिबंधकत्वा
न्नाश्वमेधांतरजन्यस्वर्गानुदयप्रसंग इति वाच्यं यदश्वमेधस्य कीर्तनेन कृतं तदश्वमेधजन्यस्वर्गाप्रसिद्ध्या नादृष्टाप्रतिब
ध्यप्रतिबंधकभावस्य कल्पयितुमशक्यत्वात् न चापूर्वं दर्शपूर्णमासाहि विधं परमापूर्वं कालिकापूर्वं चेति
तथाहि यदाग्नेयोष्टाकपालो मावस्यायां च पौर्णमास्यां चाच्युतो भवति उपांशुयाजमंतरा यजति ताभ्यामेत
मग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत् ऐंद्रं पयोमावास्यायामिति पंचभिर्वाक्यैर्विहितेभ्यः षड्भ्यः
आग्नेयादिभ्यः आग्नेयादिभ्यः षडुत्पत्त्यपूर्वाणि तान्येव कालिकापूर्वाण्युच्यन्ते तेभ्यश्च परमापूर्वमिति ननु षड्
पूर्वाण्यावश्यकानि मोक्षादेवस्वर्गहेतवः संतु किं परमापूर्वेणेति चेन्न दर्शपूर्णमासाभ्यां यजेतेत्यनेनाभय
तावच्छिन्नस्य स्वर्गसाधनतावगमादुभयतावच्छिन्नस्यैकव्यापारकल्पनादुत्पत्त्यपूर्वाणां चोभयतावच्छि
न्नजन्यत्वात् दर्शपूर्णमासाभ्यामिति विधिप्रवृत्तिसमये चिरविनष्टदर्शपूर्णमासव्यापारत्वेनैकस्य चापू
र्वकल्पनाच्च न चैवमनंतरयागानामानुक्रमिकत्वज्ञाने षडपूर्वकल्पनागौरवं तस्य फलमुखत्वात् न च पंचभिः
पंचापूर्वं ज्ञातांशषष्ठेन च समाप्तादेव परमापूर्वं जन्यतामिति किं षष्ठेन कालिकापूर्वेणेति वाच्यं षष्ठेनापु १५०

तत्संगदत्तिणामहत्कारेणैव परमात्मसर्वं ज्ञाननानात्मवकाले घटस्य यागस्थाने वाच्यत्वान्नज्ञान्यसर्वं स्थाविषयक
त्वात् अत्र परमात्मसर्वं प्रतिसर्गं प्रति च दर्शनस्मरणाभ्यां भयस्याधारणां वेजन्येन कारणान्न मित्येके दर्शने न स्मरणे
मात्मत्वेन च कारणत्वं दंडचक्रवाद्यमिलितानां फलोपधानमित्यपरे अत्रत्रयात्मकदर्शस्य ज्ञानस्य सर्वस्य मेकैकव
लिकात्मसर्वं व्यापारकं एवंत्रयात्मकस्मरणाभाव जन्यमेकमसर्वं कलिकात्मवेत्र यथा पालकत्वाभ्यां स्वर्गज
नकात्मवेत्तानि तत्र परमात्मसर्वं फलाशिरस्कात्मसर्वमित्युच्यत इति नवात्मवोपत इत्येके नत्रैवकुलाशिरस्कात्मस
र्वं भावाभावाभावादस्या सर्वी इत्यन्ये कलिकात्मवं घटकेनैव परमात्मसर्वसंभवाद्व्यापारिभ्यत्ताया एवं हृदयमानाभावा
त्सर्वात्मकात्मसर्वं वर्णकेतिनव्याः इदं चात्मसर्वं ज्ञानतोऽपि परन्तु यज्ञादेः कर्तृत्वं निष्प्रयुक्तमुत्पद्यत इत्येके भोक्तृत्वमिति एव इति
तत्संप्रदायः प्राभाकरस्तु यागक्रियासर्वात्मनानैव नयपपत्ति किंतु स्वस्य रूपेण स्वर्गादेरारंभकेषु यागसंबंधि
द्रव्यारंभकेषु यागकर्तर्यात्मनि वा वस्थाफलमारभत इत्याहुः तत्र स्नानेच्छादिरूपस्य यागस्यात्मनो याग्य
विशेष्यगुणतया हानिं च तत्र एयानवस्थापित्वनियमात् ज्ञानेच्छादीनां सदानतुभवेन समानाधिकरण
त्वात्तरसत्तिगुणनाशयतत्वस्वीकारात् अन्यूथे वैतीत्याज्ञगतपव स्वस्मतया सर्वदावस्थानप्रसंगादित्युलं विल
रेण ननु गंधादिदर्शनादिनां ईश्वरे कुतो नधर्मादेरुत्पत्तिरत आह स्वलेऽस्मीत्तु वासना जन्याविति ईश्वर

मु.टी.
१४८
148

मिथ्याज्ञानजन्यवासनाविरहान्नधर्मादेरुत्पत्तिरिति भावः तन्नधर्माधर्मौ प्रति वासनाया हेतुत्वेन मानाभाव इत्यत आ
ह मुक्तावल्यामत इति ज्ञानिनां तत्त्वज्ञानवत्तां च न विरोधादिति तेनाहुः कर्मनाशमात्रे भोगस्य हेतुत्वप्रतिपाद
नादिति भावः इत्थं चेति कर्मणां भोगनाश्यत्वे चेत्यर्थः अन्यथाऽयत्नलक्षस्याभावे सर्वकर्मणामिति सर्वकर्मज
न्यादृष्टानीत्यर्थः भस्मसात्कुरुते नाशयति स्मर्गिं दर्शयन्निवाश्रुतिं प्रदर्शयति क्षीयन्ते चेति तदभिप्रायमेव प्रा
यमेव प्रारब्धकर्माभिप्रायमेव गौरवादिति दशशहानां तत्प्रागभावानां तद्ध्वंसे हेतुमत्तानां च कल्पने गौर
वादित्यर्थः उक्तप्रतीतिविरोधादिति उत्पादविनाशशालिप्रत्ययविरोधादित्यर्थः इत्थं चेति प्रत्यभिज्ञानस्य स
जातीयविषयत्वे चेत्यर्थः द्वयोरपीति उत्पन्नादिप्रतीतिप्रत्यभिज्ञयोरित्यर्थः अत्र मीमांसकाः स एवायं गका
र इत्यभिज्ञया गकारादेस्तावत्कालावस्थानस्य विषयीकृतत्वेनातराभूतनशहादि नाऽनाशेनाशकाभावा
द्वर्णानित्यत्वसिद्धिः न च प्रत्यभिज्ञानं तज्जातीयत्वविषयिणी वाधकाभावात् अन्यथा सर्वत्रापि तथात्वे भे
दोच्छेदापत्तिः न च तारत्वमन्दत्वरूपविरुद्धधर्माध्यासो बाधकः प्रत्यभिज्ञानबलेन तस्य नित्यत्वसिद्धौ तारत्वा
देर्व्यंजकवायुधर्मत्वस्य कल्पनात् श्रोत्रेण वायुधर्मस्य तारत्वादेरपि ग्रहणसंभवात् य एव तारः स एवा त्या
पेत्तयामंद इति प्रतीतेस्तारत्वमन्दत्वयोरविरोधात्रेत्याहुः तन्न तथा सति कत्वगत्वादेरपि व्यंजकवायुधर्मता १४८

यत्वाककारगकारयोर्वैर्णव्यापत्तेः वस्तुतस्तु वर्णानित्यत्वपक्षे कंठताल्वाद्यभिघातानां ककारादिकं कार्यतावच्छेदकं वर्णनित्यतापक्षेतु कस्मात्ताकारत्वमिति गौरवान्न नच नित्यत्वमतेपि लौकिकविषयतया कत्वमेव तज्जन्यतावच्छेदकमिति न गौरवावकाश इति वाच्यं कोलाहलप्रत्यक्षस्यासंग्रहप्रसंगात् नहि कोलाहलप्रत्यक्षं ककारादिविषयतया कत्वमेव तज्जन्यतावच्छेदकमिति न गौरवावकाश इति वाच्यं कोलाहलप्रत्यक्षस्यासंग्रहप्रसंगात् नहि कोलाहलप्रत्यक्षं ककारादिविषयतया कत्वमेव तज्जन्यतावच्छेदकमिति न गौरवावकाश इति वाच्यं कोलाहलप्रत्यक्षस्यासंग्रहप्रसंगात् नहि कोलाहलप्रत्यक्षं ककारादिविषयकं अन्यथा तुल्ययुक्त्या घटाद्युत्पादकस्यापि घटप्रत्यक्षत्वमेव कार्यतावच्छेदकमिति तदपि नित्यमेव स्यादिति नवानित्यत्वमते प्रत्यभिज्ञाया स्सजातीयत्वविषयत्वेन तज्जातीयोयमिति स्यान्नतु सोयमिति इति वाच्यं यत्र प्रत्यभिज्ञायां ज्ञातित्वेन गत्वादेर्भाने तत्रैव तज्जातीयोयमित्याकारः यत्र तु स्वरूपतो भाने तत्र सोयमित्यभ्युपगमादिति अत्रेदं बोध्यं शब्दो द्विविधः ध्वन्यात्मको वर्णात्मकश्च तत्र ध्वन्यात्मकसंयोगजन्या यथा शब्दं प्रति गगनं समवायिकारणं भेर्याकाशसंयोगोऽसमवायिकारणं भेरीदण्डसंयोगादि निमित्तकारणं विभागजन्यध्वन्यात्मका यथा शब्दं प्रति वंशविभागोऽसमवायिकारणं वंशदलद्वयविभागो निमित्तकारणं कंठताल्वादिना वाय्वादिसंयोगो निमि

मु·टी·
१४९

नकारणं द्वितीयादिशब्दं प्रति तु आद्यशब्दोऽसमवायिकारणं नच भेर्याकाशसंयोगस्य वाय्वाकाशसंयोगादीनां
शब्दं प्रति कारणत्वे मानाभाव इति वाच्यं भावकार्यस्यासमवायिकारणजन्यत्वनियमेन तत्कारणत्वस्वीकारे
तेनादृष्टानियमे मानाभावेन मास्तु तेषां कारणत्वं भेरीदंडसंयोगादिनिमित्तकारणसहकृतेनाकाशेन
वर्णाद्युत्पत्तिसंभवादिति प्रथमादिशब्दानां च समकार्यशब्देनैव नाशः चरमस्य तु पांत्यशब्देनोपांत्यशब्द
नाशेनैव नाश इति मूलेन दैवी सुधमित्यादाविवेत्यादिना सैवेयं दीपकलिकेत्यादेः परिग्रहः ननु तत्राप्यैक्य
त्वाभेद एव विषयो स्वतो भावार्थं प्रकाशयति यदोषधं मया कृतमित्यादिना अत्र च स्वकर्तृकत्व स्वभि
न्नकर्तृकत्वरूपविरुद्धधर्माध्यासाद्धितभेदप्रत्ययस्य प्रतिबंधकस्य सत्त्वात्तत्व्यक्तिभेदो विषयः किं तु तत्स
जातीयभेदो विषय इति भावः आनुप्रमाण्यपरिभाव्य च शास्त्रसारं मुक्तावलीकिरणरूपोपितप्रदेशः
स्वयुक्तिभिर्दिनकरेण करेण सोयं नीतः प्रकाशपदवीं सुधियां मुदे स्तु मुक्तावलीप्रकाशोयं अज्ञा
नतिमिरापहः तेन संतोषमायातु नीलकंठः सतां प्रियः इति श्री
समाप्तम शुभमस्तु संवत् १९०४ ॥

१४९